तरङ्ग—wave. मरुत्—wind. कलगिरः—of melodious note. छाया—shade. परिष्वज्य—having embraced. सखी—female friend. रमयति—gladdens. शून्य—desolate. परिजनवती—having attendants.

टी०—तरङ्गा महोर्मय. सजलकणिकान् जलकणिकाभि सलिलबिन्दुभि. सह वर्त्तन्त इति सजलकणिका. तान् । शीतमरुत. शिशिरपवनान् । वीजन्ते प्रेरयन्ति । तथा एते कलगिर मधुरालापा. कलहंसा. कादम्बा. सङ्गीतं दधति गायन्ति । इयं छाया अनातप सखी इव आली इव हृदयं चेत. परिष्वज्य आलिङ्ग्य रमयति आनन्दयति । अत्रभवती पूज्या त्वं शून्ये अपि निर्जने अपि वने अरण्ये परिजनवतीव सेवकवर्गयुक्तेव ॥ ७ ॥

सी—(ससम्भ्रमम्) **अपि कुशलमार्यपुत्रस्य ?**

अवि कुसलं अज्जउत्तस्स ?

ल—(वनं निर्दिश्य) **एवं गते कीदृशं कुशलमार्यस्य ?**

सी—आर्यया कैकेय्या पुनरपि समादिष्टो वनवासः ?

अज्जूए केकईए पुणो वि समादिट्ठो वणवासो ?

ल—समादिष्टो वनवासः, न पुनरम्बया ।

सी—केन पुनः समादिष्टः ?

केण उण समादिट्ठो ?

ल—आर्येण ।

सी—कथं समादिष्टः ?

कहं समादिट्ठो ?

ल—(बाष्पस्तम्भमभिनीय)

आर्यस्यादेश इत्येव वक्तुमिच्छामि यत्नतः ।
तथापि हृदयं गत्वा ग्रन्थिं बध्नाति भारती ॥ ८ ॥

सी—किं मम समादिष्टो वनवासः ?

किं मम समादिट्ठो वणवासो ?

ल—न केवलं तव, आत्मनोऽपि ।

सी—कथमिव ?

कहं विअ ?

टी०—सुखोपविष्टा—सुखेन उपविष्टा स्थिता । अवसर समयः यथास्थितं यथा-निश्चितं व्यवसितुं विधातुम् । प्रकाशं सर्वश्रव्यम् । सहसा शीघ्रं पादयोश्चरणयोः निपत्य । अनवरतप्रवासदु.खभागी अनवरतं सततं य. प्रवासो वनवासस्तद्दु.खस्य कष्टस्य भागोऽस्यास्तीति स. ।

निर्लक्षण· लक्षणरहितः मन्दभाग्य इति यावत् । स्थिरीक्रियताम् अवधार्यतां हृदयं चेत । बाष्पस्तम्भमभिनीय—अश्रुपातरोधं नाटयित्वा ।

अ०—आर्यस्य आदेश इति एव यत्नत. वक्तुम् इच्छामि तथापि भारती हृदयं गत्वा ग्रन्थिं बध्नाति ॥ ८ ॥

आदेश—message (Lit. utterance.) **वक्तुं**-to speak. **हृदयं गत्वा—**entering the heart. **ग्रन्थि**-knot.

टी०—आर्यस्य रामभद्रस्य आदेश कथनम् 'दिशिरुच्चारणे' इति 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रे महाभाष्ये उक्तत्वात् उच्चारणेऽत्र दिश्धातु. । यत्नत आयासेन वक्तुमिच्छामि कथयितुमीहे । तथापि क्रियमाणेपि यत्ने भारती वाणी हृदयं गत्वा प्रविश्य ग्रन्थिं बध्नाति मुखान्न नि.सरतीत्यर्थः ॥ ८ ॥

ल—प्रकामभुक्ते स्वगृहाभिमानात्
सुहृज्जनेनाहितयागवह्नौ ।
आर्यस्य रम्ये भवनेऽपि वास-
स्तव प्रवासे वनवास एव ॥ ९ ॥

सी—वत्स, परिस्फुटं (clearly) कथय, अद्य कथं मम वनवास आर्यपुत्रस्य वनवास इति ।
वच्छ, परिप्फुडं कहेहि, अज्ज कहं मम वणवासो अंअउत्तस्स वणवासोत्ति ।

ल—किमपरं कथयामि मन्दभाग्यः ।
त्यक्ता किल त्वमार्येण चारित्रगुणशालिना ।
मयापि किल गन्तव्यं त्यक्त्वा त्वामिह कानने ॥ १० ॥

अ०—सुहृज्जनेन स्वगृहाभिमानात् प्रकामभुक्ते, आहितयागवह्नौ, रम्ये भवने अपि आर्यस्य वासः तव प्रवासे वनवास एव ॥ ९ ॥

स०—सुहृज्जनेन शोभनं हृदयमस्येति सुहृत् सुहृच्चासौ जनश्चेति सुहृज्जनस्तेन । प्रकामभुक्ते-प्रकामं भुक्ता यस्मिन् तस्मिन् प्रकामभुक्ते । स्वगृहाभिमानात् स्वस्य गृहं स्वगृहं तस्य अभिमान. स्वगृहाभिमान तस्मात् । आहितयागवह्नौ आहितः यागाय वह्नि. यस्मिन् तस्मिन् ।

प्रकामम्—heartily. आहित—put, placed. यागवह्नि—sacrificial fire. वास—residence. प्रवास—banishment.

टी०—सुहृज्जनेन मित्रवर्गेण स्वगृहाभिमानात् स्वस्य गृहं स्वगृहं तस्याभिमानो गर्वस्तस्मात् प्रकामभुक्ते प्रकामं यथाभिमतं भुक्ता. कृताशना (सुहृज्जनाः) यस्मिन् तादृशे, आहितयागवह्नौ आहित. संस्थापितः यागवह्निर्यज्ञाग्निर्यत्र तस्मिन्, रम्ये मनोज्ञे भवने गृहे अपि आर्यस्य रामभद्रस्य वासो निवास. वनवास एव अरण्यस्थितिसदृश एव ॥ ९ ॥

अ०—चारित्रगुणशालिना आर्येण किल त्वं त्यक्तासि मयापि इह कानने त्वां त्यक्त्वा किल गन्तव्यम् ॥ १० ॥

स०—चारित्रगुणशालिना चारित्रमेव गुण तै शालत इति तेन ।

चारित्रगुणशालिना—Possessed of the nobility of conduct. कानन—forest.

टी०—चारित्रगुणशालिना चारित्रगुणै प्रजारञ्जनादिभि.सच्चरितगुणैः शालते शोभते इति तेन आर्येण रामभद्रेण किल निश्चयेन त्वं त्यक्तासि विवासितासि । मयापि त्वाम् अस्मिन् कानने वने त्यक्त्वा परित्यज्य किल गन्तव्यम् ॥ १० ॥

सी—हा तात, आर्य कोसलाधिप ! अद्योपरतोऽसि ।
हा ताद, अय्य कोसलाहिप ! अज्ज उवरदोसि ।
(मोहं गच्छति)

ल—(ससम्भ्रमम्) कष्टं भोः ! कष्टं भोः ! निर्घातपातदारुणेनानेन परित्यागवार्ताश्रवणेन नूनमुपरता देवी । (निर्वर्ण्य) दिष्ट्या श्वसिति । तत्को नु खल्वस्याः प्रत्यानयनेऽभ्युपायः । (विषादं नाटयति) आश्चर्यमाश्चर्यम्—

भागीरथीशीकरशीतलेन सम्भाव्यमाना मृदुनानिलेन ।
मद्भाग्यशेषेण च बोध्यमाना प्रत्यागता राजसुता कथञ्चित् ॥११॥

सी—वत्स लक्ष्मण ! किं गतोऽसि ?
वच्छ लक्खण ! किं गदोसि ?

ल—आज्ञापय, तिष्ठाम्येष मन्दभाग्यः ।

सी—किमुपालभ्यास्मि परित्यक्ता ?
किं उवालंभिअ अंमि परिचत्ता ?

टी०—कोसलाधिप दशरथ । रामकर्तृकत्यागनिश्चयं श्रुत्वा सीता दशरथं स्मरति हा तातेति । निर्घातपातदारुणेन निर्घातो वज्रं तस्य पात. पतनं तद्वद् दारुणेन व्यथाकरेण । परित्यागवार्ताश्रवणेन परित्यागो गृहान्निष्कासनं तस्य वार्ता वृत्तं तस्या श्रवणेन आकर्णनेन उपरता मृता । निर्वर्ण्य विलोक्य । दिष्ट्येति हर्षे । श्वसिति प्राणिति । प्रत्यानयने संज्ञाप्रापणे अभ्युपायः प्रतिक्रिया । विषादं कष्टं नाटयति अभिनयति ।

अ०—भागीरथीशीकरशीतलेन मृदुना अनिलेन सम्भाव्यमाना मद्भाग्यशेषेण च बोध्यमाना राजसुता कथञ्चित् प्रत्यागता ॥ ११ ॥

स०—भागीरथीशीकरशीतलेन—भागीरथ्या. शीकराणि भागीरथीशीकराणि तै शीतलस्तेन । मद्भाग्यशेषेण—मम भाग्यं मद्भाग्यं तस्य शेष स मद्भाग्यशेषस्तेन ।

शीकर—spray. मृदु—soft. अनिल—breeze. सम्भाव्यमाना—honoured. भाग्यशेष—The remnant of fortune. बोध्यमाना—awakened. राजसुता—princess.

टी०—भागीरथी गङ्गा तस्या. शीकरै. अम्बुकणै शीतलेन शीतभावङ्गतेन मृदुना कोमलेन सुखस्पर्शेनेति यावत् , पवनेन सम्भाव्यमाना कृतसत्कारा जातसंसर्गा, मद्भाग्यशेषेण मम भाग्यं दैवं तस्य शेषोऽवशिष्टस्तेन बोध्यमाना संज्ञां नीयमाना राजसुता राजदारिका सीता कथञ्चित् प्रत्यागता चेतनतामुपागता ।। ११ ॥

टी०—किमुपालभ्य केन दोषेणेत्यर्थ. ।

ल—कीदृशो देव्या उपालम्भः ?

सी—अहो मेऽधन्यत्वम्, किमुपालम्भमात्रेण विना निगृहीतास्मि । किमस्ति किमपि तेन सन्दिष्टम् ?

अहो मे अधण्णत्तणं, किं उवालम्भमेत्तएण विणा णिगहिदह्मि । किं अत्थि किं वि देण संदिट्ठं ?

ल—अस्ति ।

सी—कथय कथय ।

कहेहि कहेहि ।

ल—तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति
दुःखे सुखे च सुचिरं सहवासिनीति ।
जानामि केवलमहं जनवादभीत्या
सीते त्यजामि भवतीं न तु भावदोषात् ॥ १२ ॥

अयमार्यस्य संदेशः ।

सी—कथं जनवादभयेनेति । किमपि वचनीयं मेऽस्ति ?

कहं जणवादभयेणेत्ति । किंवि वअणीअं मे अत्थि ?

ल—कीदृशमार्याया वचनीयम् ।

उपालम्भमात्रेण अपराधलवेन विना । निगृहीतास्मि कलङ्कितास्मि दूषितास्मि ।

अ०—तुल्यान्वया इति अनुगुणा इति गुणान्विता इति सुखे दुःखे च सहवासिनी इति जानामि, सीते अहं केवलं जनवादभीत्या भवतीं त्यजामि, भावदोषात् तु न ॥ १२ ॥

स०—तुल्यान्वया तुल्य अन्वय. यस्या. सा । अनुगुणा अनुकूला गुणा यस्या सा । जनवादभीत्या जनवादात् भीति जनवादभीतिस्तया ।

तुल्यान्वया—of equal lineage. अनुगुण—of similar qualities. गुणान्विता—possessed of virtues. सुखे दुःखे च—in weal and woe. वाद—slander. भीति—fear. भावदोष—lack of feeling.

टी०-तुल्य. सदृशोऽन्वय कुलं यस्या सा । समानकुलत्वादावयो परस्परं संबन्ध अभिमत । तदुक्तं—'ययोरेव समं वित्तं ययोरेव समं कुलं । तयो मैत्री विवाहश्च न तु पुष्टविपुष्टयो.' । अनुगुणा=अनुकूला गुणा सत्स्वभावादीनि सत्कुललक्षणानि यस्याः सा । गुणोन्नता, गुणै. दाक्षिण्यादिभि उन्नता समृद्धा । सुखे दु.खे च सम्पदि विपदि च सुचिरं चिरकालं सहवासिनी सहस्थायिनीति जानामि वेद्मि । हे सीते जानकि केवलम् अहं जनवादभीत्या लोकनिन्दाभयेन भवतीम् उत्तमगुणवर्णां त्यजामि, भावदोषात् चेतोविकारात्तु न ॥ १२ ॥

जनवादभयेन लोकापवादभयेन । वचनीयं निन्दाकारणम् ।

ऋषीणां लोकपालानामार्यस्य मम चाग्रतः ।
अग्नौ शुद्धिं गता देवी किन्तु—

सी—(लज्जा नाटयति) **कथय, किन्तु—**
कहेहि, किंतु—

ल—लोको निरङ्कुशः ॥ १३ ॥

सी--अग्निशुद्धिसङ्कीर्तनेन प्रतिबोधितास्मि । रावणभवनादन्ते
अग्निसुद्धिसंकित्तणेण पडिबोधिदम्हि । रावणभवणउत्तंतो
पुनरप्युद्बाधयति । सीताया अपि नाम एवं सम्भाव्यत इति सर्व-
पुणोवि उब्वादिअदि । सीदाए वि णाम एव्वं संभावीअदित्ति सव्व-
थाऽलं महिलात्वेन । एवं परित्यक्ता । ननु परित्यक्तास्मि ? किन्न
हा अलं महिलत्तणेन । एव्वं परिचत्ता । णु परिचत्तम्मि ? किं ण
खलु युक्तं ममार्यपुत्रपरित्यक्तमात्मानं परित्यक्तुम् ? किन्न खलु
खु जुत्तं मम अंअउत्तपरिचत्तं अत्ताणं परिच्चइदुं ? किं ण खु
तस्यैव निरनुक्रोशस्य समान एष प्रसवः प्रेक्षितव्य इति वचनीय-
तस्स एव्व णिरनुक्कोसस्स समाणो एसो पसओ पेक्खिदव्वोत्ति वअणीअ-
कण्टकोपहितं जीवितं परिरक्षामि ।
कटकोपहिदं जीविदं परिरक्खामि ।

अ०—ऋषीणां लोकपालानाम् आर्यस्य मम च अग्रतः देवी अग्नौ शुद्धिं गता, किं तु लोकः निरङ्कुशः ॥ १३ ॥

लोकपाल—The guardian of the quarter. **अग्रतः**—in the presence of. **अग्नौ शुद्धिं गता**—went through the ordeal of fire. **निरङ्कुश**—unreined.

टी०—ऋषीणां भूतभविष्यवर्त्तमानकालत्रयदर्शिनां मुनीनाम् (ऋषिर्दर्शनात्) लोकपालानाम् इन्द्रादीनाम् आर्यस्य रामभद्रस्य मम च अग्रत. पुरत देवी अग्नौ वह्नौ शुद्धिं गता अग्निप्रवेशेन दिव्यपरीक्षामुत्तीर्णा । किन्तु लोक जन. निरङ्कुशः अङ्कुशरहित. निरर्गल , यथाचिन्तितं वदतीत्यर्थ ॥ १३ ॥

टी०—अग्निशुद्धिसङ्कीर्तनेनेति । अग्नौ वह्नौ या परीक्षायै शुद्धिस्तस्याः सङ्कीर्तनं कथनं तेन प्रतिबोधितास्मि स्मारितास्मि । रावणभवनोदन्त· रावणगृहनिवासवृत्तम् । पुनरपि उद्बाधयति खेदयति । सीताया अपि नाम सम्भाव्यते सीताविषयेऽप्येवंविधो विचार इति का गणनाऽन्यासां स्त्रीणाम् । अर्थान्तरे तु सीतयापि जीवतीति जनापवादान्मरणमेव श्रेय·; महिलात्वमेव जनापवादस्थानम् तदेव मा भूदिति सीताया अभिप्राय. । निरनुक्रोशस्य निर्दयस्य प्रसव. गर्भ. प्रेक्षितव्यो रक्षणीय इति वचनीयकण्टकोपहितं वचनीयं दोषारोप एव कण्टकं तेन उपहितं विद्धं जीवितं परिरक्षामि प्राणिमीत्यर्थ. ॥

ल—अनुगृहीतोऽस्मि । (उत्थाय प्रणमति) इदमपरमार्येण सन्दिष्टम् ।

सी—किन्नु खलु भविष्यति ।

किं णु खु भविस्सदि ।

ल—त्वं देवि चित्तनिहिता गृहदेवता मे
स्वप्नागता शयनमध्यसखी त्वमेव ।
दारान्तराहरणनिःस्पृहमानसस्य
यागे तव प्रतिकृतिर्मम धर्मपत्नी ॥ १४ ॥

सी—एवं सन्दिशतार्यपुत्रेण परित्यागदुःखं मयि निरवशेषमपनीतम् । न हि तथान्यासक्ता पत्युः, स्त्रीजनस्य दुःखमुत्पादयति यथान्यासक्तः ।

एव्वं संदिशंतेण अज्जउत्तेण परिच्चाअदुक्कं मयि निरवसेसं अवणीदं । ण हि तह अण्णासत्ता पइणो, इत्थिआजणस्स दुक्कं उप्पादेदि जह अण्णासत्तो ।

अ०—देवि त्वं मे चित्तनिहिता गृहदेवता (असि), स्वप्नागता शयनमध्यसखी त्वम् एव (असि), दारान्तराहरणनिःस्पृहमानसस्य मम यागे तव प्रतिकृतिः धर्मपत्नी (भविष्यति) ॥ १४ ॥

स०—चित्तनिहिता–चित्ते निहिता । गृहदेवता—गृहस्य देवता । स्वप्नागता—स्वप्नेषु आगता । शयनमध्यगता–शयनस्य मध्यं शयनमध्यं तत्र गता । दारान्तराहरणनि स्पृहमानसस्य—अन्ये दारा दारान्तरं तस्य यद् आहरणं तद् दारान्तराहरणं तत्र निःस्पृहम् मानसं यस्य तस्य ।

चित्तनिहिता—placed in the heart. गृहदेवता–The Goddess of the house. शयनमध्यसखी–bed fellow. निःस्पृह–averse. प्रतिकृति–image.

टी०—हे देवि त्वं मे चित्तनिहिता चित्ते मनसि निहिता स्थापिता गृहदेवता गृहश्रीः असीति शेषः । स्वप्ने स्वप्नावस्थायाम् आगता प्राप्ता शयनमध्यसखी शयनं शय्या तस्य यन्मध्यं मध्यभागस्तद्गता सखी सहचरी त्वमेव । दारान्तराहरणनि स्पृहमानसस्य अन्ये दारा दारान्तरं तस्य यदाहरणं ग्रहणं तत्र नि स्पृहम् अनभीष्टं मानसं चेतो यस्य तस्य, मम यागे यज्ञे तव प्रतिकृतिः मूर्त्तिः धर्मपत्नी धर्मेण पत्नी यज्ञार्धफलभागिनी भविष्यतीति शेषः ॥ १४ ॥

टी०–निरवशेषं समग्रमेव परित्यागदुःखं विवासनजं कष्टम् अपनीतं दूरीकृतम् । अन्यासक्ता अन्यस्मिन् भर्तृव्यतिरिक्ते पुरुषे आसक्ता गतहृदया स्त्री पत्युः तथा दुःखं नह्युत्पादयति जनयति यथा अन्यासक्तः अन्यस्याः पत्नीव्यतिरिक्तायाः स्त्रियाः

ल—कः प्रतिसन्देशः ?

सी—कस्य ?

कस्स ?

ल—आर्यस्य।

सी—एवं गतेऽपि प्रतिसन्देशः । श्वश्रूणां पुनर्मम वचनात्
एव्व गदेवि पडिसंदेशो । अज्जूणं उण मम वअणादो
पादवन्दनं कृत्वा विज्ञापय—एवमहं नीरक्षा श्वापदसमाकीर्णे वने
पादवंदणं कदुअ विरणवेहि—एव्वं अहं णीरक्खा सावदसमाइण्णे वणे
प्रतिवसन्ती च सर्वथा हृदयेनार्याभिरनुगृहीतव्येति ।
पडिवसंती अ सव्वहा हिअएण अय्याहिं अणुगहीदव्वेत्ति ।

ल—प्रतिगृहीतेयमाज्ञा । आर्यस्य न किञ्चित् सन्दिष्टम् ।

सी—तथानिष्ठुरो नाम सन्दिश्यत इत्यप्रतिहतवचनतैषा लक्ष्म-
तह निष्ठुरो णाम संदीसीअदित्ति अप्पडिहदवअणदा एसा लक्ख-
णस्य. न सीताया धन्यत्वम् । तथा मम वचनात्तं जनं विज्ञापय—
णस्स, ण सीदाए धएणत्तणं । तह मम वअणादो तं जणं विएणवेहि—
मन्दभागिनीमनुशोचन् वर्णाश्रमपरिपालनमभिघ्नन्नात्मानं न बाधय ।
मन्दभाइणीं· अणुसोअंतो वएणस्समपरिवालणं अहिग्घंतो अत्ताणं ण बाधेहि ।
सद्धर्मे स्वशरीरे सावधानो भवेति । वत्स लक्ष्मण ! किमुपालभे
सद्धंमे ससरीरे सावधाणो होहित्ति । वच्छ लक्खण ! किं उवालंभामि
महाराजम् ?
महाराअं ?

मासक्तो नर खनायो दु खमुत्पादयति ।

टी०—प्रतिसन्देश· प्रतिवच । नीरक्षा अरक्षिता । श्वापदसमाकीर्णे श्वापदैः हिंस्रै व्याघ्रादिभिः समाकीर्णे भरिते, वने अरण्ये प्रतिवसन्ती, सर्वथा हृदयेन, तथा निष्ठुर· कठिनहृदयो नाम सन्दिश्यते इत्यत्र हेतुस्तावत् लक्ष्मणस्य अप्रतिहत-वचनता न प्रतिहतं वचनम् अप्रतिहतवचनं तस्य भावस्तत्ता । लक्ष्मण-वचो नैष्फल्यं न व्रजेदिति कारणेन प्रतिसन्दिश्यते । न सीताया धन्यत्वं भाग्यम् । नात्र सीतायाः सन्देशं प्रति स्वारसिक प्रयास. । मन्दभागिनीं हतभाग्या, वर्णाश्रम-परिपालनं वर्णा ब्राह्मणादय· आश्रमा· ब्रह्मचर्याद्यास्तेषा परिपालनं रक्षणम् अभिघ्नन् नाशयन्, आत्मानं न बाधय न पीडय । धर्मस्यारक्षणादात्मनोऽरक्षा धर्मस्य त्राणाद् आत्मनस्त्राणम् । सद्धर्मे सुकृतफले सद्भि पालिते कर्मणि स्वशरीरे च सावधान· सावहितो भव ।

ल—किमेतावत्यपि न प्रभवति देवी ?

सी—एवमपि तं जनं विज्ञापय—न युक्तं तव निरपराधमिमं जनं
एव्वं वि तं जण विरणवेहि—ण जुत्तं तव णिरपराहं इमं जणं
सपदि हृदयतो निर्वासयितुं किं पुनर्विषयत इति ।
सपदि हिअआदो निव्वसिदुं कि उण विसआदोत्ति ।

ल—सन्देष्टव्यमार्यया सन्दिष्टम्—

आर्या निर्वासिता नाम हृदयात्प्रभविष्णुना ।
कथं गृहाद् गृहं नाम कथं जनपदादपि ॥ १५ ॥

सी—एवमपि मम वचनाद् विज्ञापयितव्यः—सा तपोवन-
एव्वं वि मम वअणादो विरणविदव्वो—सा तपोवण-
वासिनी सर्वथा सीमन्तनिहितेनाञ्जलिना विनिवेदयति यदि अहं
वासिणी सव्वहा सीमण्टअणिहिदेन अंजलिणा विरणवेदित्ति जइ अहं
निर्गुणा चिरपरिचितेति वा, अनाथेति वा, सीतेति वा स्मरणमात्र-
णिग्गुणा चिरपरिचिदेत्ति वा, अणाहेत्ति वा, सीदेत्ति वा, सुमरणमेत्त-
केणानुगृहीतव्येति ।
एण अणुगहिदव्वेति ।

ल—इमं सन्देशमाकर्ण्य क्षते क्षारमिवाहितम् ।
दशामसह्यां शोकस्य व्यक्तमार्या गमिष्यति ॥ १६ ॥

किमेतावत्यपीति—एवंविध उपालम्भरूपे कर्मणि तु भवत्यास्स्वातन्त्र्यमेव । निरपराधम् अपराधशून्यम् इमं जनं सीतामित्यर्थः । सपदि शीघ्रं हृदयतो मनसः निर्वासयितुं विवासयितुं न युक्तम् । किं पुनः विषयत स्वदेशात् ।

अ०—प्रभविष्णुना आर्या हृदयात् नाम निर्वासिता कथं गृहाद् गृहं नाम, कथं जनपदात् अपि ॥ १५ ॥

प्रभविष्णु—all powerful. निर्वासिता—expelled. जनपद—state.

टी०—प्रभविष्णुना शक्तिशालिना रामेण आर्या भवती हृदयात् चेतसः निर्वासिता निष्कासिता । नामेति विस्मये । गृहात् भवनात् कथं निर्वासिता, गृहं नाम गृहं तावद् दूरे आस्ता कथं जनपदादपि स्वविषयादपि इति लक्ष्मणस्याश्चर्यम् ॥ १५ ॥

टी०—मद्वचनात् मन्मुखेन । सा तपोवनवासिनी तपस्विनी, सीमन्तनिहितेन सीमन्ते केशवेशे 'सीमन्त- केशवेशे' इत्यमरः, निहितेन स्थापितेन अञ्जलिना करयुगलेन विज्ञापयति निवेदयति । निर्गुणा गुणहीना चिरपरिचिता चिरकालं सहवासेनोत्पन्न-विस्रम्भा अनाथा नाथरहिता अरक्षितेति यावत् सीता वसुन्धरोत्पन्नेति हेतुभिः स्मरणमात्रकेनानुगृहीतव्या स्मरणीयेत्यर्थः ।

अ०—क्षते आहितं क्षारम् इव इमं सन्देशम् आकर्ण्य आर्या व्यक्त

सी—अतिमहिते ऽपि स्वमण्डले कथं ते सन्ति, स्त्रियो दुःख-
अदिमहिदे वि सअमंडले कहं तुमं सोत्ति, एत्तिआ दुक्ख-
सहायाः। साम्प्रतं मया विना त्वयैकेनैष चिन्तयितव्यः। त्वं भ्रातुः
सहाया। संपदं मए विणा तए एक्केण एसो चिंतिदव्वो तुमं बादु-
शरीरे सावधानो भवेति।
स्सरीरे सावहाणो होहित्ति।

ल—अनुरूपमेतन्महानुभावतायाः।

सी—वत्स लक्ष्मण ! प्रणमितव्या त्वया मम वचनात् राघव-
वच्छ लक्खण ! पणमिदव्वा तुए मम वअणादो राहव
कुलराजधानी भगवत्ययोध्या। शुश्रूषितव्यः प्रतिमागतो महाराजः।
उलराअधाणी भअवदी अयोज्जा। सुस्सूसिदव्वो पडिमागदो महाराओ।
साधयितव्या श्वश्रूणामाज्ञप्तिः। समाश्वासयितव्याः प्रियंवदा मम
साहिदव्वा अज्जूण आणत्ति। समस्सासिदव्वा पिअबदा मम
प्रियसख्यः। स्मर्तव्या सर्वकालं मन्दभागिनी।
पिअसहीओ। सुमरिदव्वा सव्वकालं मंदभाइणी।

(इति रोदिति)

ल—(सोद्वेगम्)

आर्यां स्वहस्तेन वने विमोक्तुं
श्रोतुञ्च तस्याः परिदेवितानि।

शोकस्य असह्यां दशां गमिष्यति ॥ १६ ॥

क्षत—wound. आहित—applied. क्षार—salt. सन्देश—message. व्यक्त—obviously. असह्य—unbearable. दशा—state (of grief).

टी०—क्षते व्रणे आहितं निहितं क्षारं लवणम् इव इमम् आर्यायाः सन्देशं प्रतिवच. आकर्ण्य निशम्य आर्यो रामभद्रः व्यक्तं स्फुटं शोकस्य सन्तापस्य असह्या दशा परा काष्ठा गमिष्यति यास्यति ॥ १६ ॥

टी०—अतिमहिते धनधान्यसमृद्धेपि स्वमण्डले स्वविषये ते स्त्रीहीनाः कथं केन प्रकारेण सन्ति वसन्ति। स्त्रियो दुःखसहायाः दुःखे विपदि सहाया भवन्ति परिचर्यया साहाय्यमापादयन्ति। जनस्तु केवलं सुखार्थ एव न तु दुःखार्थ.। राघवकुलराजधानी राघवकुलस्य रघुवंशस्य राजधानी राजसिंहासनस्थानम्। प्रतिमागतः प्रतिकृतिरूपेण स्थापितः महाराजः दशरथ.। मृतत्वात्तस्य प्रतिमाक्रमेण स्थापितस्यैव शुश्रूषा प्रकृते जाघटीति। श्वश्रूणाम् आज्ञप्तिराज्ञा साधनीया माननीया। प्रियंवदा मधुरभाषिण्यः प्रियसख्यः समाश्वासयितव्याः सान्त्वयितव्या। सर्वकालं सर्वदा। सोद्वेगं सकष्टम्।

अ०—आर्यां स्वहस्तेन वने विमोक्तुं तस्याः परिदेवितानि श्रोतुं च

सुखेन लङ्कासमरे हतं मा-
मजीवयन्मारुतिरात्तवैरः ॥ १७ ॥
(विलोक्य)
एते रुदन्ति हरिणा हरितं विमुच्य
हंसाश्च शोकविधुराः करुणं रुदन्ति ।
नृत्तं त्यजन्ति शिखिनोऽपि विलोक्य देवीं
तिर्यग्गता वरममी न परं मनुष्याः ॥ १८ ॥

सी—वत्स लक्ष्मण! आसन्नास्तमयः सूर्यः। दूरे चेतो मानुष-
वच्छ लक्खण! आसरणात्थमयो सूरो। दूरे अ इदो माणुस-
सम्पातः। उड्डीनाः पक्षिणः। सञ्चरन्ति श्वापदाः। गच्छ न युक्तं
संपादो। उड्डीणा पक्खिणो। संचरंति सापदा। गच्छ ण जुत्तं
परिलम्बितुम्।
परिलंबिदुम्।

आत्तवैर. मारुतिः लङ्कासमरे सुखेन हतं माम् अजीवयत् ॥ १७ ॥

विमोक्तुम्—to leave. परिदेवित—lamentation. आत्तवैरः—full of enmity. मारुति—the son of marut (wind). सुखेन—comfortably. अजीवयत्—restored to life.

टी०—आर्या देवीं सीता स्वहस्तेन स्वकरेणैव वनेऽरण्ये विमोक्तुं त्यक्तुं तस्याश्च परिदेवितानि क्रन्दितानि श्रोतुमाकर्णितुं च आत्तवैरः बद्धवैरः मारुति हनूमान् लङ्कासमरे लङ्कायुद्धे सुखेन अनायासेन हतं विगतसंज्ञं माम् अजीवयत् सञ्जीवनौषधानयनेन मां सजीवितमकरोत् ॥ १७ ॥

अ०—एते हरिणाः हरितं विमुच्य रुदन्ति। शोकविधुराः हंसाः च करुणं रुदन्ति। शिखिनः अपि देवीं विलोक्य नृत्तं त्यजन्ति। अमी तिर्यग्गताः वरं परं मनुष्या· न ॥ १८ ॥

स०—शोकविधुरा·—शोकेन विधुराः।

हरित—grass. विमुच्य—having given up. रुदन्ति—weep. शोकविधुरा·—perturbed with grief. शिखिन्—peacock. नृत्त—dancing. तिर्यग्गता·—lower animals.

टी०—एते पुरोवर्तिन· हरिणा मृगा हरितं तृणं विमुच्य त्यक्त्वा रुदन्ति विलपन्ति। शोकविधुराः शोकेन मन्युना विधुरा व्याकुला हंसा· कलहंसाश्च करुणं सदैन्यं रुदन्ति अश्रूणि पातयन्ति। शिखिनः मयूरा अपि नृत्तं नृत्यं त्यजन्ति। अमी तिर्यग्गताः तिर्यञ्चः वरं श्रेष्ठाः परं मनुष्या नरा न ॥ १८ ॥

टी०—आसन्नास्तमयः—आसन्न समीपवर्ती अस्तमयोऽस्तगमनं यस्य सः

ल—(अञ्जलिं बध्वा) सर्वपश्चिमोऽयं लक्ष्मणस्य प्रणामाञ्जलिः तत्सावधानं परिगृह्यताम् ।

सी—नित्यावहिता खल्वहम् ।

णिच्चावहिदा खु अहं ।

ल—विज्ञापयामि देवीम्—

आर्यं मित्रं बान्धवान् वा स्मरन्त्या
शोकादात्मा मृत्यवे नोपनेयः ।
इक्ष्वाकूणां सन्ततिर्गर्भसंस्था
सेयं देव्या यत्नतो रक्षणीया ॥ १६ ॥

सी—अप्रतिहतवचनः खलु सौमित्रिः ।

अप्पडिहदवअणो खु सोमित्ती ।

ल—इयमपरा विज्ञापना ।

सी—कान्या ?

का अरणा ?

ल—ज्येष्ठस्य भ्रातुरादेशादानीय विजने वने ।
परित्यक्तासि देवि त्वं दोषमेकं क्षमस्व मे ॥ २० ॥

तादृक् सूर्यः । मनुष्यसम्पातः मनुष्यगमनागमनं च इतोऽस्मात् प्रदेशात् दूरे वर्तते । पक्षिणः वायसादयः उड्डीना डयमाना दृश्यन्त इति शेषः । व्याघ्रादय. हिंस्रा जीवाः सञ्चरन्ति इतस्ततो व्रजन्ति । गच्छ याहि । परिलम्बितुं न युक्तं विलम्बो न कार्यः । सर्वपश्चिम. अन्तिमोयं प्रणामाञ्जलि. । नित्यावहिता—नित्यं सर्वदैव अवहिता दत्तमना ।

अ०—मित्रम् आर्यं बान्धवान् वा स्मरन्त्या शोकात् आत्मा मृत्यवे न उपनेय'; इक्ष्वाकूणां सन्ततिः गर्भसंस्था, सा इयं देव्या यत्नतः रक्षणीया ॥१६॥

टी०—मित्रम् आर्यं रामभद्रं बान्धवान् बन्धुजनान् स्मरन्त्या ध्यायन्त्या त्वया शोकात् मन्युवशात् आत्मा स्वं वपु मृत्यवे न उपनेय शरीरत्यागव्यवसायो न विधेय इत्यर्थः। अत्र हेतुमाह—इक्ष्वाकूणा सन्ततिरपत्यं गर्भसंस्था गर्भे संतिष्ठतीति सा । सा इयं सन्ततिः यत्नात् यत्नेन रक्षणीय। पालयितव्या ॥१६॥

टी०—अप्रतिहतवचन –न प्रतिहतं न निष्फलं गतं वचनं वाक्यं यस्य सः । तथाभूत. खलु सौमित्रिः लक्ष्मणः । विज्ञापना प्रार्थना ।

अ०—देवि ज्येष्ठस्य भ्रातुः आदेशात् विजने वने आनीय परित्यक्ता असि । एकं मे दोषं त्वं क्षमस्व ॥ २० ॥

विजन—desolate. क्षमस्व—forgive.

टी०—देवि भगवति ज्येष्ठस्य अग्रजस्य भ्रातु. सोदरस्य आदेशात् आज्ञया

सी—(ससम्भ्रमम्) **ज्येष्ठवचनानुवर्ती त्वमिति परितोषकाले को**
जेट्ठवअणाणुवत्ति तुमेत्ति परितोसकाले को
दोष आशङ्क्यते ?
दोसो आसंकीअदि ?

ल—(सप्रदक्षिणं प्रणम्य परिक्रामति)

सी—(रोदिति)

ल—(दिशोऽवलोक्य) **भो भो लोकपालाः ! शृण्वन्तु भवन्तः—**

एषा वधूर्दशरथस्य महारथस्य

सी—अतिश्लाघनीयान्यक्षराणि श्रूयन्ते ।
अदि सिलाहणिज्जाइं अक्खराइं सुणीअदि ।

ल—रामाह्वयस्य गृहिणी मधुसूदनस्य ।

सी—कुतो मे तादृशो भागधेयः ?
कुदो मे तादिसो बाहधेओ ?

ल—निर्वासिता पतिगृहात्—

सी—(कर्णौ पिदधाति)

ल—विजने वनेऽस्मिन्
एकाकिनी वसति रक्षत रक्षतैनाम् ॥ २१ ॥

सी—(गर्भं दर्शयति)

विजने जनसञ्चारशून्ये वने अरण्ये आनीय प्रापय्य परित्यक्तासि मुक्तासि । त्वम् एकं मे दोषम् अपराधं परित्यागरूपं क्षमस्व मर्षय ॥ २० ॥

टी०—ससम्भ्रमं स्वोद्वेगम् । ज्येष्ठवचनानुवर्ती ज्येष्ठस्य अग्रजस्य भ्रातुः रामभद्रस्य वचनं वाक्यम् अनुवर्तते अनुसरतीति तादृशस्त्वमिति । परितोषकाले हर्षावसरे को दोष आशङ्क्यते दोषशङ्कैव न जायत इत्यर्थ. ।

अ०—एषा महाराजस्य दशरथस्य वधूः, रामाह्वयस्य मधुसूदनस्य गृहिणी, पतिगृहात् निर्वासिता, एकाकिनी अस्मिन् विजने वने वसति एनां रक्षत ॥ २१ ॥

महारथ—a great warrior. वधू—daughter-in-law. मधुसूदन—The slayer of मधु गृहिणी—consort.

एषा पुरोवर्तिनी महारथस्य युद्धविद्याविशारदस्य दशरथस्य वधू स्नुषा रामाह्वयस्य रामाख्यस्य मधुसूदनस्य हरे गृहिणी पत्नी पतिगृहात् भर्तृभवनात् निर्वासिता निष्कासिता एकाकिनी असहाया विजने विगतजने वने जङ्गले वसति एना रक्षत नूनं त्रायध्वमिति भाव. ॥ २१ ॥

टी—आर्यायाः कृते देव्याः सीताया निमित्तं एनामपि समीपतरवर्तिनीं भगवतीं

ल—एनामपि भगवतीम् आर्यायाः कृते विज्ञापयामि—

जातश्रमां कमलगन्धकृताधिवासैः
काले त्वमप्यनुगृहाण तरङ्गवातैः ।
देवी यदा च सवनाय विगाहते त्वां
भागीरथि ! प्रशमय क्षणमम्बुवेगम् ॥ २२ ॥

ये केचिदत्र मुनयो निवसन्त्यरण्ये
विज्ञापयामि शिरसा प्रणिपत्य तेभ्यः ।
स्त्रीत्युज्झितेत्यशरणेति कुलागतेति
देवी सदा भगवतीत्यनुकम्पनीया ॥ २३ ॥

देवी गङ्गा विज्ञापयामि निवेदयामि ।

अ०—भागीरथि ! जातश्रमां कमलगन्धकृताधिवासैः तरङ्गवातैः काले त्वम् अपि अनुगृहाण । यदा च देवी सवनाय त्वां विगाहते क्षणम् अम्बुवेगं प्रशमय ॥ २२ ॥

स० जातश्रमाम्—जातः श्रमो यस्यास्ताम् । कमलगन्धकृताधिवासैः—कमलाना गन्धः कमलगन्धस्तेन कृत अधिवासो येषु तैः । तरङ्गवातैः तरङ्गाणा वातास्तरङ्गवातास्तैः । अम्बुवेगम्—अम्बुनो वेगः अम्बुवेगस्तम् ।

जातश्रमा—Exhausted. **अधिवास**—fragrance. **अनुगृहाण**—be compassionate. **सवन**—bath. **विगाहते**—plunges. **अम्बुवेग**—rush of water. **प्रशमय**—slacken.

टी० भागीरथि गङ्गे जातश्रमा जात. उत्पन्न. श्रम. क्लमो यस्यास्ता कमलगन्धकृताधिवासैः कमलाना पङ्कजाना गन्धेन सौरभेण कृतो जनितोऽधिवासः परिमलो यैस्तथाविधैस्तरङ्गवातैः वीचिवातैः तरङ्गसंसर्गिभिः पवनैः काले समये त्वमपि अनुगृहाण अनुकम्पय । यदा च देवी सीता सवनाय स्नातुं त्वां विगाहते प्रविशति तदा अम्बुवेगं क्षणं स्तोकं मनागिति यावत् प्रशमय मन्दं कुरु ॥ २२ ॥

अ०—ये केचिद् मुनयः अत्र अरण्ये निवसन्ति तेभ्यः शिरसा प्रणिपत्य विज्ञापयामि, स्त्री इति, उज्झिता इति, अशरणा इति, कुलागता इति भगवती देवी सदा अनुकम्पनीया ॥ २३ ॥

निवसन्ति—reside. **उज्झिता**—forsaken. **अशरणा**—helpless. **कुलागता**—nobly descended.

टी०—ये के चित् अस्माभिरज्ञातनामधेया मुनयः अत्रास्मिन् अरण्ये वने निवसन्ति तेभ्यः मुनिभ्यः शिरसा शीर्षेण प्रणिपत्य प्रह्वीभूय विज्ञापयामि निवेदयामि स्त्रीति अबलेति उज्झितेति परित्यक्तेति अशरणेति निस्सहायेति कुलागतेति कुलीनेत्येभिर्हेतुभि देवी आर्या सीता अनुकम्पनीया अनुगृहीतव्या ॥२३॥

एषोऽञ्जलिर्विरचितो वनदेवतानां
विज्ञापनां क्षणमिमामवधारयन्तु ।
सुप्ता प्रमादवशगा विषमस्थिता वा
यत्नादियं भगवतीभिरवेक्षणीया ॥ २४ ॥
भो भो हिंस्रा भूमिरेषा भवद्भिः
वर्ज्या देशो न प्रवेश्यः परेषाम् ।
मृग्यो मृग्यो विप्रवासे सखीनां
यूयं सख्यो मा क्षणं मुञ्चतैनाम् ॥ २५ ॥
सख्यो नद्यः स्वामिनो लोकपालाः
मातर्गङ्गे भ्रातरः शैलराजाः ।

अ०—वनदेवतानाम् एषः अञ्जलिः विरचितः, इमां विज्ञापनां क्षणम् अवधारयन्तु, भगवतीभिः सुप्ता प्रमादवशगा विषमस्थिता वा इयम् आर्या यत्नात् अवेक्षणीया ॥ २४ ॥

स० वनदेवताना—वनस्य देवताः तासाम् । प्रमादवशगा—प्रमादस्य वशं गच्छतीति सा, विषमस्थिता—विषमे स्थिता ।

बनदेवता—Sylvan deity. **अञ्जलि**—folded hands. **विज्ञापना**—request. **क्षणम्**—for a while. **अवधारयन्तु**—may listen. **सुप्ता**—asleep **प्रमादवशगा**—in swoon. **विषमस्थिता**—in a difficult situation. **अवेक्षणीया**—should be guarded.

टी०—वनदेवताना वनाधिष्ठातृदेवताना पुरत· अग्रे एषः अञ्जलि· संयुतं करयुगलं विरचित· विहितः । इमाम् उदीर्यमाणा विज्ञापना प्रार्थना क्षणं मनाक् अवधारयन्तु अवहितेन चेतसा आकर्णयन्तु । भगवतीभि· आर्याभिर्भवतीभिः शयाना प्रमादवशगा प्रमादस्यानवधानताया वशं गता विषमस्थिता वा विषमे प्रदेशे समये वा स्थिता इयम् आर्या यत्नाद् यत्नेन अवेक्षणीया परिरक्षणीया ॥२४॥

अ०—भो भो हिंस्रा· ! एषा भूमिः भवद्भिः वर्ज्या, परेषां देशः न प्रवेश्यः। मृग्य , मृग्य· ! सखीनां विप्रवासे यूयं सख्य एनां क्षणं मा मुञ्चत ॥ २५ ॥

हिंस्र—wild beast. **वर्ज्या**—must be deserted. **न प्रवेश्यः**—should not be transgressed. **विप्रवास**—absence.

टी०—भोः भो· हिंस्रा हिंसका व्याघ्रादय· एषा भूमि सीतया अध्युषिता भवद्भिः वर्ज्या परिहेया । परेषामन्येषा तपस्विनामित्यर्थः, देशः स्थानं न प्रवेश्यः न प्रवेष्टव्य· । मृग्य· हरिण्य· सखीनाम् आलीनां विप्रवासे विरहे यूयं भवत्य· सख्यः एना जानकीं क्षणं मुहूर्तं मा मुञ्चत न त्यजत ॥ २५ ॥

अ०—सख्यः नद्यः ! स्वामिन· लोकपालाः ! मात· गङ्गे ! भ्रातरः शैलराजाः !

भूयो भूयो याचते लक्ष्मणोऽयं
यत्नाद्रक्ष्या राजपुत्री गतोऽहम् ॥ २६ ॥

(प्रणम्य निष्क्रान्तः)

सी—कथं सत्यमेव मामेकाकिनीं परित्यज्य गतो लक्ष्मणः। (विलोक्य)
कहं सच्चं एव मं एआइणीं परिच्चइअ गदो लक्खणो।
हा धिक्! हा धिक्! अस्तमितः सूर्यः, स्वरेणापि लक्ष्मणो न दृश्यते,
हद्धी हद्धी! अत्थमिदो सूरो, सरेण वि लक्खणो ण दीसई,
हरिणा अपि स्वकमावासमायान्ति, उड्डीनाः पक्षिण, सञ्च-
हरिणा वि सअं आवासं आअन्ति, उड्डीणा पक्खिणो, संच-
रन्ति श्वापदाः, आच्छाद्यतेऽन्धकारेण दृष्टिः, निर्मानुषं महा-
रंति सापदा, आच्छादीअदि अंधआरेण दिट्ठी, णिमाणुसं महा-
रण्यम्, किं करोमि मन्दभाग्या, कीदृशमरण्यैः प्रव्रजाम्येका-
रण्णं, किं करेमि मंदभाआ, कीस अरण्णाहिं पव्वजमि एआ-
किनी,.. ... किन्नु खलु मया पापं कृतम्,
इणी अदेस असलाका ति गा मि मि (?) किंणुखु मए पावं किदं
यस्येदानीमेव विरहं सर्वथाऽनुभवितास्मि। कथं . ... कथं
जस्स दाणिं एव विरहं सव्वहा अणुभाविदोह्मि, कहं देहवितोनलि(?) कहं
तावल्लक्ष्मणनियुक्ता वनदेवता......कथं ते राघवकुलक्रमागता
दाव लक्खणणिउत्ता वणदेवता......कहं दे राहवकुलक्कमागदा
वसिष्ठवाल्मीकिप्रमुखा महाप्रभावा महर्षयस्त इदानीं मां
वसिष्ठवंमीइप्पमुहा महाप्पहावा महेसिणो ते दाणि मं
परित्यज्य
परित्ता अ अभिदेहित्ति (?)

राजपुत्री यत्नाद् रक्ष्या, भूय.भूयः अयं लक्ष्मण. याचते, अहं गतः अस्मि॥२६॥

लोकपालाः—guardians of the quarters. शैलराज—lord of the mountains राजपुत्री–princess. भूयो भूयः–repeatedly. याचते—implores.

टी०—हे सख्यः नद्य· हे स्वामिनः लोकपाला. इन्द्रादय. हे मातः जननि गङ्गे भागीरथि हे भ्रातरः सहोदरा. शैलराजा· शैलानां पर्वताना राजानः मलयाचल प्रभृतयः कुलपर्वताः राजपुत्री भर्तृदारिका यत्नाद् रक्ष्या परित्रातव्या भूयो भूयः पुन. पुन. अयं लक्ष्मण. याचते प्रार्थयते। अहं गतः स्वगृहं प्रति प्रस्थितोस्मि ॥ २६ ॥

टी०—कथमिति—एकाकिनीम् असहायाम्। अस्तमितोऽस्तं गतः सूर्यः। आवासम् वासस्थानम्।

(इति मोहं गच्छति)

(ततः प्रविशति वाल्मीकिः)

वा—(ससम्भ्रमम्)

आकर्ण्य जह्नुतनयां समुपागतेभ्यः
सन्ध्याभिषेकविधये मुनिदारकेभ्यः।
एकाकिनीमशरणां रुदतीमरण्ये
गर्भातुरां स्त्रियमतित्वरयागतोऽस्मि ॥ २७ ॥

तद्यावत्तामेवान्वेषयामि।

(अन्वेषं नाटयति)

सी—(प्रत्यागम्य) क एष मां वीक्षते। (विचिन्त्य) न कोऽपि,
को एस मं विक्खइ। ण कोवि,
आज्ञप्तिकरलक्ष्मणविज्ञप्त्या अनुचरन्ती भगवती भागीरथी
आणत्तिकरलक्खणविसण्णत्तिआ अणिचरित्ति भअवई भाईरई
तरङ्गैर्मामनुगृह्णाति।
तरंगाए मामणुगह्णादि।

वा—अयमन्धकारसंरुद्धतया दृष्टिसञ्चारस्य न दृश्यते, अतः शब्दापयिष्ये। अयमहं भोः।

अ०—सन्ध्याभिषेकविधये जह्नुतनयां समुपागतेभ्यः मुनिदारकेभ्यः एकाकिनीम् अशरणाम् अरण्ये रुदतीं गर्भातुरां स्त्रियम् आकर्ण्य अतित्वरया आगतः अस्मि ॥ २७ ॥

स०—सन्ध्याभिषेकविधये—सन्ध्यायाम् अभिषेकः सन्ध्याभिषेक तस्य यो विधिस्तस्मै। मुनिदारकेभ्य.—मुनीना दारकास्तेभ्यः। जह्नुतनयाम्—जह्नोः तनया ताम्

अभिषेक—bath. विधि—act सन्ध्याभिषेकविधये—for the evening bath. मुनिदारक—hermit-boy. अशरणा—helpless. गर्भातुरा—Afflicted with pregnancy. आकर्ण्य—having heard. अतित्वरया—hastily.

टी०—सन्ध्याभिषेकविधये सन्ध्यायां सायंसमये योऽभिषेकः स्नानं तस्य यो विधिराचरणं तस्मै जह्नुतनया जह्नुकन्या गङ्गा समुपागतेभ्यः प्राप्तेभ्यः मुनिदारकेभ्यः ऋषिपुत्रेभ्य. एकाकिनीं निस्सहायाम् अशरणाम् अनाथा रुदतीं विलपन्तीं गर्भातुरा कठोरगर्भतया प्राप्तभारवेदना स्त्रियम् आकर्ण्य श्रुत्वा तस्याः क्रन्दनं निशम्य अतित्वरया शीघ्रम् आगतोऽस्मि प्राप्तोऽस्मि ॥ २७ ॥

टी०—प्रत्यागम्य संज्ञामुपेत्य। वीक्षते अवलोकयति। आज्ञप्तिकरलक्ष्मणविज्ञप्त्या आज्ञप्तिकरः प्रार्थनाकरो यो लक्ष्मणः तस्य विज्ञप्ति. प्रार्थना तया अनु-

सी—(सहर्षम्) वत्स लक्ष्मण ! प्रतिनिवृत्तोऽसि ?
वच्छ लक्खण ! पडिणिउत्तोसि ?
वा—नाहं लक्ष्मणः ।
सी—(अवकुण्ठं नाटयति) अत्याहितम् ! अन्य एष को वा परपुरुषः ।
अच्चाहिदं, अण्णो एसो को वा परपुरुसो,
कथमिदानीं वारयिष्यामि महाहितम् ? (विचिन्त्य) एवम्—
कहं दाणि वारइस्सं महादिदं । एव्वम्—
स्त्री अहमेकाकिनी च ।
इत्थिआहं एआइणी अ ।
वा—एष स्थितोऽस्मि । वत्से, तवाप्यलं परपुरुषशङ्कया, दिवसावसानसवनाय भागीरथीं समुपास्य प्रतिनिवृत्तेभ्यो मुनिदारकेभ्यस्त्वद्वृत्तान्तमुपलभ्य तपोधनोऽहं त्वामेवाभ्युपपत्तुमुपागतः । पृच्छामि चात्रभवतीम्—
धर्मेण जितसङ्ग्रामे रामे शासति मेदिनीम् ।
कथ्यतां कथ्यतां वत्से विपदेषा कुतस्तव ॥ २८ ॥
सी—तत एव पूर्णचन्द्रान्मेऽशनिपातः ।
तदो एव्व पुण्णचंदादो मे असणिपादो ।
वा—कामं रामादेव हि विपत्तिमुपागता ?

चरन्ती अनुगच्छन्ती भागीरथी तरङ्गैः वीचिभिः माम् अनुगृह्णाति अनुकम्पयति । अन्धकारसंरुद्धतया अन्धकारेण तमसा संरुद्धतयाऽऽवृतत्वात् , दृष्टिसञ्चारस्य दृष्टिप्रसरस्य । प्रतिनिवृत्तोसि प्रत्यागतोसि ॥

अवकुण्ठं वस्त्रेण मुखस्यावरणं नाटयति अभिनयति । अत्याहितं महान् अनर्थ आपतितः । परपुरुषशङ्कया अपरिचितजनभयेन । दिवसावसानसवनाय सायन्तनाभिषेकाय भागीरथीं समुपास्यावगाह्येत्यर्थः । अभिषेकानन्तरमिति यावत्, वृत्तान्तमुपलभ्य त्वद्वृत्तमधिगम्य तपोधनः तपस्वी अहं त्वाम् एव अभ्युपपत्तुं तवैव साहाय्याय उपागतः प्राप्तः । अत्रभवतीम् आर्याम् ।

अ०—जितसंग्रामे रामे धर्मेण मेदिनीं शासति वत्से कथ्यतां कथ्यतां तव एषा विपत् कुतः ॥ २८ ॥

स०—जितसंग्रामे–जितः संग्रामो येन स जितसंग्रामस्तस्मिन् ।

संग्राम—war. मेदिनी—earth. विपत्—calamity.

जितसंग्रामे जितः संग्रामः लङ्कासमरः येन स जितसंग्रामस्तस्मिन् रामे मेदिनीम् अवनीं शासति पालयति सति वत्से कथ्यताम् उच्यतां तव एषा विपत् दुःखं कुतः ॥ २८ ॥

सी—अथ किम्।
अह इं ।

वा—यदि त्वं वर्णाश्रमव्यवस्थाभूतेन महाराजेन निर्वासितासि तत् स्वस्ति भवत्यै, गच्छाम्यहम्। (परिक्रामति)

सी—अथ विज्ञापयामि।
अह विण्णवेमि।

वा—कथय।

सी—यदि रघुवरेण निर्वासितेति भवता नानुकम्पनीया, एषा पुनर्गर्भगता रघुसगरदिलीपदशरथप्रभृतीनां तादृशानां सन्ततिरितीदानीं प्रतिपालनीया।
जइ रहुवरेण णिव्वासिदेत्ति भअदा णाणुकंपणीआ, एसा उण गब्भगदा रहुसअरदिलीपदसरहपहुदीणं ताइसीणं संतदित्ति दाणिं पडिपालणीया ।

वा—(प्रतिनिवृत्य) कथमिक्ष्वाकुवंशमुदाहरति, तदनुयोक्ष्ये। वत्से, किञ्च दशरथस्य वधूः ?

सी—यद् भवान् आज्ञापयति।
जं भअवं आणवेदि ।

वा—किञ्च विदेहाधिपतेर्जनकस्य दुहिता ?

सी—अथ किम्।
अह इं।

वा—किञ्च सीता ?

सी—नहि सीता, भगवन् मन्दभागिनी।
णहि सीदा, भअवं मंदभाइणी।

वा—हा हतोऽस्मि मन्दभाग्यः। किंकृतोऽयमत्रभवत्याः प्रासादतलादधोऽवतारः ?

सी—(लज्जा नाटयति)

टी०—पूर्णचन्द्रात् पूर्णिमेन्दोः। अशनिपातः वज्रपातः वर्णाश्रमव्यवस्थाभूतेन वर्णाश्रममर्यादावतारेण महाराजेन रामेण निर्वासितासि तदा स्वस्ति भवत्यै, रामदण्डिताया त्वयि नाहं साहाय्यं सम्पादयितुं क्षमः।

टी०—यदि रघुवरेण रामेण निर्वासिता निष्कासितास्मीति न अनुकम्पनीया नानुगृहीतव्या, एषा पुनः गर्भगता गर्भस्था रघुसगरदिलीपदशरथप्रभृतीना तादृशानां सन्ततिरपत्यमिति इदानीं प्रतिपालनीया रक्षणीया।

टी०—विदेहाधिपतेः विदेहानाम् अधिपतिः तस्य। प्रासादतलादधोवतारः

वा—कथं लज्जते ! भवतु, योगचक्षुषाहमवलोकयामि । (ध्यानमभिनीय) वत्से ! जनापवादभीरुणा रामेण केवलं परित्यक्ता, न तु हृदयेन । निरपराधा त्वमस्माभिरपरित्याज्यैव । एह्याश्रमपदं गच्छावः ।

सी—को नु त्वम् ?
को णु तुम ?

वा—श्रूयताम्—
सोऽहं चिरन्तनसखा जनकस्य राज्ञ-
स्तातस्य ते दशरथस्य च बालमित्रम् ।
वाल्मीकिरस्मि विसृजान्यजनाभिशङ्कां
नान्यस्तवायमबले श्वशुरः पिता च ॥ २६ ॥

सी—भगवन् वन्दे
भअवं वंदामि

वा—वीरप्रसवा भव, भर्तुश्च पुनर्दर्शनमाप्नुहि ।

सी—त्वं लोकस्य वाल्मीकिः, मम पुनस्तात एव, तद्गच्छ स्वमाश्रमपदम् । (गङ्गामवलोक्याञ्जलिं बध्वा) भगवति भागीरथि !
तुमं लोअस्स वम्मीई, मम उण तादो एव्व, ता गच्छ सयंअस्समपअं । भअवइ भाईरइ !

सुखस्थानात् निपतनम् । योगचक्षुषा दिव्यदृष्ट्या अवलोकयामि पश्यामि । जनापवादभीरुणा लोकनिन्दाभीतेन रामेण केवलं शरीरेणेत्यर्थः । परित्यक्ता न तु हृदयेन, मनसा तु न परित्यक्ता ।

अ०—स. अहं ते तातस्य राज्ञ. जनकस्य चिरन्तनसखा, दशरथस्य च बालमित्र वाल्मीकिः अस्मि, अन्यजनाभिशङ्कां विसृज । अबले ! अयं तव अन्य. न, तव श्वशुरः पिता च ॥ २६ ॥

स०—चिरन्तनसखा—चिरन्तनश्चासौ सखा चिरन्तनसखा । अन्यजनाभिशङ्काम्—अन्यस्य जनस्य अभिशङ्का अन्यजनाभिशङ्का ताम् ।

चिरन्तनसखा—old friend. अभिशङ्का—fear, suspicion.

टी०—सोऽहं ते तातस्य पितुः राज्ञः नृपस्य जनकस्य चिरन्तनसखा पुराणं मित्रं दशरथस्य च बालमित्रं शैशवे सुहृत् वाल्मीकिरस्मि, वाल्मीकिरिति मे नाम । अन्यजनाभिशङ्काम् अविश्वसनीयप्राकृतजनशङ्काम् विसृज त्यज । अबले अयं तव अन्यो न इतरो न, अहं तव श्वशुरः पिता च ॥ २६ ॥

टी०—वन्दे प्रणमामि । वीरप्रसवा वीरः प्रसवोऽपत्यं यस्याः सा तादृशीति । लोकस्य इतरस्य जनस्य वाल्मीकिः मम पुनः तातः पिता । तत् त्वं निजं निवासस्थानं गच्छ । भागीरथि गङ्गे यत्राहं सुखेन गर्भम् अभिनिर्वर्तयामि

यद्यहं सुखेन गर्भमभिनिर्वर्तयामि तदा तव दिने दिने
जइ अहं सोत्थिणा गब्भं अभिणिउत्तोमि तदा तव दिणे दिणे
सुष्ठु ग्रथितया कुन्दमालयोपहारं करिष्यामि ।
सुष्ठु उच्छाए कुंदमालाए उवहारं करइस्सम् ।

वा—अत्यन्तदुःखसञ्चारोऽयं मार्गः, विशेषतस्त्वां प्रति, तद्यथा यथा मार्गमादेशयामि तथा तथा समागन्तव्यम् ।

एतस्मिन् कुशकण्टके लघुतरं पादौ निधत्स्वाग्रतः
शाखेयं विनता नमस्व शनकैर्गर्त्तो महान् वामतः ।
हस्तेनामृश तेन दक्षिणगतं स्थाणुं समं साम्प्रतं
पुण्येऽस्मिन् कमलाकरे चरणयोर्निर्वर्त्यतां क्षालनम् ॥ ३० ॥

सी—(यथोक्तं परिक्रामति)

वा—(निर्दिश्य)

संपादयामि तदा दिने दिने प्रत्यहं सुष्ठु ग्रथितया कुन्दमालया कुन्दकुसुमस्रजा उपहारं करोमि पूजा विधास्ये ।

अत्यन्तेति । अत्यन्तं दु.खेन कष्टेन सञ्चारो गतागतं यत्र तथाभूत मार्ग. पन्था विशेषतस्त्वा प्रति स्त्रीत्वात् तत्रापि राजदारत्वात्, तद् यथा येन येन प्रकारेण मार्गम् आदेशयामि दर्शयामि तथा तथा तेन तेन प्रकारेण समागन्तव्यम् ।

अ०—एतस्मिन् कुशकण्टके लघुतरम् अग्रत. पादौ निधत्स्व । इयं शाखा विनता, शनकैः नमस्व, वामतः महान् गर्तः तेन दक्षिणगतं स्थाणुं हस्तेन आमृश, साम्प्रतम् अस्मिन् पुण्ये कमलाकरे चरणयोः क्षालनं निर्वर्त्यताम् ॥ ३० ॥

स०—कुशकण्टके—कुशाना कण्टकाः यस्मिन् तस्मिन् । कमलाकरे—कमलानाम् आकरः कमलाकरस्तस्मिन् ।

लघुतरम्—lightly. **निधत्स्व**—plant. **शाखा**—bough. **विनता**—drooping. **शनकै.**—gently. **गर्त**—hollow. **नमस्व**—bend down. **स्थाणु**—post. **आमृश**—take hold of. **पुण्य**—sacred. **कमलाकर**—pond. **क्षालन**—wash.

टी०—एतस्मिन् पुरोवर्तिनि कुशकण्टके कुशाना दर्भाणा कण्टका यस्मिन् तथाभूते पथीति शेष । लघुतरं शीघ्रतरम् अग्रतः पुरत पादौ चरणौ निधत्स्व स्थापय । इयं शाखा विनता विशेषेण नतास्ति, अत. शनकैः मन्दं नमस्व प्रह्वीभव, वामत. वामे भागे महान् गर्त., तेन कारणेन दक्षिणगतं दक्षिणे भागे स्थितं स्थाणुं शुष्कं वृक्षं हस्तेन करेण आमृश स्पृश । साम्प्रतम् अधुना पुण्ये पवित्रे कमलाकरे सरसि चरणयो. क्षालनं धावनं निर्वर्त्यताम् विधीयताम् ॥३०॥

इक्ष्वाकूणाञ्च सर्वेषां क्रियाः पुंसवनादयः ।
अस्माभिरेव पच्यन्ते मा शुचो गर्भमात्मनः ॥ ३१ ॥
कौसल्यापादशुश्रूषासौख्यं वृद्धासु लप्स्यसे ।
पश्य सख्यो भगिन्यश्च तवैता मुनिकन्यकाः ॥ ३२ ॥

(इति निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः ।

अ०—सर्वेषाम् इक्ष्वाकूणा पुंसवनादयः क्रिया. अस्माभिः एव पच्यन्ते। आत्मनः गर्भं मा शुचः ॥ ३१ ॥

क्रिया.—Ceremonies. **मा शुचः**—do not be anxious. **आत्मनः गर्भम्**—about your pregnancy.

टी०—इक्ष्वाकूणाम् इक्ष्वाकुवंश्याना सर्वेषा राज्ञा पुंसवनादय. क्रिया गर्भाधानादिका संस्कारा अस्माभि· एव पच्यन्ते क्रियन्ते, अतः आत्मन· गर्भं मा शुच आत्मन गर्भविषये चिन्ता न कुरु, सर्वेऽपि पुंसवनादय. संस्कारा भविष्यन्तीत्यत्र विषये शोको न कार्य ॥ ३१ ॥

अ०—कौसल्यापादशुश्रूषासौख्यं वृद्धासु लप्स्यसे। एता मुनिकन्यकाः तव सख्यः भगिन्य च पश्य ॥ ३२ ॥

स०—कौसल्यापादशुश्रूषासौख्यम्—कौसल्याया· पादौ कौसल्यापादौ तयो· याः शुश्रूषा सा कौसल्यापादशुश्रूषा तया यत् सौख्यं (सुखस्य भावः) तत् । मुनिकन्यका —मुनीना कन्यका· ता· ।

शुश्रूषा—service. **सौख्यं**—pleasure. **मुनिकन्यकाः**—hermit-girls.

टी०—कौसल्याया राममातुः पादयोश्चरणयोर्या शुश्रूषा सेवा तया यत् सौख्यमानन्दस्तत् वृद्धासु तापसीषु लप्स्यसे प्राप्स्यसि । एता मुनिकन्यका ऋषिदारिका· तव सख्य· वयस्या भगिन्यश्च स्वसारश्चेति पश्य ॥ ३२ ॥

टी०—इति निष्क्रान्ताः सर्वे । तदुक्तं दशरूपके—एकाहाचरितैकार्थमित्थमासन्ननायकं। पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः ॥ भरतेऽपि ' रङ्गं तु ये प्रविष्टाः सर्वेषा भवति तत्र निष्काम. । बीजार्थयुक्तमुक्तं कृत्वा कार्यं यथार्थरसम् ॥

अङ्कलक्षणन्तु तत्रैव यथा ।

अङ्क इति रूढिशब्दो भावैः रसैश्च रोहयत्यर्थान् ।
नानाविधानयुक्तो यस्मात्तस्माद् भवेदङ्कः ॥
यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः ।
किंचिदवलग्नबिन्दुः सोऽङ्क इति सदावगन्तव्यः ॥
ये नायका निगदितास्तेषा प्रत्यक्षचरितसंयोगः ।
नानावस्थान्तरितः कार्यस्त्वङ्को विकृष्टस्तु ॥ इति ॥

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशतो द्वे मुनिकन्यके)

प्रथमा—**हला वेदवति ! दिष्ट्या वर्द्धसे, सीतायास्तव प्रियसख्या**
हला वेदवदि ! दिट्ठिआ वड्ढसि, सीदाए तव पिअसहीए
रामश्यामौ द्वौ पुत्रकौ जातौ ।
रामच्चामा दुवे पुत्तआ जाआ ।

वेदवती—**प्रियं मे प्रियं मे । किन्नामधेयौ ?**
पिअं मे पिअं मे । किंणामहेआ ?

प्र—**ज्येष्ठ इदानीं भगवता कुश इति शब्दापितो द्वितीयो लव इति ।**
जेठ्ठो दाणिं भअवदा कुसेत्ति सद्दाविदो दुदिओ लवोत्ति ।

वे—**किं समर्थौ पथि परिभ्रमितुम् ?**
किं समत्ता पहि परिब्भमिदुम् ?

प्र—**किं समर्थाविति भण्यते**—
किं समत्थत्ति भणिअदि—

धावतो हरिणकैर्यथा प्रतिमल्लौ किशोरसिंहानाम् ।
धावंति हरिणएहिं जह पडिमल्ला किसोरसीहाणं ।

टी०—अत्र द्वितीयाङ्के कवि सीताविवासनान्तरवृत्तान्तसूचनायार्थोपक्षेपकं प्रवेशकमारभते तत इति । प्रवेशकलक्षणं यथा ।

'वृत्तवर्तिष्यमाणाना कथाशाना निदर्शकः ।
प्रवेशकस्तु नाट्यादौ नीचपात्रप्रयोजित. ॥

'परिजनकथानुबन्ध. प्रवेशको नाम विज्ञेय.' हलेति सख्या आमन्त्रणम् । दिष्ट्या वर्द्धसे दिष्ट्या इत्येतद् हर्षवाचकमव्ययपदम् । रामश्यामौ राम इव श्यामौ । अत्र श्यामशब्दः सौन्दर्यविशेषे रूढः न तु कृष्णशब्दापरपर्यायवाचकः । किं नामधेयौ किं नामधेयं संज्ञा ययो. तौ । शब्दापितः आकारित. । समर्थौ शक्तौ पथि मार्गे परिभ्रमितुं प्रचलितुम् ।

अ०—यथा हरिणकैः धावतः, किशोरसिंहानां प्रतिमल्लौ तथा युगलौ प्रियदर्शनौ तपस्विनीहृदयं कर्षतः ॥ १ ॥

स०—किशोरसिंहानाम्—किशोराश्च ते सिंहाश्च ते किशोरसिंहास्तेषाम् । प्रियदर्शनौ—प्रियं दर्शनं ययोस्तौ । तपस्विनीहृदयम्—तपस्विनीना हृदयम् ।

किशोरसिंह—lion-cub. **प्रतिमल्ल**—rival. **युगल**—twins. **तपस्विनी**—ascetic lady.

---

१ मूले तु 'प्रतिमल्ला' इति पाठः । स तु न समीचीनः ।

तथा च तपस्विनीहृदयं हरतः प्रियदर्शनौ युगलौ ॥ १ ॥
तह अ तपस्सिणिहिअअं हरंति पिअदंसणा जुअला ॥
मुनिजनस्याङ्कादङ्कादतिसञ्चरतः । साम्प्रतं वाल्मीकिविरचितं
मुणिजणस्स अंकादो अंकादो अदि संचरंति । संपदं वंमीइविरइदं
रामायणं पठतः ।
रामाअण पडति ।
वे—इमं वृत्तान्तं श्रुत्वा एतदर्थं सीता कृतपुण्येति तर्कयामि ।......
इमं उत्ततं सुणिअ एदावत्थं सीदा किदपुण्णेत्ति तक्केमि । अहं
.... **स्निग्धमन्योन्यम् ।**
इंहवहंति सीदासोवोअणिवत्थं आओ सिणिद्धं अण्णोण्णं (?) ।
प्र—सम्भरणीयं खल्वेतत् । को नैमिशवृत्तान्तः ?
संभरणीअं खु एदं । को णेमिसउत्ततो ?
वे—सम्भृत एव यज्ञसम्भारो महाराजस्य, निमन्त्रितः सान्तर्वासि-
संभरिदो एव्व जण्णसंभारो महाराअस्स, णिमंतिदो सातरवासि-
नीकस्तपोधनानां सम्पातः ।
णीओ तपोधणाणं संपादो ।
प्र—किं निमन्त्रितो भगवान् वाल्मीकिः ?
किं णिमंतिदो भअवं वंमीई ?

टी०—यथा यया रीत्या हरिणकैः मृगशावकैः सह धावतः, किशोरसिंहाना किशोराश्च ते सिंहाश्च ते किशोरसिंहास्तेषा प्रतिमल्लौ प्रतिभटौ तथा युगलौ यमजौ प्रियदर्शनौ प्रियं मधुरं दर्शनं ययोस्तौ तपस्विनीना तापसीना हृदयं चेत हरतः आकर्षयतः ॥ १ ॥

टी०—मुनिजनस्य तपस्विजनस्य अङ्कादङ्कं प्रत्यङ्कम् अतिसञ्चरतः गच्छतः । वाल्मीकिविरचितं वाल्मीकिना मुनिना विरचितं निर्मितं रामायणं रामचरित्रवर्णनात्मकं महाकाव्यं पठतः । इमं वृत्तान्तम् उदन्तम् आकर्ण्य श्रुत्वा एतदर्थं प्रियदर्शनादिगुणोपेतपुत्रद्वयकृते सीता कृतपुण्या कृतं पुण्यं यया सा तथाभूता इति तर्कयामि इति मन्ये ।

टी०—सम्भरणीयं सम्यक् भरणीयं सम्यक् पर्याप्तमित्यर्थः । दुःखनिवृत्तौ अयं सीतायाः पुण्योदयः अलम् । नैमिशवृत्तान्तः नैमिशारण्यविषयकः प्रश्नः । सम्भृतः एकत्रीकृतः यज्ञसम्भारः यज्ञोपकरणादिकं वस्तुजातम् । निमन्त्रित आहूतः सान्तर्वासनीकः अन्तर्वासिनीभिः गृहिणीभिः सहितः तपोधनाना मुनीना सम्पातः समूहः ।

टी०—अत्रैव अस्मिन्नेव वाल्मीकितपोवने सालपादपच्छायाया सालश्चासौ

वे—श्रुतं वाल्मीकितपोवनमप्यागतो रामदूत इति । कुत्रेदानीं
सुदं वमीइतपोवणं वि आअदो रामदूदोत्ति । कहिं दाणिं
सीता प्रेक्षितव्या ?
सीदा पेखिदव्वा ?

प्र—अत्रैव सालपादपच्छायायामुपविशति, कथमतिवाहयामीति ?
एथ एव्व सालपाअवच्छाआए उपविसदि, कहं अदिवाहेमित्ति ?

(इति निष्क्रान्ते)

प्रवेशकः

(ततः प्रविशति चिन्ता नाटयन्ती भूम्यासनोपविष्टा सीता)

सी—(निःश्वस्य) अहो अविश्वसनीयता प्रकृतिनिष्ठुरभावानां पुरुष
अहो अविस्ससणीअदा पइदिणिठ्ठुरभावाण पुरुस-
हृदयाणाम् । यत्स्तम्भप्रलिखितव्यस्नेहानां दम्पतीनां प्रसङ्गे उमा
हिअआणं । जं तंभप्पलिहिदव्वणेआणं दंपदीणं पसंगे उमा-
महेश्वराविति स्वर्गे पृथिव्यां सीतारामाविति अतिप्रसिद्धिमा-
महेस्सारोत्ति सग्गे पुडवीए सीदारामोत्ति अदिप्पसिद्धिं आरो-
रोप्य निरपराधा एतां गतिमत्यन्तमनुभावितास्मि । अथ कीदृ
विअ णिरवराधा एदं गइं अत्तंतमणुभाविदोम्हि । अथ कीस
गहमार्यपुत्रं निन्दामि । एवं पुरार्यपुत्रेण... ... ...
अहं अअउत्तं णिंदामि । एव्व पुरा अअउत्तेण एअस्स वअणं आग-
.... साम्प्रतमनेकयोजनान्तरिते
धाधणं सुअमेत्तएण अदरीदमरणुत्ति, संपदं अणेअजोअणांतरिदे

पादपश्चेति स सालपादपस्तस्य छाया तस्या सर्जतरोरनातपे प्रदेशे उपविशति निषीदति ।

टी०—**अहो** इति अहो इत्याश्चर्ये । अविश्वसनीयता विश्वसनीयस्य भाव. विश्वसनीयता न विश्वसनीयता अविश्वसनीयता विश्वासायोग्यतेत्यर्थः । प्रकृतिनिष्ठुरभावाना प्रकृत्या स्वभावेन निष्ठुर. क्रूर. भाव. आशयः येषा तेषाम् । पुरुषहृदयाणा मानवान्तःकरणानाम् । स्तम्भप्रलिखितव्यस्नेहाना स्तम्भेषु प्रलिखितव्य प्रकर्षेण लिखितुं योग्य स्नेहो येषा तेषा दम्पतीना जायापतीना प्रसङ्गे स्मरणसमये गणनाप्रस्तावे इति यावत् । उमामहेश्वरौ उमा पार्वती महेश्वरः शिव, उमा च महेश्वरश्च तौ उमामहेश्वरौ, चार्थे द्वन्द्वः । इति स्वर्गे स्वर्लोके । पृथिव्यां भूमौ सीतारामौ सीता च रामश्चेति तौ । अतिप्रसिद्धिम् अतिख्यातिम् आरोप्य निरपराधा अपराधरहिता एता गतिमवस्थाम् अत्यन्तम् अनुभावितास्मि नीतास्मि । अथ कीदृगहम् कीदृशी अहम् आर्यपुत्रं निन्दामि । साम्प्रतम् इदानीम् अनेक-

·········· अकारणं··· पूर्णदुःखकारिणी जाता । तेन सह
····सणं अकारण मारिसि पुरगादुक्कारिणी जादा । तेण सह
दृष्टश्चन्द्रोदयः, तेन सह श्रुतः कोकिलकलप्रलापः, तेन सहानु-
दिठ्ठो चंदोदओ, तेण सह सुदो कोकिलकलप्पलाओ, तेण सह अणु-
भूतो मलयमारुतस्पर्शः, साम्प्रतं मयैकाकिन्या दृष्टश्च श्रुतश्चा-
भूदो मलअमारुदप्परिसो, संपदं मए एआइणीए दिठ्ठो अ सुदो अ
नुभूतश्च । प्राणान् परित्यजामीति सर्वथा अलीकं मादृशीभिः
अणुभूदो अ । पाणं परिच्चआमित्ति सव्वहा अलिअं मारिसीहिं
स्त्रीभिः । पुराहं स्वामिवल्लभतया सकलमिथिलाजनप्रार्थनीया
इत्थिआहिं । पुरा अहं सामिवल्लहदाए सअलमिहिलाजणपत्थणिज्जा
भूत्वा (?) अद्य पुनरेतदवस्थं शोचनीया संवृत्तेति परित्याग-
भमिअ अज्ज उण एदावत्थं सोअणीआ संवुत्तेत्ति परिच्चाय-
दुःखतो लज्जैव मामधिकतरं बाधते । साम्प्रतं पुनर्जातौ दारकौ
दुक्खादो, लज्जा एव म अहिअदरं बाहेदि । संपदं उण जादा दारा
संवर्धितौ च । सादर इदानी भगवान् वाल्मीकिः । न युक्तं
संवड्ढिआ अ । सादरो दाणिं भअवं वंमीई । ण जुत्तं
ममैतेन तपोवनवासविरुद्धेन दीर्घनिश्वासेन कालमतिवाह-
मम एदिणा तपोवणवासीविरुद्धेण दीहणिस्सासेण कालं अदिवा-
यितुम् । एतदेव मरणव्यवसायस्य प्रतिबन्धो यन्मया प्रिय-
हिदुं । एत्त एव्व मरणव्ववसाअस्स पडिबधो जं मए पिअ-

योजनान्तरिते अनेकैर्योजनैरन्तरिते व्यवहिते अकारणम् अहेतुकम् पूर्णदुःखकारिणी पर्याप्तदु खदा जाता । तेन आर्यपुत्रेण सह दृष्ट निरीक्षित. चन्द्रोदय. चन्द्रस्य शशिनः उदय. । कोकिलकलप्रलाप.—कोकिलाना पिकाना कलप्रलाप. कलोऽव्यक्तमधुर. प्रलाप रव. । अनुभूत. मलयमारुतस्पर्श मलयमारुतस्य दक्षिण वातस्य स्पर्श । साम्प्रतम् अधुना मया एकाकिन्या दृष्टश्च श्रुतश्च अनुभूतश्च । प्राणान् परित्यजामि शरीरत्यागं करोमि इति सर्वथा सर्वप्रकारेण अलीकम् असम्भाव्यं मादृशीभि कुलीनाभि स्त्रीभि । नाहं शोकविधुरा प्राणान् त्यजामि विपदि शरीरत्यागस्याकुलीनत्वादिति । पुराहं स्वामिवल्लभतया स्वामिनः पत्यु. वल्लभतया प्रियतया सकलमिथिलाजनप्रार्थनीया सकलस्य समग्रस्य मिथिला-जनस्य मिथिलावास्तव्यस्य जनसमुदायस्य प्रार्थनीया भूत्वा अद्य साम्प्रतं पुनरेत-दवस्थं शोचनीया संवृत्ता जातेतिकारणात् परित्यागदु खतः परित्यागस्य वनवास रूपस्य दु.खत· कष्टात् लज्जा व्रीडा एव माम् अधिकतरम् अतिमात्रं बाधते व्यथयति । त्यागदु.खाल्लज्जादुःखं दुस्सहम् इत्यर्थः । जातौ उत्पन्नौ दारकौ पुत्रौ ।

सखी वेदवती न सन्दिष्टा नाप्युपनिमन्त्रिता च ।
सही वेदवदी ण संदिट्ठा णवि उपणिमंतिदाश्र ।

(ततः प्रविशति वेदवती)

वे—कृत एव तपोधनानां वन्दनोपचारः अतिथिजनसमुचितः
किदो एव्व तपोधणाण वंदणुव्वश्रारो अदिहिजणसमुइदो
समुदाचारश्च । तदित एव सालपादपं गत्वा प्रियसखीं सम्भा-
समुदाश्रारो श्र । ता इदो एव्व सालपादपं गदुश्र पिश्रसहिं संभाव-
वयिष्यामि । (परिक्रम्य विलोक्य च) एषा विदेहराजतनया निदाघ
इस्सं । एसा विदेहराश्रतणश्रा णिदाह-
मासलतेव परिक्षामपाण्डुरयावस्थया हृदयमाक्षिपन्ती साल-
मासलश्रा विश्र परिक्खामपण्डुराए अवत्थाए हिअश्र अक्खिवंती साल-
मूलमलङ्करोति । तदुपसर्पामि । (उपसृत्य) एषा चिन्तापरवशे-
मूलमलंकरेदि । ता उवसप्पिस्सं । एसा चिंतापरवसा
वाधोमुखी लम्बालकाच्छादितनयना दीनप्रेक्षिता । शब्दाप-
विश्र श्रहोमुही लंबालश्राच्छाइश्रणश्रणा दीणपेक्खिदा । सद्दाव-
यिष्यामि । सखि वैदेहि ! (इति शब्दापयति)
इस्सं । सहि वैदेहि !

सी—(ससम्भ्रमं विलोक्य) प्रियं मे प्रियं मे । सम्प्राप्ता प्रियसखि वेद-
पिश्रं मे पिश्र मे । संपत्ता पिश्रसही वेद-

संवर्धितौ पोषितौ । तपोवनवासविरुद्धेन–तपोवने वास तपोवनवासस्तस्य विरुद्धस्तेन दीर्घनिःश्वासेन चिरकालजीवितेन कालं समयम् अतिवाहयितुं यापयितुम् । एतदेव अयमेव मरणव्यवसायस्य मरणनिश्चयस्य प्रतिबन्धः प्रतिरोधः यन्मया प्रियसखी प्रियवयस्या वेदवती न सन्दिष्टा सन्देशं न प्रापिता नापि उपनिमन्त्रिता समाहूता ।

टी०—तपोधनानां मुनिजनानां वन्दनोपचारः प्रणामरूप आचारः अतिथिजनसमुचितः अतिथिजनस्य प्राघुणिकवर्गस्य समुचितः योग्योऽनुरूप इति यावत् । समुदाचारः सद्व्यवहारः तदित एव अस्मादेव स्थानात् सालपादपं सालवृक्षं गत्वा प्रियसखीं प्रियवयस्या सीतां सम्भावयिष्यामि सत्करिष्यामि । विदेहराजतनया—विदेहराजस्य जनकस्य तनया पुत्री निदाघमासलतेव निदाघमासयोः ग्रीष्ममासयोः ज्येष्ठाषाढयोः लतेव वल्लीव । परिक्षामपाण्डुरया परिक्षामा कृशा चासौ पाण्डुरा धूसरा च तया अवस्थया दशया हृदयं चेत आक्षिपन्ती व्याकुलयन्ती सालमूलं वरणवृक्षतलम् अलङ्करोति भूषयति सालवृक्षच्छायाया निषीदतीत्यर्थः । तत् तस्माद्धेतोः उपसर्पामि सीतासमीपं यामि । चिन्तापरवशेव चिन्तया परवशा पराधीना इव अधोमुखी । लम्बालकाच्छादितनयना लम्बा दीर्घा

वती। स्वागतं प्रियसख्याः। (परिष्वज्योपवेशयति)
वदी। साअद पिअसहीए।

वे—अपि कुशलं कुशलवयो ?
अवि कुसलं कुसलवाणं ?

सी—यथा वनवासिनाम्।
जह वणवासिणं।

वे—कीदृशो युष्माकं वृत्तान्तः ?
कीदिसो तुम्हाणं वुत्तंतो ?

सी—(वेणा निर्दिश्य) कीदृशोऽसौ ?
कीदिसो सो ?

वे—(आत्मगतम्) अतिमात्रं सन्तपति एषा वराकी। रामसुदेरस्स (?)
अदिमत्तं सतवइ एसा वराई। रामसुंदेरस्स
सङ्कीर्तनेन विनिधारयिष्यामि। (प्रकाशम्) अयि अपण्डिते ! तथा
संकित्तणेण विणिधारइस्सं। अयि अपण्डिदे ! तह
निरपेक्षस्य निरनुक्रोशस्य कृते कीदृक् त्वमासितपक्षचन्द्रलेखेव
निरपेक्खस्स निरणुक्कोसस्स किदे कीस तुमं असिदपक्खचंदलेहा विअ
दिने दिने परिहीयसे।
दिणे दिणे परिहीअसि।

सी—कथं स निरनुक्रोशः ?
कहं सो णिरणुक्कोसो ?

वे—येन परित्यक्तासि।
जेण परिच्चत्तासि।

सी—किमहं परित्यक्ता ?
किमहं परिच्चत्ता ?

अलकाः केशास्तैराच्छादिते आवृते नयने चक्षुषी यस्या सा तादृशी। दीनप्रेक्षिता दीनं दैन्ययुक्तं प्रेक्षितं दृष्टिर्यस्या. सा। शब्दापयिष्यामि आकारयिष्यामि। अपीति प्रश्ने। सखि वैदेहि ! सखि जानकि !

टी०—अतिमात्रम् अत्यन्तं सन्तपति क्लेशमनुभवति एषा वराकी तपस्विनी। रामसन्देशस्य संकीर्तनेन वर्णनेन विनिधारयिष्यामि ज्ञास्यामि अस्या हृदयम् अन्त.करणम्।

टी०—अपण्डिते मुग्धे तथा निरपेक्षस्य अपेक्षारहितस्य निरनुक्रोशस्य अनुक्रोशवर्जितस्य कृते असितपक्षचन्द्रलेखेव असितपक्षस्य कृष्णपक्षस्य या चन्द्रलेखा चन्द्रकला तद्वत् दिने दिने प्रतिदिनं परिहीयसे क्षीयसे।

टी०—निरनुक्रोश निर्दयः।

वे—(विहस्य वेणी परिमार्जयति) **एवं लोको भणति सत्यं परित्यक्ता।**
एव्वं लोओ भणादि सच्च परिच्चत्ता।

सी—अथ शरीरेण न पुनर्हृदयेन।
अह सरीरेण ण उण हिअएण।

वे—कथं परकीयं हृदयं जानासि ?
कहं परकेरअं हिअअं जाणासि ?

सी—कथं तस्य हृदयं सीतायाः परकीयं भविष्यति ?
कह तस्स हिअअ सीदाए परएरअ भविस्सदि ?

वे—अहो अपरित्यक्तानुरागता !
अहो अपरिच्चत्ताणुराअदा !

सी—कथं स ममोपरि त्यक्तानुरागः येनातिप्रसिद्ध एव मामधन्या-
कहं सो मम उवरि परिच्चत्ताणुराओ जेण अदिप्पसित्तो एव्व मं अधण्णं
मुद्दिश्यार्यपुत्रेणानुभूतः सेतुबन्धादिपरिश्रमः ?
उद्दिसिअ अअउत्तेण अणुभूदो सेदुबधादिपरिस्समो ?

वे—आत्मश्लाघिनि ! क्षत्रियाणां समुचित एष रावणस्योपरि रोषो
अत्तसिलाहिणि ! खत्तिआणं समुइदो एसो रावणस्स उवरि रोसो
न सीताया उपर्यनुरागः।
ण सीदाए उवरि अणुराओ।

सी—एतदपरं न प्रेक्षसे ?
एदं अवरं ण पेक्खसि ?

वे—किमेतदपरम् ?
कि एद अवरं ?

टी०—अथ शरीरेण न पुनर्हृदयेन लोकरञ्जनार्थं शरीरेण परित्यक्तास्मि, हृदयेन न तु, तस्य हृदये तु सर्वदैव तिष्ठामीति भाव ।

टी०—अपरित्यक्तानुरागता—अपरित्यक्ता इडेति यावत् अनुरागता प्रीतिः। स राम ममोपरि मद्विषये त्यक्तानुराग त्यक्त परिहृतोऽनुराग· प्रीतिर्येन स । अतिप्रसिद्ध जगद्विख्यात एव माम् अधन्या हतभाग्याम् उद्दिश्य सेतुबन्धादि-परिश्रम लङ्कागमनाय सेतुबन्धनाद्युद्योग । यदि च रामो अनुरक्तो नाभविष्यत् तदा मत्कृते सेतुबन्धनाद्यायासं नाकरिष्यत् ।

टी०-अथ वेदवती सीताया हेतुमपाकरोति । **आत्मश्लाघिनी**ति । आत्मान श्लाघते इति तच्छीला तत्संबुद्धौ, आत्माभिमानिनि । क्षत्रियाणा क्षतात् त्रायते इति क्षत्रियस्तेषां क्षत्रियाणां शूराणामित्यर्थ रावणस्य उपरि रोष क्रोध· समुचित· युज्यते । सीताया उपरि अनुराग न । सेतुबन्धादिपरिश्रमे हेतु· शत्रोः रावण-स्योपरि क्रोध त्वय्यनुरागस्तु न कारणमित्यभिप्रायः ।

सी—एतत् ।
एदं ।
वे—किमेतत् ?
किं एदं ?
सी—(सलज्जम्) यत् सपत्नीजननिःश्वासानुपविद्धे रामवक्षःस्थले
ज सवत्तीजणणीसासाणुवविद्धे रामवच्छत्थले
अतिचिरं सम्भावितास्मि
अदिचिरं संभाविदम्हि ।
वे—सखि ! मा उत्ताम्य, समासन्नो रामस्य यज्ञदीक्षासमयः ।
सहि ! मा उत्तम्म, समासण्णो रामस्स जण्णदिक्खासमओ ।
सी—ततः किम् ?
तदो किं ?
वे—ननु तत्राश्वस्य सहधर्मचारिण्या पाणिग्रहो निर्वर्तयितव्यः ।
णं तहिं अस्सस्स सहधमआरिणीए पाणिग्गहो णिव्वात्तिदव्वो ।
सी—आर्यपुत्रस्य हृदये प्रभवामि न पुनर्हस्ते ।
अअउत्तस्स हिअए पहवामि ण उण हत्ते ।
वे—(आत्मगतम्) अहो अस्या दृढानुरागता ! (प्रकाशम्) सखि !
अहो से दिढाणुराअदा । सहि !
पुत्रमुखदर्शनेनापि ते प्रवासशोको नापनीतः ?
पुत्तमुहदंसणेण वि दे पवाससोओ णावणीदो ?
सी—शोकपरिहारेणापि शोको वर्धते ।
सोअपडिआरेण वि सोओ वड्ढिअदि ।
वे—कथमिव ।
कहं विअ ।

टी०—सपत्नीजननिःश्वासानुपविद्धे—समानः पतिर्यासां ताः सपत्न्यः ता एव जना इति तेषां यो निःश्वासः नितरां श्वासस्तेन अनुपविद्धे अस्पृष्टस्तस्मिन् । रामवक्षःस्थले रामस्योरसि चिरं बहुकालं सम्भावितास्मि मानितास्मि ।

टी०—मा उत्ताम्य मा कृथा मानं, रामस्य यज्ञदीक्षासमयः करिष्यमाणे यज्ञे अश्वमेधाख्ये दीक्षासमयः दीक्षायाः कालः समासन्नः समुपस्थितः । तत्राश्वस्य—तत्र+आशु+अस्य—तत्र यज्ञे आशु शीघ्रम् अस्य रामस्य सहधर्मचारिण्या स्त्रिया सह पाणिग्रहः विवाहः निर्वर्तयितव्यः कार्यः । हृदये प्रभवामि मनसि पर्याप्ता । यज्ञसाफल्यहेतोः कृतेपि स्त्र्यन्तरपरिग्रहेऽहमेवार्यपुत्रस्य हृदये स्थास्यामीति सीतायाः प्रतिवचः । पुत्रमुखदर्शनेन अपि पुत्रयोः कुशलवयोः

सी—यथा यथा द्वौ दारकावीषत्समुद्भिन्नदशनाङ्कुरकोमलेन वदनेन
जह जहा दे दारआ ईससमुभिण्णदसणंकुरकोमलेण वदणेण
मम मुखमालोकयन्तौ प्रहसतः, अत्यन्तकोमलेनालापेन तादृशं
मम मुहं आलोअंता पहसति, अच्चंतकोमलेण आलावेण तादिसं
शब्दापयतः, तथा जानामि तस्य मौग्ध्ये निमज्जामीति। साम्प्रतं
सद्दाविअति, तह जाणामि तस्स मुंदे णिमज्जामीत्ति। संपदं
पुनः कालवशेन परिणतौ परित्यक्तबालभावावबालौ संवृत्ता-
उण कालवसेण परिणदा परिच्चत्तबालभावा अबाला संवुत्ते-
विति मामधिकतरं बाधते।
ति मं अहिअतर बाधेयदि।

वे—अहो किमिति तस्य महार्घं नृशंसत्वं यत्सीता नाम बालतनये-
अहो किंति तस्स महग्घ णिसंसत्तणं जं सीदा णाम बालतणआ
दृशीमवस्थामनुभवतीति।
ईरिसं अवत्थं अणुभवदित्ति।

सी—सखि वेदवति! अपि नाम—
सहि वेदवदि! अवि णाम—

वे—किं लज्जितेन, भण आर्यपुत्रं प्रेक्षे इति।
कीस लज्जिदेण, भणाहि अज्जउत्तं पेक्खामित्ति।

मुखदर्शनेन वदनावलोकनेनापि ते प्रवासशोक विरहदु खं न अपनीतः न शमितः। शोकपरिहारेण अपि शोकस्य सन्तापस्य परिहार निवारणं तेनापि शोक सन्तापः वर्धते वृद्धिमुपैति।

टी०—दारकौ बालकौ कुशलवौ ईषत्समुद्भिन्नदशनाङ्कुरकोमलेन ईषत् समुद्भिन्ना निर्गता ये दशनाना दन्तानाम् अङ्कुरा प्ररोहास्तै कोमलेन मृदुना वदनेन मम मुखम् आननम् आलोकयन्तौ पश्यन्तौ प्रहसत। अत्यन्तकोमलेन अतिमात्रं मृदुना आलापेन वचसा शब्दापयत आकारयत. तथा जानामि एवं मन्ये तस्य मौग्ध्ये बालभावे निमज्जामि तद्बालभावैकगतहृदयास्मीत्यर्थः। कालवशेन समयबलेन परिणतौ दशान्तरं गतौ परित्यक्तबालभावौ परित्यक्तः बालभाव. बाल्यं याभ्या तौ अबालौ संवृत्तौ बालभावमतीतौ। एतत् माम् अधिकतरम् अत्यन्तं बाधते पीडयति।

टी०—तस्य रामस्य महार्घं बहुमूल्यं महदिति भावः नृशंसत्वं क्रौर्यं यत् येन हेतोः सीता नाम बालतनया बालौ तनयौ यस्या. सा ईदृशीं विषमाम् अवस्थां दशाम् अनुभवति। किं लज्जितेन किं लज्जया। भण कथय।

सी—किं लज्जावेशेन, एवं भणामि (प्रकाशम्) अपि कुशलवयो-
किं लज्जावेसेण, एव्वं भणामि । अवि कुसलवाणं
स्तातस्य दर्शनेन जन्मामोघं भवेदिति ।
तादस्स दसणेण जम्मं अमोहं भवेदित्ति ।

वे—ननु समासन्नमेव युष्माकं राजदर्शनम् ।
णं समासण्णं एव्व तुम्हाणं राअदंसणं ।

सी—कथमिव ?
कहं विअ ?

(नेपथ्ये ऋषि)

भो भो आश्रमवासिनो जनाः ! शृण्वन्तु भवन्तः—

इतो नातिदूरे महाक्रतुरश्वमेधः प्रवर्तते, सम्भृतानि यज्ञोपकरणानि, सन्निपतिताश्च नानादेशाश्रमवासिनो वसिष्ठात्रेयप्रभृतयो महामुनयः। केवलं भगवतो वाल्मीकेरागमनमुदीक्षमाणो नाद्यापि यज्ञदीक्षां प्रविशति महाराजः । आगतश्च वाल्मीकितपोवनवासिनामुपनिमन्त्रणार्थं रामदूतः । तस्मान्नैव परिलम्बितव्यम् ।

तीर्थोदकानि समिधः परिपूर्णरूपा
दर्भाङ्कुरानविहतान् परिगृह्य सर्वः ।

टी०—आर्यपुत्रं रामभद्रं प्रेक्षे अवलोकयिष्यामीति । लज्जावेशेन लज्जाया आवेश तेन किं प्रयोजनं लज्जा तु व्यर्थैव । तातस्य पितु. दर्शनेन जन्म अमोघं सफलं भवेत् । समासन्न निकृष्टवर्ति राजदर्शनं राज्ञ रामस्य दर्शनं सङ्गम । कथमिव कया रीत्या ।

टी०—आश्रमवासिन. तपोवनस्थाः । इतोऽस्मात् प्रदेशात् नातिदूरे समीपवर्तिनि प्रदेश इत्यर्थ. महाक्रतुर्महायज्ञोऽश्वमेध प्रवर्तते । अश्वमेधे हि नरेन्द्रेण अश्वो विसृज्यते योऽश्वं गृह्णाति युद्धञ्चाङ्गीकरोति स यदि जीयते तर्हि अश्वमेधो यज्ञ प्रवर्तते । एकवर्षानन्तरञ्चाश्वो जितैर्नृपतिभिस्सह यज्ञशालामुपैति तत्र चायं हन्यतेऽग्नौ च हूयते । सम्भृतानि एकत्रितानि यज्ञोपकरणानि यज्ञस्य उपकरणानि सम्भारा· । सन्निपतिता. समागता. नानादेशाश्रमवासिन नानादेशेषु विविधेषु देशेषु ये आश्रमास्तद्वासिन. वसिष्ठात्रेयप्रभृतय. महामुनय महान्तश्च ते मुनयः महामुनयः । उदीक्षमाणः प्रतीक्षमाण. । यज्ञदीक्षा प्रविशति यज्ञदीक्षा गृह्णाति । वाल्मीकितपोवनवासिनाम् वाल्मीक्याश्रमवासिना तपस्विनाम् उपनिमन्त्रणार्थम् उपनिमन्त्रणं कर्तुं रामदूतः रामेण प्रेषित. दूतः समागतः । न परिलम्बितव्यं विलम्बो न कार्य ।

अ०—तीर्थोदकानि, परिपूर्णरूपाः समिध अविहतान् दर्भाङ्कुरान्

अग्रे भवन्तु मुनयो मुनिकन्यकाश्च
कुर्वन्तु मङ्गलबलीनुटजाङ्गणेषु ॥ २ ॥

सी–त्वरामि त्वरामि, एष आर्यकाश्यपः प्रस्थानघोषणासम
तुवरेमि तुवरेमि, एस अअकस्सवो पत्ताणघोसणासम-
नन्तरं गृहीतयज्ञोपकरणोऽग्रतः प्रस्थितः। अहमपि कुशलवयोः
णन्तरं गहिदजण्णोवकरणो अग्गदो पत्थिदो। अहं वि कुसलवाण
प्रस्थानमङ्गलमनुष्ठास्यामि।
पत्थाणमगलं अणुचिट्ठिसं।

(इति निष्क्रान्ता सर्वे)

द्वितीयोऽङ्क ।

परिगृह्य मुनयः सद्य. अग्रे भवन्तु, मुनिकन्यकाः च उटजाङ्गणेषु मङ्गल-बलीन् कुर्वन्तु ॥ २ ॥

स०—तीर्थोदकानि—तीर्थानाम् उदकं तीर्थोदकं तानि । परिपूर्णरूपा —परिपूर्णं रूपं यासा ता । दर्भाङ्कुरान् दर्भस्य अङ्कुरा दर्भाङ्कुरास्तान्। मुनिकन्यका मुनीना कन्यका. । उटजाङ्गणेषु—उटजानाम् अङ्गणम् उटजाङ्गणं तेषु । मङ्गल-बलीन् मङ्गलार्थं बलिः मङ्गलबलिस्तान् ।

तीर्थोदक—holy water. परिपूर्णरूप—unimpaired. समिध्—sacred fuel. सद्यः—Immediately. मुनिकन्यका—ascetic maid. मङ्गल—auspiciousness. बलि—oblation. उटज—cottage. अङ्गण—courtyard.

टी०– तीर्थोदकानि तीर्थेभ्य गङ्गादिभ्यः पवित्रस्थानेभ्यः समाहृतानि उद-कानि जलानि परिपूर्णरूपा परिपूर्णं शास्त्रोक्तं रूपं स्वरूपं यासा ताः समिधः काष्ठानि अविहतान् अखण्डितान् दर्भाङ्कुरान् कुशाङ्कुरान् परिगृह्य गृहीत्वा मुनयस्तपस्विन· सद्यः सपदि अग्रे भवन्तु अग्रे तिष्ठन्तु । मुनिकन्यकाश्च ऋषि-कुमारिकाश्च मङ्गलबलीन् मङ्गलार्थं पूजार्थं बलीन् उपहारान् उटजाङ्गणेषु उट-जाना पर्णशालानाम् अङ्गणेषु अजिरेषु कुर्वन्तु वितरन्तु इत्यर्थः ॥ २ ॥

आर्यः पूज्यः काश्यपः कश्यपगोत्रोत्पन्नः मुनिविशेष । प्रस्थानघोषणासम-नन्तरं प्रस्थानस्य यात्राया घोषणा दुन्दुभिनादस्तस्या समनन्तरं समकालं गृहीत-यज्ञोपकरणः गृहीतं यज्ञस्य उपकरणं साधनभूतं वस्तुजातं येन स तथाभूतः । अग्रत· अग्रे प्रस्थित. प्रचलित । प्रस्थानमङ्गलं प्रस्थाने यात्रासमये यन्मङ्गलं विधीयते तद् अनुष्ठास्यामि करिष्यामि ।

अथ तृतीयोऽङ्कः ।

(तत प्रविशति मार्गपरिश्रान्तो गृहीतभारस्तापस.)

तापसः—(श्रममभिनीय) **भोः सुष्ठु परिश्रान्तोऽस्मि एतेन सन्ताप-**
भो सुठ्ठु परिस्सतोम्हि एदिणा संदाप-
दीर्घेण ग्रीष्मसमयेन। न प्रभवामि परिश्रमगतयोर्जङ्घयोर्विक्षेपनिक्षेपौ
दीहेण गिम्हसमएण । ण प्पहवामि परिस्समगआणं जंघाणं विक्खेवणिक्खेवं
कर्तुम्। पादतलञ्च मे सम्पर्कं पिटकसस्फोटकै संवृत्तम्। अन्यच्च,
कादुं। पाददलं अ मे संपक्कं पिअअसंपोडएहिं संवुत्तं। अएणाच,
तथा सुकुमारा देवी सीता तथा कोमलौ च कुशलवौ तापससार्द्धेन
तह सुउमाला देवी सीदा तह कोमला अ कुसलवा तापससद्धेण
सहानस्तमिते सूर्ये नैमिशं प्राप्ताः। अहमद्यापि नासादयामि अटवी-
सह अणत्थमिदे सूरे नेमिशं पत्ता। अहं अज्ज वि णासादेमि अडवि-
दिशामुखे। (विचिन्त्य) क इदानीं मे नैमिशमार्गमाचक्षीत ? (विलोक्य)
दिसामुहे। को दाणिं मे णेमिसमग्ग आचक्खिस्सदि ?
नूनमेष लक्ष्मणसहायो रामो नैमिशं सम्प्राप्तः। तदहमपि तयोर्गति-
णूणं एसो लक्खणसहाओ रामो णेमिसं संपत्तो। ता अहं वि दाणं गइ
मनुसरामि।
अणुसरेमि। (निष्क्रान्त)

प्रवेशकः

टी०—अथ क्रमप्राप्तस्य तृतीयाङ्कस्य व्याख्या प्रारभ्यते। मार्गपरिश्रान्त मार्गेण अध्वना परिश्रान्त । गृहीतभारः गृहीत भार येन स । सुष्ठु परिश्रान्तोऽस्मि सम्यक् श्रमं प्राप्तोस्मि। एतेन सन्तापदीर्घेण सन्ताप घर्मो दीर्घो यत्र तेन। ग्रीष्मसमयेन ग्रीष्मकालेन। प्रभवामि शक्नोमि। परिश्रमगतयो परिश्रमं गते इति परिश्रमगते तयो । परिश्रान्तयो. । जङ्घयो विक्षेपनिक्षेपौ विक्षेप चरणयोरुत्थापनं निक्षेपस्तयोर्विन्यासस्तौ कर्तुम्। पादतलं पादयोरधोभाग । संपर्कं सम्यक् पक्कं पिटकसंस्फोटकै. विस्फोटै· संवृत्तं संजातम्। सुकुमारा कोमलाङ्गी देवी सीता कोमलौ मृदुलौ च कुशलवौ तापससार्द्धेन तापसाना सार्द्धेन सार्थेन समूहेनेति यावत्। अनस्तमिते न अस्तमिते अस्तङ्गते सूर्ये। नैमिशं तदाख्यम् अरण्यं प्राप्ता । अहम् अद्यापि अधुनापि अटवीदिशामुखम् अटव्या दिशा अटवीदिशा तस्या मुखं मार्गं न आसादयामि न प्राप्नोमि। नैमिशमार्गं नैमिशगामिनम् अध्वानम् आच-

---

१ तापससार्थेनेति समीचीन पाठ ।

(ततः प्रविशति शोकसन्तप्तो रामो लक्ष्मणश्चाग्रतः)

ल—आर्य इत इतः। (परिक्रम्य)

प्रथममनपराधां तां समुत्कृष्य देवी-
मगममहमगाधे कानने त्यक्तुकामः।
पुनरपि कुलशेषं राममादाय देवं
स्वजनविपदि दक्षः काप्यधन्यः प्रयामि ॥ १ ॥

हा! सुष्ठु खल्विदमुच्यते—

प्रमादः सम्पदं हन्ति प्रश्रयं हन्ति विस्मयः।
व्यसनं हन्ति विनयं हन्ति शोकश्च धीरताम् ॥२॥ इति।

ज्ञीत कथयेत्। नूनम् असंशयं लक्ष्मणसहायः लक्ष्मणः सहायो यस्य स तथाभूतः। तयोर्गतिं तयोः रामलक्ष्मणयोर्गतिं मार्गम् अनुसरामि अनुगच्छामि।

टी०—शोकसन्तप्तः—शोकेन मन्युना सीतावियोगजन्येनेत्यर्थः सन्तप्तः पीडितः।

अ०—अनपराधां तां देवीं समुत्कृष्य अगाधे कानने त्यक्तुकामः प्रथमम् अहम् अगमम्। स्वजनविपदि दक्षः अधन्यः कुलशेषं देवं रामम् आदाय पुनः अपि क्वापि प्रयामि ॥ १ ॥

स०—अनपराधाम्—न अपराधो यस्याः सा अनपराधा ताम्। स्वजनविपदि—स्वः जनः स्वजनः तस्य विपत् तत्र।

अनपराधा—innocent. **समुत्कृष्य**—having enticed. **कानन**—forest. **विपत्**—misery. **दक्ष**—well versed. **अधन्य**—Ill-starred. **शेष**—surviver.

टी०—अनपराधाम् नास्ति अपराधो दोषो यस्याः सा अनपराधा ताम्। तां पूर्वं वनवाससमयेऽस्मत्सहचारिणीं देवीमार्यां सीतां समुत्कृष्य वनमानीय अगाधे घोरे कानने अरण्ये त्यक्तुकामः त्यक्तुं विस्रष्टुं कामोऽभिलाषो यस्य सः तथाभूतोऽहम् अगमम् अगच्छम्। स्वजनविपदि स्वस्य स्वकीयस्य जनस्य सीतारूपस्येत्यर्थः विपदि विपत्तौ दक्षः कुशलः अत एव अधन्यः न धन्योऽधन्यः भाग्यहीनः पुनरपि कुलशेषं कुलस्य वंशस्य शेषं शेषभूतं देवं राजानं रामम् आदाय प्रयामि गच्छामि ॥ १ ॥

अ०—प्रमादः सम्पदं हन्ति। विस्मयः प्रश्रयं हन्ति। व्यसनं विनयं हन्ति। शोकः च धीरतां हन्ति ॥ २ ॥

प्रमाद—neglect. **सम्पत्**—fortune. **विस्मय**—arrogance. **प्रश्रय**—affection. **शोक**—grief. **धीरता**—patience.

टी०—प्रमादोऽनवधानता सम्पदं विभवसञ्चयं हन्ति नाशयति। विस्मयः

तथाहि—एष मन्दरमहीधरसमानधैर्यो भगवतो वाल्मीकेराग- मनमुपलभ्य तद्दर्शनार्थं गोमतीतीराश्रमपदमुच्चलितः। सम्प्रति तामेव दिशं परित्यज्य शोकावेगसमाक्षिप्तहृदयो महावनाभिमुखं प्रस्थित.। ततः किमेनं सम्यग् ज्ञापयामि? अथ वा तत् किमनेन प्रतिहारेण धावितं मार्गमादेशयामि, यथायमचेतयन्नेव वाल्मीकेरा- श्रममनुप्राप्नोति। इत इत आर्यः।

रा—(निश्वस्य)

नीतस्तावन्मकरवसतौ बन्ध्यतां शैलसेतु-
र्देवो वह्निर्न च विगणितः शुद्धिसाक्ष्ये नियुक्तः।

गर्व· प्रश्रयं प्रीतिं हन्ति। व्यसनं द्यूतादिष्वासक्तिः विनयं शीलं हन्ति। शोकश्च चिन्ता च धीरता धैर्यं हन्ति॥ २॥

टी०—मन्दरमहीधरसमानधैर्य· मन्दरश्चासौ महीधरश्चेति मन्दरमहीधर. मन्दराचलस्तेन समानं तुल्यं धैर्यं यस्य सः। वाल्मीके. वल्मीकस्यापत्यं वाल्मीकि- स्तस्य आगमनम् उपलभ्य आकर्ण्य तद्दर्शनार्थं तमवलोकयितुं गोमतीतीराश्रमपदं गोमत्यास्तीरे तटे य आश्रमस्तस्य पद स्थानम् उच्चलित. प्रस्थितः। सम्प्रतीदानीं तामेव गोमतीतीराश्रमगामिनीं दिशं परित्यज्य शोकावेगसमाक्षिप्त- हृदयः शोकस्य मन्यो. आवेगेन प्राबल्येनेत्यर्थः समाक्षिप्तं व्याकुलितं हृदय यस्य स.। महावनाभिमुखं महावनं महारण्यं तस्याभिमुखं तम्प्रतीत्यर्थः। प्रस्थित. प्रचलितः। ज्ञापयामि बोधयामि। प्रतिहारेण द्वारपालेन धावितं गतं मार्ग पन्था- नम् आदेशयामि निवेदयामि यथा यया रीत्या अचेतयन्नेव मार्गभ्रमम् अजानन्नेव। वाल्मीकेराश्रमपदम् अनुप्राप्नोति।

अ०—मकरवसतौ शैलसेतुस्तावत् बन्ध्यतां नीतः, शुद्धिसाक्ष्ये नियुक्त. देव. वह्निः च न विगणितः। भुवनमहिता इक्ष्वाकूणां सन्तति., मे न ईक्षिता तां मैथिलीं मोहात् निरस्य किं किम् अहम् अकरवम्॥ ३॥

स०—मकरवसतौ—मकराणा वसतिस्तस्मिन्। शैलसेतु—शिलानामयं शैलः, शैलश्चासौ सेतुश्चेति शैलसेतु। बन्ध्यताम्-बन्धे साधुर्बन्ध्यः बन्ध्यस्य भावो बन्ध्यता ताम्। शुद्धिसाक्ष्ये—शुद्धौ साक्ष्यं शुद्धिसाक्ष्यं तत्र। नियुक्तः—नितरा युक्तः। भुवनमहिता-भुवनेषु महिता।

मकरवसति—ocean, literally the abode of crocodiles. **शैलसेतु**—the stony bridge. **बन्ध्यता**—futility. **शुद्धि**—purity. **साक्ष्य**—witness. **नियुक्त**—appointed. **वह्नि**—fire-God. **भुवनमहिता**—The world-renowned. **सन्तति**—offspring. **मोह**—ignorance. **निरस्य**—having abandoned.

इक्ष्वाकूणां भुवनमहिता सन्ततिर्नेक्षिता मे
किं किं मोहादहमकरवं मैथिलीं तां निरस्य ॥ ३ ॥

(परिक्रम्य)

भो! भोः! कष्टम्! अतिनिरालम्बस्तपस्विन्याः प्रवासः ।
पातयति सा क दृष्टिं कस्मिन्नासाद्य चित्तमाश्वसिति ।
जीवति कथं निराशा श्वापदभवने वने सीता ॥ ४ ॥

ल—(आत्मगतम्) आर्याया विप्रवासं तनयवैशसञ्च समनुचिन्त्य सुतरामयं सन्तप्यते, तत प्रस्तावान्तरेण देवीवृत्तान्तमपसारयामि । (प्रकाशम्) इतस्तावदवलोकयत्वार्यः

टी०—मकरवसतौ मकराणा नक्राणा वसतिरावासस्तस्मिन् समुद्र इत्यर्थः । शैलसेतु शिलानामयं शैल शैलश्चासौ सेतुश्चेति शैलसेतु बन्ध्यता व्यर्थता नीत· प्रापितः । यदि च पश्चादपि सीता निर्वासनीयैवासीत् तदा समुद्रे सेतुबन्धः व्यर्थ एवेति । शुद्धिसाक्ष्ये रावणगृहवासादपि सीता शुद्धैवेति विनिश्चेतुं दिव्यपरीक्षाया द्रष्टृत्वेन नियुक्त देवो वह्नि च न विगणित नाहत. । भुवनमहिता लोकमानिता इक्ष्वाकूणाम् इक्ष्वाकुवंशीयाना राज्ञा सन्ततिरपत्यं मे मम मयेत्यर्थ । न ईक्षिता न गणितेति भाव । ता मैथिलीं सीता निरस्य निर्वास्य मोहात् अज्ञानात् अहं किं किं न अकरवम् अज्ञानावृतचेतसैव मया सर्वमिदं कृतमिति भाव. ॥ ३ ॥

अतिनिरालम्ब. अत्यन्तं निरालम्ब आलम्बनरहित तपस्विन्या. सीताया प्रवास. विवासनम् ।

अ०—**सा क दृष्टिं पातयति, कस्मिन् चित्तम् आसाद्य आश्वसिति, श्वापदभवने वने निराशा सीता कथं जीवति ॥ ४ ॥**

दृष्टिं पातयति—sets her eyes. **चित्त**—mind. **आसाद्य**—having obtained. **आश्वसिति**—finds relief. **श्वापद**—wild beast. **निराशा**—bereft of hope.

टी०—सा सीता क कुत्र कस्मिन् प्रदेशे दृष्टिं चक्षु. पातयति निक्षिपति, कस्मिन् कुत्र चित्तं मनः आसाद्य निधाय आश्वसिति आश्वासं करोति । श्वापदाना हिंस्राना जन्तूनां भवनं गृहं तस्मिन् श्वापदबहुल इति यावत, वने अरण्ये निराशा आशाहीना सीता कथं जीवति प्राणिति ॥ ४ ॥

टी०—विप्रवासं वनवासं तनयवैशसं तनयस्य तनययोर्वा वैशस विनाशं समनुचिन्त्य विचार्य सुतरामत्यन्तमयं रामः सन्तप्यते क्लेशमनुभवति, ततः प्रस्तावान्तरेण अन्येन प्रकरणेन देवीवृत्तान्तं देव्या सीताया. वृत्तान्तम् उदन्तं सीतासम्बन्धिनी कथामित्यर्थः अपसारयामि दूरीकरोमि । अवलोकयतु पश्यतु ।

मरकतहरितानामम्भसामेकयोनि--
मदकलकलहंसीगीतरम्योपकण्ठा ।
नलिनवनविकासैर्वासयन्ती दिगन्तान्
नरवर पुरतस्ते दृश्यते गोमतीयम् ॥ ५ ॥

रा--(स्पर्शमभिनीय)

मुक्ताहारा मलयमरुतश्चन्दनं चन्द्रपादाः
सीतात्यागात्प्रभृति नितरां तापमेवावहन्ति ।

अ०—नरवर ! मरकतहरितानाम् अम्भसाम् एकयोनि , मदकलकलहंसीगीतरम्योपकण्ठा, नलिनवनविकासैः दिगन्तान् वासयन्ती इयं गोमती ते पुरत दृश्यते ॥ ५ ॥

स०—मरकतहरितानाम्—मरकतमिव हरिता ते मरकतहरितास्तेषाम् । एकयोनिः—एका योनि । मदकलकलहंसीगीतरम्योपकण्ठा—मदेन कला या. कलहंस्यस्तासा यद्गीत तेन रम्य उपकण्ठो यस्या सा । नलिनवनविकासै —नलिनाना यानि वनानि तेषा विकासस्तै । दिगन्तान्–दिशामन्ता दिगन्तास्तान् ।

नरवर—O best of men ! **मरकत**—sapphire. **हरित**—green. **अम्भस्**—water. **एकयोनि**—the sole repository. **रम्य**—pleasant. **उपकण्ठ**—environs. **नलिन**—lotus. **विकास**—blossoming. **वासयन्ती**—charging with fragrance. **पुरत.**—in front of.

टी०—नरवर ! नरोत्तम ! मरकतं हरिन्मणिरिव हरिताना हरिद्वर्णानाम् अम्भसा जलानाम् एकयोनि एकं मुख्य कारणम् । मदेन हर्षेण कला अव्यक्तमधुरभाषिण्य या. कलहंस्य कादम्बस्त्रियस्तासा यद् गीतं तेन रम्य सुन्दर· उपकण्ठ. प्रान्तप्रदेशो यस्या सा । नलिनाना सरोजाना यानि वनानि तेषा विकासै. प्रफुल्लनैः दिगन्तान् दिशामन्तान् वासयन्ती इयं गोमती नदी ते पुरत दृश्यते ॥ ५ ॥

टी०—स्पर्शमभिनीय स्पर्श नाटयित्वा ।

अ०—सीतात्यागात् प्रभृति मुक्ताहारा मलयमरुत चन्दनं चन्द्रपादाः नितरां तापम् एव आवहन्ति । अद्य गोमतीतीरवायुः अकस्मात् मन रमयति । नून सा वराकी प्रोषिता तस्यां दिशि निवसति ॥ ६ ॥

स०—सीतात्यागात्—सीताया· त्याग सीतात्यागस्तस्मात् । मुक्ताहारा मुक्ताना हारा । मलयमरुत —मलयस्य मरुतः । चन्द्रपादाः—चन्द्रस्य पादाः। गोमतीतीरवायु —गोमतीतीरे वायु. ।

त्याग—abandonment. **मुक्ताहार**—pearl-necklace. **मलयमरुत्**—Malaya-breeze. **चन्दन**—sandal paste. **चन्द्रपाद**—rays of the moon. **नितराम्**—extremely. **ताप**—torment. **आवहन्ति**

अद्याकस्माद्रमयति मनो गोमतीतीरवायु-
नूनं तस्यां दिशि निवसति प्रोषिता सा वराकी ॥६॥

ल—अतिविषमोऽयं निम्नगावतारः, तदप्रमत्तमवतीर्यताम् ।

(उभाववतरणमभिनीय) [निर्वर्ण्य]

यथैतान्यविरलपदन्यासलाञ्छितानि सैकतानि वृन्तमात्रावशेषतया संसूच्यमानकुसुमापचया रोधोलताः तदालूनकिसलयतया विरलच्छाया वनस्पतयः, तथा जानामि प्रत्यासन्नवर्तिना मनुष्याधिवासेन भवितव्यम् । तथाहि—

अभिनवरचितानि देवतानां जलकुसुमैर्बलिमन्ति सैकतानि ।
इयमपि कुरुते तरङ्गमध्ये भुजगवधूललितानि कुन्दमाला ॥७॥

—bring, cause. **अकस्मात्**—all of a sudden. **रमयति**—ravishes. **नूनम्**—surely. **प्रोषिता**—exiled. **निवसति**—resides.

टी०—सीतायास्त्याग· सीतात्यागस्तस्मात् प्रभृति सीतात्यागादारभ्य मुक्ताहारा मुक्ताना हारा स्रज , मलयमरुत. मलयस्य मलयाचलस्य मरुत वायवः, चन्दनं मलयजं, चन्द्रपादा चन्द्रस्य पादाः किरणा नितराम् अत्यन्तम् एव ताप दु·खम् आवहन्ति प्रयच्छन्ति । अद्य अस्मिन् दिवसे अकस्मात् अकाण्ड एव गोमतीतीरवायु. गोमतीतीरस्य वायु समीरणः मन रमयति आह्लादयति । तस्या दिशि यस्या दिश गोमतीतीरवायु प्रचलति दक्षिणस्या दिशीत्यर्थ । प्रोषिता परदेशस्थिता सा वराकी तपस्विनी नूनं निश्चयेन निवसति ॥ ६ ॥

टी०—अतिविषम असुकर. निम्नगावतार निम्नगाया नद्या अवतार स्नानार्थमवतरणस्थानम् । अप्रमत्तं सावहितम् ।

अविरलपदन्यासलाञ्छितानि—न विरला अविरला घना अविरलाश्च ते पदन्यासा पदयोश्चरणयो· न्यासा निक्षेपास्तैः लाञ्छितानि चिह्नितानि । सैकतानि सिकतामया प्रदेशा इत्यर्थ । सैकतानि सिकताना विकार. सैकत तानि । वृन्तमात्रावशेषतया अवशेषस्य भाव. अवशेषता वृन्तमात्रस्यावशेषता वृन्तमात्रावशेषता तया । संसूच्यमानकुसुमापचया संसूच्यमान. प्रदृश्यमान कुसुमाना पुष्पाणाम् अपचयश्चयनं यासु ता. । रोधोलता रोधस. कूलस्य लता तदालूनकिसलयतया तदा तत्क्षण एव आलूनानि छिन्नानि च तानि किसलयानि पत्राणि तेषा भावस्तत्ता तया । विरलच्छाया विरला अनिबिडा छाया अनातप· येषा ते वनस्पतय अपुष्पा वृक्षा· । जानामि मन्ये प्रत्यासन्नवर्तिना निकटस्थेन मनुष्याधिवासेन मनुष्याणा जनानाम् अधिवासो वसतिस्तेन भवितव्यम् ।

अ०—देवतानां जलकुसुमै. सैकतानि अभिनवरचितानि बलिमन्ति । इयम् अपि च कुन्दमाला भुजगवधूललितानि कुरुते ॥ ७ ॥

रा—न केवलं प्रत्यासन्नवर्तिना प्रतिस्रोतोपगतेनापि मनुष्याधिवासेन भवितव्यम् ।

ल—आश्चर्यमाश्चर्यम् ! एषा हि कुन्दमाला चरणसपर्यामिव कर्तुकामया समुद्रगामिन्या तरङ्गपरम्परया क्रमेण देवस्य पादान्तिकमुपहृता । अवहितं प्रेक्षणीया विरचना, तदवलोकयत्वार्यः । (गृहीत्वोपनयति)

रा—(निर्वर्ण्य रोमाञ्चमभिनीय) वत्स, दृष्टपूर्वमिदं कुसुमरचनाविन्यासकौशलम् ।

ल—क्व दृष्टम् ?

रा—क्व वान्यत्रेदृशस्यावस्थानम् ?

ल—किं देव्याम् ?

रा—अथ किम् ?

ल—को जानाति दुर्विदग्धः प्रजापतिः कथं कथं क्रीडतीति । गच्छत्वार्यः इदमेव गोमतीतीरं प्रतिस्रोतोऽनुसरावो यावदस्याः कुन्दमालायाः प्रभवमासादयावः ।

स०—जलकुसुमैः—जलसहितानि कुसुमानि जलकुसुमानि तैः । सैकतानि—सिकताया इमानि । अभिनवरचितानि—अभिनवानि च तानि रचितानि । भुजगवधूललितानि—भुजगवध्वा ललितं भुजगवधूललितं तानि ।

कुसुम—flower. सैकत—sandy bank. अभिनव—recent. बलि—offering. भुजगवधू—female serpent. ललित—sporting movement.

टी०—देवताना देवाना पूजानिमित्तम् आनीतैः जलकुसुमैः जलैश्च कुसुमैश्च सैकतानि सिकतामयानि तटानि अभिनवानि च तानि रचितानि तत्क्षणनिर्मितानि बलिमन्ति पूजोपहारयुक्तानि । इयमपि कुन्दमाला कुन्दस्रक् तरङ्गमध्ये लहरीमध्ये भुजगवधूललितानि भुजगवध्वाः सर्पिण्या ललितानि चेष्टितानि कुरुते ॥ ७ ॥

टी०—प्रत्यासन्नवर्तिना निकटस्थितेन । प्रतिस्रोतोपगतेन स्रोतः स्रोतः प्रति प्रतिस्रोतः प्रतिप्रवाहम् उपगतं यस्मिन् तेन । मनुष्याधिवास मनुष्याणां जनानाम् अधिवासः निवासस्तेन । चरणसपर्याम्–चरणयो पादयोः सपर्या पूजा ताम् । कर्तुकामया विधातुमनसा । समुद्रगामिन्या नद्या तरङ्गपरम्परया तरङ्गाणा वीचीनां परम्परा परिपाटी तया क्रमेण क्रमश देवस्य भवतः पादान्तिकं पादयोरन्तिकं समीपम् उपहृता प्रापिता । अवहितं सावधानं प्रेक्षणीया अवलोकनीया । विरचना विशिष्टा रचना ।

टी०—दृष्टपूर्वं पूर्वं दृष्टम् । कुसुमरचनाविन्यासकौशलं कुसुमानां यो रचना-

रा—सुलभसादृश्यो लोकसन्निवेशः । नचैतावदस्माकं भागधेयम् । इतश्चात्यन्तविप्रकृष्टे देशे परित्यक्तायाः सीताया आगमनं न सम्भाव्यते । तथाप्यादेशय मार्गं येनेदं सलिलान्तरममुञ्चन्तौ वसतिमासादयावः ।

ल-एषा नदीभूमिः कण्टकितशर्कराशुक्तिपुटदुःखसञ्चारा, तद्यथा यथा मार्गमादेशयामि तथा तथा शनैरागन्तव्यमार्येण ।

रा—एवं क्रियताम् । यद्यपीयमभिमता कुन्दमाला तथापि देवतोपहारशङ्कया नोपभोगमुपनीयते । (इति विमुञ्चति)

ल—एतां वेत्रलतां विलङ्घ्य पदं मास्मिन् कृथाः शुक्तयो
मूर्धानं व्यवधाय नामय पुरो दूरावनम्रस्तरुः ।

विन्यासस्तस्य कौशलम् । ईदृशस्य कुसुमरचनाविन्यासकौशलस्य । अवस्थानं स्थिति दुर्विदग्धः हतहृदय । प्रजापतिः विधाता । कथ कथ केन केन प्रकारेण । क्रीडति क्रीडामाचरतीति । गोमतीतीरं गोमतीतटम् । प्रतिस्रोत प्रवाहप्रतिकूलम् अनुसराव अनुगच्छाव यावद् अस्या कुन्दमालाया· प्रभवम् उत्पत्तिस्थानम् आसादयावः प्राप्नुव. ।

टी०-सुलभसादृश्य सुलभं सुसम्भवं सादृश्यं यत्र स. । लोकसन्निवेश लोकाना जनाना सन्निवेश रचनाविन्यास. । भागधेयं भाग्यम् । अत्यन्तविप्रकृष्टे अत्यन्तं विप्रकृष्ट दूरतरस्तस्मिन् । सम्भाव्यते शङ्कयते । आदेशय कथय मार्गं पन्थानम् । सलिलस्य जलस्यान्तरम् अवकाशम् अमुञ्चन्तौ अपरित्यजन्तौ वसतिं वासस्थानम् आसादयाव प्राप्नुव ।

टी०—नदीभूमि नद्या भूमि । कण्टकितशर्कराशुक्तिपुटदु.खसञ्चारा कण्टकिता कण्टका· सञ्जाता अस्येति कण्टकिता सा चासौ शर्करा सिकता, शुक्तीना शुक्तिकाना पुटाः सन्धिभागाश्च तै. दु·खेन कृच्छ्रेण सञ्चारो यस्या सा । यथा यथा येन येन प्रकारेण मार्गं पन्थानम् आदेशयामि कथयामि तथा तथा तेन तेन प्रकारेण शनै· मन्दम् आर्येण पूज्येन आगन्तव्यम् ।

टी०—अभिमता इष्टा । देवतोपहारशङ्कया देवतायै य उपहारो बलिस्तस्य या शङ्का तया उपभोगं न उपनीयते नोपभुज्यते ।

अ०—एतां वेत्रलतां विलङ्घ्य, अस्मिन् (स्थाने) पदं मा कृथाः, शुक्तयः (सन्ति), पुर. दूरावनम्रः तरु, व्यवधाय मूर्धानं नामय । इमां तिरश्चीं शाखां चापाग्रेण विकृष्य परत विमुञ्च । पुर शरारुदयिताः उत्त्रस्यन्ति धीरं परिक्रम्यताम् ॥८॥

स०—वेत्रलताम्—वेत्रस्य लता वेत्रलता ताम् । दूरावनम्र दूरम् अवनम्र.। शरारुदयिता—शरारूणा दयिता ।

वेत्रलता—reeds. **विलङ्घय**—step over. **शुक्ति**—conch-

चापाग्रेण विकृष्य मुञ्च पुरतः शाखां तिरश्चीमिमा-
मुत्त्रस्यन्ति पुरा शरारुदयिता धीरं परिक्रम्यताम् ॥ ८ ॥

रा—(यथोक्तं परिक्रम्य) वत्स किमेतस्मिन् देशे भगवतो वाल्मीके-राश्रमसन्निवेशः ?

ल—किं दृष्टमार्येण ?

रा—असौ तनुत्वादवधानदृश्या दिशः समाक्रामति धूमलेखा ।
आकृष्यमाणो मृदुनानिलेन श्रोत्रेषु सम्मूर्च्छति सामनादः ॥ ९ ॥

ल—सम्यगुपलक्षितमार्येण । अहमप्यग्रतो गत्वा निरूपयामि । (परिक्रामंस्तरुस्तम्भमभिनीय) कथमेतस्मिन् पदोद्धारे ससाध्वसमिव मे

---

shell. व्यवधाय—carefully. तिरश्ची—drooping. शाखा—bough. चापाग्र—the point of bow. शरारुदयिता—female beast. उत्त्रस्यन्ति—get startled. धीरम्—steadily.

टी०—एतां पुरो दृश्यमाना वेत्रलता वेतसवल्ली विलङ्घय समुल्लङ्घय। अस्मिन् स्थाने पदं चरणं मा कृथाः न निधेहि, शुक्तय सन्तीतिकारणात् । पुरः अग्रे तरु वृक्षः दूरावनम्र दूरदेशपर्यन्तमवनत इति व्यवधाय विश्लेषेण अवधाय ज्ञात्वा मूर्द्धानं मस्तकं नामय अवनतं कुरु । इमा नातिदूरस्था तिरश्चीं तिर्यग्भूता शाखा पुरतः अग्रतः चापाग्रेण चापस्य धनुषः अग्रेण अग्रभागेन कोट्या विकृष्य आकृष्य मुञ्च त्यज । शरारुदयिता शरारूणां सिंहव्याघ्रादीनां घातुकानां दयिताः स्त्रियः पुरा उत्त्रस्यन्ति भेष्यन्ति इति धीरं मन्दं परिक्रम्यतां गम्यताम् ॥ ८ ॥

आश्रमसन्निवेशः आश्रमस्य सन्निवेशः अवस्थितिः ।

अ०—असौ तनुत्वात् अवधानदृश्या धूमलेखा दिशः समाक्रामति । मृदुना अनिलेन आकृष्यमाणः सामनादः कर्णेषु सम्मूर्च्छति ॥ ९ ॥

स०—अवधानदृश्या–अवधानेन दृश्या । धूमलेखा–धूमस्य लेखा । सामनादः—साम्नां नादः ।

तनुत्व—thinness. अवधान—care. धूमलेखा—column of smoke. मृदु—gentle. अनिल—breeze. नाद—chanting. संमूर्च्छति—sounds distinct.

टी०—असौ विप्रकृष्टवर्तिनी तनुत्वात् सूक्ष्मत्वात् अवधानदृश्या अवधानेन ध्यानेन दृश्या द्रष्टुं शक्या धूमलेखा धूमस्य लेखा रेखा राजिः दिशः समाक्रामति उद्गच्छति । मृदुना कोमलेन अनिलेन आकृष्यमाणः आनीयमानः सामनादः सामवेदमन्त्रोच्चारणोत्थितः शब्दः श्रोत्रेषु कर्णेषु संमूर्च्छति पतति ॥ ९ ॥

सम्यक् सुष्ठु उपलक्षितं ज्ञातम् आर्येण । अग्रतो गत्वा पुरतो भूत्वा निरूप-

हृदयम्; स्तम्भितावूरू, उत्क्षिप्यमाणौ चरणौ नाग्रतो भूमिं गन्तुमुत्सहेते। तत् किमिदम्। (विचिन्त्य) सुव्यक्तं गुरुजनसमाक्रान्तेन प्रदेशेन भवितव्यम्। अथ पदानीव लक्ष्यन्ते। (भूमिं निर्वर्णयति)

रा—किङ्कृतोऽयं वत्सस्य भूमिनिरूपणायामादरः?

ल—एतानि नितान्तमनोहरतया सङ्क्रान्तचरणतलसौकुमार्याणि ललितनिभृतविन्यासतया विज्ञायमानस्त्रीपदभावानि पुलिनतलसन्निवेशपदानि दृश्यन्ते। पश्यत्वार्यः—

विलासयोगेन परिश्रमेण वा
स्वभावतो वा निभृतानि मन्थरम्।
पदानि कस्याश्चिदिमानि सैकते
प्रयान्ति तुल्यं कलहंसविभ्रमैः॥ १०॥

यामि अवलोकयामि। तरुस्तम्भं तरोर्वृक्षस्य स्तम्भमवष्टम्भम् अभिनीय नाटयित्वा। पदोद्धारे पदयोश्चरणयोरुद्धारे उत्क्षेपे ससाध्वसं सभयम् इव। स्तम्भितौ जडीभूतौ। ऊरू जङ्घे। उत्क्षिप्यमाणौ उन्नीयमानौ अग्रत पुरत· भूमिं पृथिवीं गन्तुं न उत्सहेते न शक्तौ स्त·। सुव्यक्तं गुरुजनसमाक्रान्तेन गुरुजनः सीतारूपः पूजनीयो जनस्तेन समाक्रान्तोधिष्ठितस्तेन प्रदेशेन स्थानेन भवितव्यम्। पदानि पदचिह्नानि लक्ष्यन्ते ज्ञायन्ते। भूमिनिरूपणाया भूम्यवलोकने।

टी०—नितान्तमनोहरतया नितान्तमत्यन्तं मनोहरतया सुन्दरतया सङ्क्रान्तं सम्यक् क्रान्तं लग्नं चरणतलयो. पादयोः सौकुमार्य्यं सौन्दर्यं यत्र तानि। ललितं सुन्दरं निभृतं सलीलं यो विन्यास. पदसन्निवेशस्तस्य भावस्तत्ता तया विज्ञायमानस्त्रीपदभावानि। विज्ञायमान विशेषेण ज्ञायमानः दृश्यमान स्त्रीपदानां भावो येषु तानि। पुलिनतले सैकततटे सन्निवेशोऽवस्थितिर्येषा तानि दृश्यन्ते।

अ०—विलासयोगेन परिश्रमेण वा स्वभावत· वा निभृतानि कस्याश्चिद् इमानि पदानि सैकते कलहंसविभ्रमैः तुल्यं मन्थर प्रयान्ति॥ १०॥

स०—विलासयोगेन—विलासस्य योगस्तेन। कलहंसविभ्रमैः—कलहंसाना विभ्रमास्तै·।

विलास—dalliance. **परिश्रम**—fatigue. **स्वभाव**—habit. **निभृत**—silent. **पद**—footprint. **सैकत**—beach. **कलहंस**—swan. **विभ्रम**—sportive gait. **मन्थरम्**—sluggishly.

टी०—विलासस्य स्त्रीणामलङ्कारविशेषस्य योगेन संबन्धेन वा अथ वा परिश्रमेण परितः श्रम. परिश्रमस्तेन। स्वभावतः न तु कृत्रिमतः निभृतानि सञ्चारशब्दरहितानि कस्याश्चिद् योषितः इमानि सैकते सिकतामये

रा—(निर्वर्ण्य सहर्षम्) वत्स, किमुच्यते कस्याश्चिदिति । ननु वक्तव्यं सीतायाः पदानीति । पश्य—

समानं संस्थानं निभृतललिता सैव रचना
तदेवैतद्रेखाकमलरचितं चारु तिलकम् ।
यथा चेयं दृष्टा हरति हृदयं शोकविधुरं
तथा ह्यस्मिन् देव्या सपदि पदपङ्क्तिर्विनिहिता ॥ ११ ॥

ल—(सहर्षम्) यावदेतामेव पदपङ्क्तिमनुसरन्तौ वाल्मीकेराश्रमपदमनुसरावः । यथा चेयं प्रत्यग्रनिहिता पदपङ्क्तिस्तथा जानामि प्रत्यासन्नवर्तिन्या देव्या भवितव्यमिति ।

प्रदेशे पदानि चरणचिह्नानि कलहंसाना कादम्बाना विभ्रमा विलासास्तैस्तुल्यं मन्थरं मन्दं मन्दं प्रयान्ति गच्छन्ति ॥ १० ॥

निर्वर्ण्य विलोक्य ।

अ०—संस्थानं समानम् , सैव निभृतललिता रचना, एतद् रेखाकमलरचितं चारु तिलकं तदेव । यथा च इयं पदपङ्क्ति दृष्टा शोकविधुर हृदयं हरति तथा देव्या अस्मिन् सपदि विनिहिता ॥ ११ ॥

स०—निभृतललिता–निभृता चासौ ललिता चेति सा । रेखाकमलरचितम्-रेखाभि· निर्मितं कमलं रेखाकमलं तेन रचितम् । पदपङ्क्तिः पदानां पङ्क्तिः । शोकविधुरम्—शोकेन विधुरम् ।

संस्थान—position. **समान**—equal. **रचना**—form. **रेखाकमल**—lotus-sketch. **चारु**—beautiful. **तिलक**—mark. **पदपङ्क्ति**—line of footprints. **शोकविधुर**—afflicted with grief. **सपदि**—just now. **विनिहिता**—planted.

टी—संस्थानम् अवस्थितिः समानं तुल्यम् । निभृतललिता निभृता पूर्णा चासौ ललिता मनोहरेति सा निभृतललिता रचना । रेखाकमलरचितं रेखाभिर्निर्मितं यत् कमलं तद् रेखाकमलं तेन रचितं निर्मितं तिलकं विशेषकं चारु हृदयग्राहीति । इयं पदपङ्क्ति पदयोश्चरणयो· पङ्क्ति· श्रेणि दृष्टा विलोकिता शोकविधुरं शोकेन शुचा विधुरं व्याकुलीभूतं हृदयं चेतः हरति आकर्षयति तथा तया रीत्या देव्या सीतया अस्मिन् स्थाने प्रदेश इति वा सपदि सद्यः विनिहिता स्थापिता ॥ ११ ॥

टी०—यावदित्यवधारणार्थे । एतामेव पुरोवर्तिनीं पदपङ्क्तिं चरणराजिम् अनुसरन्तौ अनुगच्छन्तौ वाल्मीकेः आश्रमपदं वासस्थानम् अनुसराव· अनुगच्छावः । प्रत्यग्रनिहिता अभिनवस्थापिता पदपङ्क्तिः । जानामि प्रत्यासन्नवर्तिन्या अतिनिकटस्थया देव्या सीतया भवितव्यम् ।

(ततः प्रविशति सीता)

सी—निर्वर्तितं सवनम्, उपासिता सन्ध्या, हुतो हुतवहः,
णिव्वत्तिदं सवणं, उवासिदा सञ्झा, हुदो हुदवहो,
अवगाहिता भगवती भागीरथी, भगवतीं भागीरथीमुद्दिश्य ......
ओगाहिदा भगवई भाईरही, भगवई भाईरहीं उद्दिसिअ महुपदिण्णा
स्वहस्तग्रथिता कुन्दमाला समर्पिता। इदानीमहमुन्नतगम्भीरशीतलं
सहत्थगढा कुन्दमाला समप्पिदा। दाणिं अह उण्णदगंभीरसीदलं
लताजालं प्रविश्यातिथिजनोपस्थानयोग्यानि कुसुमान्यवचिनोमि।
लदाजालं पविसिअ अदिहिजणोपत्थाणजोग्गाइं कुसुमाइं ओचिणोमि।

(प्रविष्टकेनापचयं नाटयति)

ल—एषा पदपङ्क्तिः क्रमेण मार्गवशात् पुलिनतलं परित्यज्य स्थलमारूढा, प्रणष्टा च। तदिदमेव पुरस्तात्संदृश्यमानलतागुल्मप्रच्छायमतिरमणीयमध्यास्य गतश्रमौ भगवन्तं प्राचेतसमुपसर्पावः।

रा—यदभिरुचितं भवते।

(परिक्रम्योपविशत)

रा—(निःश्वस्य सबाष्पम्) वत्स वत्स—

सी—(कर्णं दत्त्वा) को नु खल्वेष सजलजलदस्तनितगम्भीरेण
को णु खु एसो सजलजलहरद्धणिदगंभीरेण
स्वरविशेषेणात्यन्तदुःखभाजनमपि मे शरीरं रोमाञ्चयति। निरूप-
सरविसेसेण अच्चंतदुक्खभाअणं वि मे सरीरं रोमाञ्चेदि। णिरू-

निर्वर्तितं समापितं सवनं स्नानम्। उपासिताऽनुष्ठिता सन्ध्या। हुतः बलिदानपुरस्सरमर्चितः हुतवहः अग्निः। अवगाहिता विलोडिता भगवती भागीरथी गङ्गा। भागीरथीमुद्दिश्य भागीरथीकृते स्वहस्तग्रथिता स्वहस्ताभ्यां स्वकराभ्यां ग्रथिता प्रोता कुन्दमाला समर्पिता उपायनीकृता। इदानीम् अधुना। उन्नतगम्भीरशीतलम् उन्नतम् उच्चम् तद् गम्भीरं गहनं शीतलं शिशिरं लताजालं वल्लीसमूहम्। अतिथिजनोपस्थानयोग्यानि अतिथिजनानाम् उपस्थानयोग्यानि उपहारोचितानि कुसुमानि पुष्पाणि अवचिनोमि।

एषेति। क्रमेण क्रमशः। मार्गवशात् अध्वनोऽनुरोधात् पुलिनतलं सैकततटस्थानं परित्यज्य उत्सृज्य स्थलं निर्जलं प्रदेशम् आरूढा। प्रणष्टा विलुप्ता। तद् इदमेव स्थानम्। पुरस्तात् अग्रतः संदृश्यमानलतागुल्मप्रच्छायं संदृश्यमाना विलोक्यमाना ये लतागुल्मा लतानां वल्लीनां गुल्माः स्तम्बास्तेषां प्रकृष्टा छाया यत्र तत् अतिरमणीयम् अतिसुन्दरम् अध्यास्य निषेव्य। गतश्रमौ गतोऽपास्तः श्रमः क्लमो ययोस्तौ भगवन्तम् आर्यं प्राचेतसं वाल्मीकिम् उपसर्पावः। अभिरुचितम्

यामि तावत् क एष इति। अथ वा न युक्तं ममाज्ञात्वा परमार्थमस्थाने
वेमि दाव को एसोत्ति। अहवा ण जुत्तं मम अजाणिअ परमत्थं अत्थाणे
दृष्टिं विसर्जयितुम्। किमत्र ज्ञातव्यम्? नावनाहयति मे शरीरं पर-
दिट्ठिं विसज्जइदु। किं एत्थ जाणिदव्वं? णावणाहयदि मे सरीरं पर-
पुरुषशब्दो रोमाञ्चग्रहणेन। सुव्यक्तं सोऽत्र निरनुक्रोशः सम्प्राप्तः।
पुरुससद्दो रोमंचग्गहणेण। सुव्वत्तं सो एत्थ णिरणुक्कोसो संपत्तो।
तन्निर्वर्णयामि। अथ वा तथा पराङ्मुखे जने एवमभिमुखीभवामीति
त णिव्वरणइस्सं। अहवा तह परंमुहे जणे एव्वं अहिमुही होमित्ति
यत्सत्यमात्मनोऽप्यहं लज्जितास्मि। तन्न प्रेक्षिष्ये। (पराङ्मुखी भूत्वा)
ज सच्चं अत्तणोवि अहं लज्जिदम्हि। ता ण पेक्खिस्सं।
कथं न प्रभवाम्यात्मनः, आवर्ज्यते मे बलात्कारेण तत्रैव दृष्टिः।
कहं ण प्पहवामि अत्ताणअस्स, आवंजिअदि मे बलक्कारेण तहिं एव्व दिट्ठी।
किमपरं करोमि आत्मनो राजपराधीनताया नियोगः। (निर्वर्णयति)
किं अवरं करेमि अत्ताणअस्स राअपराहीणदाए णिओओ
अहो दृष्ट इति परितोषः, चिरप्रवास इति मन्युः, परिक्षाम इत्युद्वेगः,
अहो दिट्ठोत्ति परिदोसो, चिरप्पवासोत्ति मण्णू, परिक्खामोत्ति उव्वेओ,

---

अभिप्रेतम्। सजलजलदस्तनितगम्भीरेण जलेन सह वर्तत इति सजलः सजल-श्चासौ जलदो मेघस्तस्य यद् स्तनितं निर्घोषस्तद्वद्गम्भीरस्तेन। स्वरविशेषेण आलापध्वनिना। अत्यन्तदुःखभाजनम् अत्यन्तम् अतिमात्रं यद् दुःखं क्लेशस्तस्य भाजनं पात्रं मे मम शरीरं देह रोमाञ्चयति आह्लादयति। निरूपयामि निश्चिनोमि। परमार्थं तत्त्वम् अज्ञात्वा न ज्ञात्वा अस्थाने अपात्रे दृष्टिं चक्षु. विसर्जयितुं पात-यितुं न युक्तम्। किमत्र ज्ञातव्यम् 'सता हि संदिग्धपदेषु वस्तुषु प्रमाणमन्त-करणप्रवृत्तय' इत्येवं मत्वाह नावनाहयतीति। परपुरुषशब्दः परस्येतरस्य पुरुषस्य शब्द आलापः रोमाञ्चग्रहणेन रोमोद्गमेन मे मम शरीरं वपु· न अवनाहयति न बन्धयति। स्वभर्तुरालापश्रवणेनैव रोमोद्गमस्य सम्भवादयं रामस्यैव स्वरविशेष इति सीताया निश्चयः। निरनुक्रोश· निर्दयः। निर्वर्णयामि विलोकयामि। अथ वेति पक्षान्तरे हेतुः। पराङ्मुखे अनभिमुखे मयि रामे अभिमुखीभवामि स्वमात्मानं दर्शयामीति यत् सत्यम् आत्मनोऽप्यहं लज्जितास्मि स्वमनसोऽपि जिह्रेमि। तत् अस्माद् हेतोः न प्रेक्षिष्ये नावलोकयिष्यामि इति। कथमिति—न प्रभवाम्यात्मनः नोत्सहे स्वमात्मानं निरोद्धुमिति। बलात्कारेण प्रसह्य तत्रैव भर्त्तरि एव दृष्टिः चक्षु· आवर्ज्यते निधीयते। आत्मन. मम। राजपराधीनताया राज्ञः पराधीनता वशवर्तित्वं राज्ञ आज्ञावहत्वम् तस्या नियोग आदेशः। निर्वर्णयति विलोकयति। दृष्टः निरीक्षित इति परितोष· मनस आह्लाद·। चिरप्रवास· चिराय प्रवासो वियोग

निरनुक्रोश इत्यभिमानः, चिरपरिचित इत्यनुरागः, दर्शनीय इत्यु-
णिरणुक्कोसोत्ति अहिमाणो, चिरपरिचिदोत्ति अणुराओ, दस्सणीओत्ति उ
त्कण्ठा, स्वामीति बहुमानः, कुशलवयोस्तात इति कुटुम्बिनीसद्भावः,
क्कण्ठा, सामित्ति बहुमाणो, कुसलवाणं तादोत्ति कुडुंबिणीसब्भावो,
अपराधं प्रवेशितास्मीति लज्जा, न जानामि आर्यपुत्रदर्शनेन कीदृशी
अवराहं पविसिदंह्मित्ति लज्जा, ण जाणामि अज्जउत्तदंसणेण कीदिसं
मवस्थामनुभवामीति ।
अवत्थं अणुभवामित्ति ।

ल—किमर्थमार्यो मामकस्मादेवामन्त्र्य वाष्पायमाननयनस्तूष्णी मधोमुखः संवृत्तः ?

रा—निःसम्पातविविक्तमिदमरण्यं तटरुहतरुच्छायासमाकीर्ण-रमणीयसैकतां प्रसन्नसलिलवाहिनीं समुद्रगामिनीञ्चावलोकयन् संस्मृत्य दण्डकावनवासमेवं वैक्लव्यमनुप्राप्तोऽस्मि ।

सी—आर्यपुत्र स्मरसि वनवासं न पुनर्वनवासिनं जनम् ।
अंअउत्त सुमरसि वणवासं ण उण वणवासिणं जणं ।

ल—किं तत्र दुःखैकवासे वनवासे स्मर्त्तव्यमिति ।

रा—वत्स लक्ष्मण ! किमेवं ब्रवीषि—दुःखैकवासे वनवासे स्मर्त्तव्यमिति । पश्य पश्य—

इति मन्यु. कोप. । परिक्षाम· दुर्बल इति उद्वेगः वैक्लव्यम् । निरनुक्रोश निर्दय इति अभिमान. गर्वः, चिरपरिचित. चिराय चिरकालं परिचित इति बहुमानोऽत्यादरः । कुटुम्बिनीसद्भावः कुटुम्बिन्या गृहिण्या. सद्भाव । अपराधं रक्षोगृहस्थितिरूपं दोषं प्रवेशिता गमितास्मीति लज्जा व्रीडा । न जानामि ज्ञातुं न शक्नोमि । आर्यपुत्रदर्शनेन आर्यपुत्रस्य रामस्य दर्शनेन कीदृशीमवस्था दशाम् अनुभवामि । किमर्थमिति-अकस्मात् अकाण्डे एव आमन्त्र्य संबोध्य बाष्पायमाणनयन. बाष्पायमाणे अश्रुपूर्णे नयने नेत्रे यस्य स । तूष्णीं मौनम् अधोमुख. नीचैर्मुख. संवृत्तः।

नि.सम्पातेति । नि.सम्पातेन जनसञ्चाराभावेन विविक्तं विजनम् इदम् अरण्यं वनम् । तटरुहतरुच्छायासमाकीर्णरमणीयसैकता तटे रोहन्तीति तटरुह ये तरव पादपास्तेषा या छाया अनातप तया समाकीर्णं व्याप्तं रमणीयं हृदयग्राहि सैकतं वालुकामयं पुलिनं यस्याः ताम् । प्रसन्नसलिलवाहिनीम्—प्रसन्नं निर्मलं यत् सलिलं वारि तस्य वाहोऽस्या अस्तीति ताम् । समुद्रगामिनीं नदीं च अवलोकयन् पश्यन् । संस्मृत्य ध्यात्वा । दण्डकावनवासं दण्डकाया दण्डकारण्ये वनवासस्तम् । एवं वैक्लव्यं व्याकुलताम् अनुप्राप्तोऽस्मि गतोस्मि । वनवासिनं जनं सहवासिनीं माम् इत्यर्थ. । दु खैकवासे दु.खस्यैव एकस्य वासो यत्र तस्मिन् ।

किसलयसुकुमारं पाणिमालम्ब्य देव्या
विविधरतिसखीभिः सङ्कथाभिर्दिनान्ते ।
चरणगमनवेगान्मन्थरस्य स्मरामि
स्नुतपयसि तटिन्याः सैकते चङ्क्रमस्य ॥ १२ ॥

सी—अयि निरनुक्रोश ! किमेतेन संलापस्थानेनाशरणं दुःखितं
अइ णिरणुक्कोस ! किं एदिणा संलावट्ठाणेण असरणं दुखिदं
जनमधिकतरं बाधसे ।
जणं अहिअदरं बाधेसि ।

ल—आर्य, अलं शोकेन ।

अ०—दिनान्ते किसलयसुकुमार देव्या. पाणिम् आलम्ब्य विविधरतिसखीभिः सङ्कथाभिः चरणगमनवेगात् स्नुतपयसि तटिन्याः सैकते मन्थरस्य चङ्क्रमस्य स्मरामि ॥ १२ ॥

सं०—दिनस्य अन्त दिनान्तस्तस्मिन् । किसलयसुकुमारम्—किसलयवत् सुकुमारम् । विविधरतिसखीभि —विविधाश्च ता रतिसख्यश्च ताभि । चरणगमनवेगात्–चरणाभ्या गमने यो वेगस्तस्मात् । स्नुतपयसि—स्नुतं पयो यस्मात् तत् तस्मिन् ।

दिनान्त—the close of the day. **किसलय**—shoots. **सुकुमार**—tender. **पाणि**—hand. **आलम्ब्य**—grasping. **विविध**—various. **रति**—love. **सङ्कथा**—conversation. **वेग**—force. **स्नुत**—out-flowing. **पयस्**—water. **तटिनी**—stream. **सैकत**—sandy. **मन्थर**—slow. **चङ्क्रम**—gait.

टी०—दिनान्ते दिनस्य अन्ते अवसानकाले किसलयसुकुमारं किसलयवत् नवपल्लववत् सुकुमारं कोमलं देव्या. सीतायाः पाणिं हस्तम् आलम्ब्य आश्रित्य विविधरतिसखीभि विविधाश्च अनेकप्रकाराश्च ता रतिसख्य. रतिकाले साहचर्यभूतास्ताभि. संकथाभिः संवादै. । चरणगमनवेगात् चरणयो. पादयोः गमने चङ्क्रमणे यो वेगो जवस्तस्मात् स्नुतं निर्गतं पयः सलिलं यस्मात् तत् तस्मिन् तटिन्या नद्याः सैकते वालुकामये प्रदेशे मन्दस्य चङ्क्रमस्य गमनस्य स्मरामि चिन्तयामि ॥१२॥

निरनुक्रोश निर्दय । संलापस्थानेन संलाप. सङ्कथा तस्य स्थानम् अवस्थितिस्तेन । अशरणं शरणरहितं जनम् अधिकतरं बाधसे अत्यर्थं पीडयसे ।

अलमिति । निष्फल. शोकः । मन्दभाग्योऽधन्यः ।

अ०—पूर्वं वनप्रवास , पश्चात् लङ्का, तत. अयं प्रवास., माम् आसाद्य सीता दुःखाद् दुःखं गता ॥ १३ ॥

रा—कथं न शोचामि मन्दभाग्यः ? पश्य पश्य—

पूर्वं वनप्रवासः पश्चाल्लङ्का ततः प्रवासोऽयम् ।
आसाद्य मामधन्यं दुःखाद् दुःखं गता सीता ॥ १३ ॥

सी—आर्यपुत्र ! निर्वासिताया असदृशम् ।
अज्जउत्त ! णिव्वासिदाए असरिसं ।

रा—हा ! जनकराजपुत्रि !

सी—अल्पपुण्यभागिन्या वर्जनीय !
अप्पपुण्णभाइणीए वज्जणीअ !

रा—हा ! वनवाससहायिनि !

सी—अप्येतन्न साम्प्रतम् ।
अवि एदं ण संपदं ।

रा—हा ! क्व गतासि ?

सी—यत्र मन्दभाग्या गच्छति ।
जहिं मदभाआ गच्छदि ।

रा—देहि मे प्रतिवचनम् ।

सी—असम्भावनीये जने कीदृशं प्रतिवचनम् ?
असंभावणीए जणे कीदिसं पडिवअणं ?

(राम शोकं नाटयति)

ल—आर्य, ननु विज्ञापयामि—अलं शोकेनेति ।

रा—कथं न शोचामि शोचनीयां वैदेहीम् ?

सी—आर्यपुत्र ! मैवं भण—शोचनीया वैदेहीति । न खलु स जनः
अज्जउत्त, मा एवं भण—सोअणीआ वैदेहित्ति । ण खु सो जणो
शोचनीयः, य एवं वल्लभेन शोच्यते ।
सोअणिज्जो जो एव्व वल्लहेण सोईअदि ।

स०—वनप्रवासः—वने प्रवासः ।

प्रवास—exile. अधन्य—unfortunate. आसाद्य—having obtained.

टी०—पूर्वं प्रथमं वनप्रवास वने अरण्ये प्रवासः स्थितिः, चतुर्दशवर्षावधि-दण्डकारण्यवास०, पश्चाद् अनन्तरं लङ्का लङ्कायां स्थितिरित्यर्थ० । ततोऽयं लोक-रञ्जनहेतोर्मयैव दत्त० प्रवास० । अधन्यं मन्दभाग्यं माम् आसाद्य प्राप्य सीता जानकी दुःखाद् दुःखं गता क्लेशात् क्लेशान्तरं प्राप्ता ॥ १३ ॥

निर्वासितायाः स्वयमेव गृहान्निष्कासिताया मम कृते असदृशम् अयुक्तम् एतत् इदं शोकप्रकटनं व्यर्थमिति भावः । अल्पपुण्यभागिन्या मन्दभाग्यया मया वर्ज-

रा—वत्स लक्ष्मण ! किं शक्यते ज्ञातुं क्व वर्तत इति ?
सी—दिवसावसानविनिवारितसमागमेव चक्रवाकी इहैव प्रवासे
दिअसाअवसाणविणिवारिदपिअसमाअमा विअ चक्कवाई इदो एव्व पवासे
वर्तते इति ।
वट्टामित्ति ।
ल—न शक्यते क्व वर्त्तत इति ज्ञातुम् ।
रा—उत्सादितं मया चिरकालाविच्छिन्नं रघुकुलम् ।
(इति रोदिति)
सी—(सशोकम्) अतिमात्रं सन्तपत्यार्यपुत्रः, किं करोमि । साहसतः
अदिमत्तं संतवदि अअउत्तो, किं करेमि । साहसादो
स्तिमितदर्शनं प्रमार्जयाम्यश्रुसंञ्चयम् (पदमुत्क्षिप्य) अथ वा जन-
तिमिददंसणं पमज्जामि अस्सुचअं । अहवा जण-
प्रवादो रक्षितव्यः । आर्यपुत्रेण यावन्न प्रेक्ष्ये तावच्छोकावेग-
प्पवादो रक्खिदव्वो । अअउत्तेण जाव न पेक्खामि दाव सोआवेअ-
बलात्कारिता न प्रभवाम्यात्मनः । मुनिजनसम्पातसमुचितो-
बलक्कारिदा ण प्पहवामि अप्पाणअस्स । मुणिजणसंपादसमुइदो
ऽयमुद्देशः, अतो यदृच्छागतः कोऽपि मां प्रेक्षिष्यते, तदेतेन
एसो उद्देसो । अदो जइच्छागदो को वि मं पेक्खिस्सदि । ता एदिणा

-नीय परिहरणीय । वनवाससहायिनि दण्डकारण्ये सहस्थायिनि । अप्येतन्न साम्प्रत-मिति ।' साम्प्रतम् एकाकिन्या एव वनवासत्वात् वनवाससहायिनीत्यामन्त्रण न सङ्घटते । प्रतिवचनम् उत्तरम् । असम्भावनीये अविश्वसनीये । शोचनीया शोकार्हा । या स्त्री वल्लभेन विरहे शोच्यते सा शोचनीया न । दिवसावसानेति । दिवसस्य दिनस्यावसानेऽस्तमनसमये विनिवारित दूरीकृत· समागम सहावस्थिति· यस्याः सा । चक्रवाकस्य रथाङ्गस्य स्त्री चक्रवाकी इहैव अत्रैवारण्ये प्रवासे विरहे वर्तते । उत्सादितम् उन्मूलित चिरकालाविच्छिन्नं चिरकालात् दीर्घकालात् अविच्छिन्नं संततम् रघुकुलं रघो· कुल वंशः । अतिमात्रम् अत्यन्तं सन्तपति सन्तापमनुभवति । साहसतः बलात् स्तिमितदर्शनं स्तिमिते अस्पष्टे कृते दर्शने चक्षुषी येन तम् । अश्रुसंचयम् अश्रूणा नेत्रजलाना सञ्चयं समूहं प्रमार्जयामि प्रोञ्छामि । जनापवादः लोकनिन्दा रक्षणीयः परिहर्त्तव्य· । शोकावेगबलात्कारिता शोकस्य शुच आवेगोऽतिरेकस्तेन यो बलात्कार· स सञ्जातोऽस्या इति तथा-भूताहम् आत्मनः न प्रभवामि स्वात्मानं नियन्तुम् अक्षमा । मुनिजनसम्पातसमु-चितः मुनिजनस्य ऋषिवर्गस्य सम्पात आगमनं तस्य समुचितो योग्योऽयम् उद्देश· प्रदेश । यदृच्छागत· यदृच्छया अकस्मात् आगत· कोऽपि तापस मां प्रेक्षि-ष्यते विलोकयिष्यति । लताजालप्रच्छन्नसुखसञ्चारेण—लताना वल्लीना जालं

लताजालप्रच्छन्नसुखसञ्चारेण मार्गेणाश्रमं गत्वा कुशलवौ
लदाजालपच्छण्णसुहसंचारेण मग्गेण अस्समं गदुअ कुसलवा
सम्भावयामि।
संभावइस्सं।

(नाट्येनावलोकयन्ती निष्क्रान्ता)

(ततः प्रविशति ऋषिः)

ऋ—आदिष्टोऽस्मि भगवता वाल्मीकिना—वत्स बादरायण! श्रुतं मया लक्ष्मणसहायो रामभद्रस्तपोवनमिदमनुप्राप्त इति। स कदाचिन्माध्याह्निककार्यसम्पादनव्यग्रानस्मान्मन्यमानो बहिरवस्थितो भवेत्। तस्मात्त्वमेनमुपक्रम्य परिसमाप्तमाध्याह्निककार्यं दर्शनमाकाङ्क्षमाणं मामावेदय—इति। तद्यावदहमपि भगवतो वाल्मीकेरादेशाद्राममेवान्वेषयामि।

(परिक्रामति)

ल—(विलोक्य ससम्भ्रमम्) **आर्य! तपोधनोऽयमित एवाभिवर्त्तते।**

(रामोऽश्रूणि प्रमृज्य कृतधैर्यः स्थितः)

ऋ—(निर्वर्ण्य) **अये! लतागुल्मप्रच्छाये ऽस्मिन् पुरुषयुगलमिव। अपि नाम लक्ष्मणसहायो रामो भवेत्।** (परिचिन्त्य) **कस्तत्र सन्देहः—**

मन्दं वाति समीरणो न परुषा भासो निदाघार्चिषो
न त्रस्यन्ति चरन्त्यशङ्कमधुना मृग्योऽपि सिंहैः सह।

समूहस्तेन प्रच्छन्नः प्रगुप्तः सुखेन सञ्चारो गतागतं यत्र तेन मार्गेणाध्वनाऽऽश्रमं गत्वा कुशलवौ सम्भावयामि तयोः पालनायोचितं कर्माचरामीति वक्तुरभिप्रायः।

टी०—आदिष्टोऽस्मि आज्ञप्तोऽस्मि भगवता पूज्येन वाल्मीकिना महाकविना। बादरायण बदरस्यापत्यं बादरायणस्तत्संबुद्धौ। श्रुतम् आकर्णितं मया। लक्ष्मणसहायः लक्ष्मणः सहायो यस्य सः। रामभद्रः रामचन्द्रः। माध्याह्निककार्यसम्पादनव्यग्रान् मध्यम् अह्नः मध्याह्नः मध्याह्ने भवं माध्याह्निकं माध्याह्निकञ्च तत्कार्यं माध्याह्निककार्यं तस्य सम्पादनम् अनुष्ठानं तस्मिन् व्यग्रा लग्नास्तान् अस्मान् मन्यमानः। उपक्रम्य प्राप्य। परिसमाप्तमाध्याह्निककार्यं परिसमाप्तं समाप्तिं नीतं माध्याह्निकं मध्याह्ने भवं कार्यं येन सः तम्। आकाङ्क्षमाणम् इच्छन्तम् आवेदय कथय। आदेशात् कथनात् आज्ञया वा। तपोधनस्तपस्वी। प्रमृज्य प्रोञ्छ्य। कृतधैर्यः कृतं धैर्यं येन सः।

लतागुल्मप्रच्छाये वल्लरीसङ्घशीतले प्रदेशे पुरुषयुगलं मनुष्यद्वन्द्वम् इव। लक्ष्मणसहायः लक्ष्मणः सहायो यस्य सः। विचिन्त्य विचार्य। सन्देहः संशयः।

मध्याह्नेपि न याति गुल्मनिकटं छाया तदध्यासिता
व्यक्तं सोऽयमुपागतो वनमिदं रामाभिधानो हरिः ॥ १४ ॥

न केवलमतिक्रान्तमानुषेण प्रभावेण, आकारेणापि शक्यत एव निश्चेतुम्। (निर्वर्ण्य)

व्यायामकठिनः प्रांशुः कर्णान्तायतलोचनः।
व्यूढोरस्को महाबाहुर्व्यक्तं दशरथात्मजः ॥ १५ ॥

अ०—समीरण. मन्दं वाति, निदाघार्चिष भास परुषा न। अधुना मृग्यः अपि सिंहैः सह अशङ्कं सञ्चरन्ति। तदध्यासिता छाया मध्याह्ने अपि गुल्मनिकटं न याति। स. अयं रामाभिधान हरिः इदं वनम् उपागत (इति) सुव्यक्तम् ॥ १४ ॥

समीरण—breeze. **वाति**—blows. **निदाघार्चिष्**—summer sun. **परुष**—oppressive. **अशङ्कम्**—confidently. **सञ्चरन्ति**—roam about. **अध्यासित**—resorted to. **छाया**—shade. **मध्याह्न**—mid-day. **गुल्म**—hedge. **निकट**—close. **सुव्यक्त**—obvious.

टी०—समीरण. पवन मन्दं शनै वाति प्रचलति। निदाघार्चिष निदाघे ग्रीष्मसमये अर्चिष. तेजसः सूर्यस्येति यावत् भासः दीप्तयः परुषाः कठोरा न। अधुना इदानीं मृग्यः हरिण्य सिंहै मृगास्रै. सह सार्द्धम् अशङ्कं निर्भयं चरन्ति यान्ति। न त्रस्यन्ति न बिभ्यति। तदध्यासिता तेन रामेण अध्यासिता आश्रिता छाया अनातप मध्याह्नेपि दिवसस्य मध्यभागेऽपि गुल्मस्य स्तम्बस्य निकटं समीपं न याति न गच्छति। रामाभिधान रामाख्य. । अतो राम एवायमन्यथा समीरणादीना मन्दगत्यादिकं न स्यादिति ॥ १४ ॥

टी०—अतिक्रान्तमानुषेण मानुषान् अतिक्रम्य वर्तत इत्यतिक्रान्तमानुषस्तेन प्रभावेण। आकारेण आकृत्या अपि निश्चेतुम् अनुमातुं शक्यते। निर्वर्ण्य विलोक्य।

अ०—व्यायामकठिनः, प्रांशुः, कर्णान्तायतलोचनः, व्यूढोरस्क., महाबाहुः, (अयं) व्यक्तं दशरथात्मज. (एव)॥ १५ ॥

निदाघार्चिष —निदाघेऽर्चि निदाघार्चिस्तस्य। गुल्मनिकटम्—गुल्मस्य निकटम्। तदध्यासिता—तेन अध्यासिता।

स०—व्यायामकठिनः—व्यायामेन कठिन·। कर्णान्तायतलोचन·—कर्णान्तम् आयते लोचने यस्य स। व्यूढोरस्क.—व्यूढम् उरो यस्य स.। महाबाहु·—महान् बाहुर्यस्य सः। दशरथात्मज —दशरथस्य आत्मज.।

व्यायाम—exercise. **कठिन**—hardened. **कर्णान्त**—corner of ear. **आयत**—broad. **लोचन**—eye. **व्यूढोरस्क**—broad-chested. **महाबाहु**—long-armed. **आत्मज**—son.

तदेनमुपगम्य यथावस्थितमावेदयामि। (उपागम्य) राजन्, स्वस्ति।

रा—अभिवादये।

ऋ—विजयी भव।

रा—किमागमनप्रयोजनमार्यस्य?

ऋ—परिसमाप्तसकलकर्मा भगवान् वाल्मीकिर्महाराजस्यागमनमुद्वीक्षमाणस्तिष्ठति।

रा—(विलोक्य) अये! अतिक्रान्तो मध्याह्नः। तथाहि—

प्रविश्य तरुमूलानि नीत्वा मध्यन्दिनातपम्।
अध्वनीना इव छाया निर्गच्छन्ति शनैः शनैः॥ १६॥

अपि च—

मध्याह्नार्कमयूखतापमधिकं तोयावगाहादयं
नीत्वा वारिकणार्द्रकर्णपवनैराह्लाद्यमानानन।

टी०—व्यायामेन शारीरिकेण परिश्रमेण कठिन कठोराङ्ग प्रांशुरुन्नत कर्णान्तायतलोचनः कर्णयो श्रवणयोरन्तो तदवधि आयते विस्तृते लोचने यस्य स महाभुज व्यक्त स्पष्टम् अयं दशरथस्य आत्मज पुत्र. ॥ १५॥

टी०—उपगम्य उपसृत्य। यथावस्थितम् आवेदयामि कथयामि। आगमनप्रयोजनम् आगमनस्य प्रयोजनम् अभिप्रायः। परिसमाप्तसकलकर्मा परिसमाप्तानि समापितानि सकलानि सर्वाणि कर्माणि कार्याणि यस्य स.। उदीक्षमाणः प्रतीक्षमाणः। अतिक्रान्त. गत. मध्याह्न. दिवसस्य मध्यभाग.।

अ०—तरुमूलानि प्रविश्य मध्यन्दिनातप नीत्वा छाया. अध्वनीना इव शनै. शनै. निर्गच्छन्ति॥ १६॥

स०—तरुमूलानि–तरूणा मूलं तरुमूलं तानि। मध्यन्दिनातपम्—मध्यन्दिनस्य आतप· मध्यन्दिनातपस्तम्।

तरुमूल—the roots of the tree. प्रविश्य—entering. मध्यन्दिन—mid-day. आतप—heat. छाया—shade. अध्वनीन—traveller. शनैः शनै—gradually. निर्गच्छन्ति—recede.

टी०—तरूणा वृक्षाणा मूलानि अध.प्रदेशास्तान् प्रविश्य मध्यन्दिनातपं मध्यन्दिनस्य आतपं प्रकाश द्योतं वा नीत्वा गमयित्वा अध्वनीना पथिका इव छाया. शनै· शनैर्मन्दं मन्दं निर्गच्छन्ति। यथा पथिको मध्यन्दिनातपोत्तप्त तरुमूलानि निषेव्य मध्याह्नोत्तरमपसरति तद्वच्छायापि मध्यन्दिने तरुमूलं प्रविश्य मन्दातपे सूर्ये शनैः शनैर्निर्गच्छति॥ १६॥

अ०—करघातझाङ्कृतिसरित्कल्लोलचक्र. अयं करी वारिकणार्द्रकर्ण-

मन्दं मन्दमुपैति कूलमधुना वक्षःप्रणुन्नैर्जलै-
राक्रान्तं करघातझाङ्कृतिसरित्कल्लोलचक्र करी ॥ १७ ॥

(इति निष्क्रान्ता सर्वे)

तृतीयोऽङ्क ।

पवनै. आह्लाद्यमानानन मध्याह्नार्कमयूखतापम् अधिक तोयावगाहात् नीत्वा वक्ष.प्रणुन्नै जलै आक्रान्त कूलम् अधुना मन्दं मन्दम् उपैति ॥ १७ ॥

स०--करघातझाङ्कृतिसरित्कल्लोलचक्र -करस्य ये घातास्ते करघातास्तैर्या झाङ्कृति. सास्ति यत्र सा सरित्तस्या ये कल्लोलास्तेषा चक्र यस्य स । वारिकणार्द्रकर्णपवनैः वारिण कणै. आर्द्रौ यौ कर्णौ तयो पवनास्तै । आह्लाद्यमानानन· आह्लाद्यमानम् आनन यस्य स । मध्याह्नार्कमयूखतापम्—मध्याह्नस्य अर्कः मध्याह्नार्कस्तस्य तापस्तम् । तोयावगाहात्—तोये अवगाह तोयावगाहस्तस्मात् । वक्षःप्रणुन्नै.—वक्षसा प्रणुन्नानि (प्रकर्षेण नुन्नानि) वक्ष प्रणुन्नानि तैः ।

कर—trunk. **घात**—stroke. **झाङ्कृति**—splashing sound. **सरित्**—stream. **कल्लोल**—billow. **चक्र**—circle. **करी**—elephant. **वारि**—water. **कण**—spray. **आर्द्र**—drenched. **कर्णपवन**—ear-breeze. **आह्लाद्यमान**—made happy. **आनन**—countenance. **मध्याह्न**—mid-day. **अर्क**—sun. **मयूख**—ray. **ताप**—heat. **तोय**—water. **अवगाह**—ducking. **वक्षस्**—breast. **प्रणुन्न**—propelled. **आक्रान्त**—flooded. **मन्दम्**—slowly.

टी०—करस्य शुण्डादण्डस्य घातै ताडनैः या झाङ्कृति· झाङ्कारः साऽस्ति यत्र तथाभूता या सरिन्नदी तस्याः कल्लोलानामूर्मीणा चक्रं मण्डल यस्य स । करी हस्ती । वारिकणार्द्रकर्णपवनैः वारिण जलस्य कणै विन्दुभि आर्द्रौ क्लिन्नौ यौ कर्णौ श्रवणौ तयो. पवनै वायुभि· आह्लाद्यमानं प्रसाद्यमानम् आननं वदनं यस्य स । मध्याह्नस्य मध्यन्दिनस्य योऽर्क सूर्यस्तस्य ये मयूखा अंशवस्तेषा तापस्तम् । अधिकमतिमात्रं तोयावगाहात् तोयस्य जलस्यावगाहनं विलोडनं तस्मात् नीत्वा प्रशमय्य वक्ष.प्रणुन्नै वक्षसा उर.स्थलेन प्रणुन्नै प्रकर्षेण नुन्नैरितस्तत ईरितैः जलै वारिभिराक्रान्तं व्याप्तं कूलं तटम् अधुना साम्प्रतं मन्दं मन्दं शनै· शनैरुपैति समायाति ॥ १७ ॥

अथ चतुर्थोऽङ्कः ।

(तत प्रविशति तापसीद्वयम्)

प्रथमा—हला यज्ञवेदि ! रामायणसङ्गीतकनिमित्तं वाल्मीकितपोवनं
हला जण्णवेदि ! रामायणसङ्गीतअणिमित्त वमीइतपोवणं
संप्राप्तया तिलोत्तमयाहमेवं भणिता—अहं प्रभावनिर्मितेन
सपत्ताए तिलुत्तमाए अहं एव्वं भणिदा—अहं पहावणिमिदेन
सीतारूपेण रामस्य दर्शनपथमवतीर्य रामः सीतया उपरि
सीदारूवेण रामस्स दसणपहं ओअरिअ रामो सीदाए उवरि
सानुकम्पो नवेति ज्ञातुं न्विच्छामि ! तत्त्वं राममन्वेषय
साणुकंपो ण वेत्ति जाणिदुं णु इच्छामि ! ता तुमं रामं अण्णेसहि
—इति । तद्दर्शयतु प्रियसखी रामस्य विश्रमस्थानम् ।
—त्ति । ता दंसेदु पियसही रामस्स विस्समत्थाणम् ।

यज्ञवेदिः—हला वेदवति! तिलोत्तमया यदैष आलापः प्रवृत्तस्तदासन्न-
हला वेदवदि ! तिलुत्तमाए जदा एसो आलावो पवुत्तो तदा आसण्ण-
गुल्मलतागहनप्रच्छन्नस्थितेन रामवयस्येनार्यहसितेन
गुम्मलदागहणपच्छण्णठ्ठिदेण रामवयस्सेण अअहसिएण
सर्वमाकर्णितम् ।
सव्वं आअण्णिदं ।

वेदवती—अत्याहितं खल्वाचरितम् । यदि गृहीतसङ्केतस्य तस्या-
अच्छाइदं खु आअरिदं । जइ गहिदसंकेअस्स तस्स

टी०—तत प्रविशतीति । तापसीद्वयं तापस्योर्द्वयम् । हलेत्यामन्त्रणेऽव्ययम् । रामायणसङ्गीतकनिमित्तं रामायणस्य वाल्मीकिमुनिप्रणीतस्य रामकथासंबद्धस्य काव्य-विशेषस्य यत्सङ्गीतकं नृत्यवाद्यगीतत्रयात्मकं तन्निमित्तं तदर्थम् । सङ्गीतमेव सङ्गीतकं स्वार्थे क । तल्लक्षणं सङ्गीतरत्नाकरे 'नृत्त गीतं तथा वाद्यं त्रयं सङ्गीतमुच्यते । वाल्मीकितपोवनं वाल्मीकिमुनेस्तपोवनमाश्रमं सम्प्राप्तया उपागतया तिलोत्तमया भणिता उक्ता । किमित्याह—अहमिति । प्रभावेण दिव्यशक्त्या निर्मितेन कृतेन सीताया जानक्या रूपम् आकृतिस्तेन रामस्य दर्शनपथं दर्शनस्य पन्थानं दृष्टि-मार्गम् अवतीर्य प्राप्य सानुकम्प. अनुकम्पा दया तया सह वर्तत इति सानुकम्प' । नु इति निश्चये । तत् तस्माद्धेतो त्वं रामम् अन्वेषय । विश्रमस्थानं राम-स्थितिप्रदेशमित्यर्थ. ।

आलाप. आभाषणं प्रवृत्तः । तदा तस्मिन् समये आसन्नगुल्मलतागहनप्रच्छन्न-स्थितेन आसन्ने निकटवर्तिनि गुल्माना लतानाञ्च गहने वने प्रच्छन्नं सुगुप्तं यथा

अग्रतस्तिलोत्तमा सीतायाश्चरितान्यनुवर्त्तिष्यत इति
अग्गदो तिलुत्तमा सदिाए चरिदाइं अणुवट्टिसदित्ति
ततो विपरीत उपहासो भवेत् । तदस्मात् प्रियसखीं
तदो विपरीदो उवहासो भवे । ता इमादो पिअसहिं
तिलोत्तमां निवारयामि ।
तिलुत्तमं णिवारेमि ।

य—सखि वेदवति ! सीतेदानीं कुत्र ?
सहि वेदवदि ! सीदा दाणिं कहिं ?

वे—शृणु, अद्य सप्तमे दिवसे संपातिताभिस्तपोवनवासिनीभिर्विज्ञा-
सुणाहि अज्ज सत्तमे दिवहे संपादिदाहि तपोवणवासिणीहि विराण-
पितो भगवान् वाल्मीकिः—एषा नूनमाश्रमदीर्घिका पद्मापचया-
विदो भअवं वमीई— एसा णूणं अस्समदीहिआ पदुमापचया-
दिष्वात्मन उपभोगेष्विदानीं महाराजस्य सन्निधानेन पर-
दिसु अत्तणो उपभोएसु दाणिं महाराअस्स सण्णिहाणेण पर-
पुरुषनयनपरिक्षिप्ता न शक्या स्त्रीजनेनावगाहितुम्—इति । तदा
पुरुसणअणपरिखित्ता ण सक्का इत्थिआजणेण ओगाहिदुंति । तदा

स्यात्तथा स्थितेन रामवयस्येन राममित्रेण आर्यहसितेन हसिताख्येन विदूषकेन, विदूषकस्य ब्राह्मणत्वादार्येतिविशेषणम्, आर्येति ब्राह्मणं ब्रयादिति भरतः । सर्वम् अखिलम् आकर्णितं श्रुतम् । अत्याहितं महदनिष्टम् आचरितं कृतम् । गृहीतसङ्केतस्य गृहीत· ज्ञात इत्यर्थ सङ्केतोऽभिप्रायस्तिलोत्तमाकर्तृकसीतारूपग्रहणात्मको येन स तस्य रामस्य अग्रत· समक्षं तिलोत्तमा यदि सीतायाश्चरितानि कृतानि अनुवर्त्तिष्यते अनुकरिष्यति ततो विपरीतो विरुद्ध उपहासो भवेत्, तद् यथा न स्यादिति अस्माद् व्यापारात् प्रियसखीं प्रियवयस्या तिलोत्तमा निवारयामि ।

शृणवति । सम्पातिताभिः सङ्गताभि तपोवनवासिनीभिः विज्ञापितो निवेदितः भगवान् वाल्मीकि· । आश्रमदीर्घिका आश्रमे दीर्घिका वापी, पद्मापचयादिषु पद्माना कमलानामपचयः पुञ्जीकरणं तेषु आत्मनः स्वस्य उपभोगेषु महाराजस्य राज्ञो रामस्य सन्निधानेन सन्निहितत्वात् परपुरुषनयनपरिक्षिप्ता परपुरुषाणामितरजनाना नयनैर्दर्शनै· परिक्षिप्ताऽऽकुलिता व्याप्तेति यावत्, न शक्या नैवार्हा स्त्रीजनेन नारीजनेनावगाहितुं स्नातुम् । निध्याननिश्चलनयनेन नितरा ध्यानं तेन निश्चले नयने लोचने यस्य सः तेन । मुहूर्तं क्षणं निध्याय ध्यात्वा भणितम् उक्तम् । पुरुषनयनानाम् । मनुष्यनेत्राणाम् अगोचरः अविषय· । तत· प्रभृति मुनिनिर्देशादारभ्य । अत्र तत्र इति शब्द· 'तत्र आदौ कथान्तरे' इति हेमचन्द्रोक्त· आद्यर्थे रूढो नोपादेयः, अर्थासङ्गतिवशात् । तत इति तच्छब्दात्पञ्चम्यन्तात्तसिल् 'कार्तिक्याः प्रभृतीति

भगवता वाल्मीकिना निध्याननिश्चलनयनेन मुहूर्त्तं निध्याय भणि-
भअवदा वंमीइणा णिज्झाणणिच्चलणअणेण मुहुत्तं णिज्झाइअ भणि-
तम्—एतस्यां दीर्घिकायां वर्तमानः स्त्रीजनः पुरुषनयनाना-
दं— एदस्सि दीहिआए वट्टमाणो इत्थिआजणो पुरुसणअणाणं
मगोचरो भविष्यति—इति । ततः प्रभृति सीता रामस्य दर्शनपथं
अगोअरो भविस्सदित्ति । ततप्पउदि सीदा रामस्स दंसणपहं
परिहरन्ती दीर्घिकातीरे सकलं दिवसमतिवाहयति ।
परिहरंती दीहिआतीरे सअल दिवअ अदिवाहेदि ।

य—किं जानीतः कुशलवौ रामस्यात्मनश्च सम्बन्धम् ?
किं जाणन्ति कुसलवा रामस्स अत्तणो अ सवव ?

वे—आत्मनो बालभावेन मुनिजनस्य च संसर्गेण मातरमपि नामतो
अत्तणो बालभावेण मुणिजणस्स अ ससग्गेण मादरं वि णामदो
न जानीत, किमुत दीर्घप्रवासविच्छिन्नं रामस्य वृत्तान्तम् ।
ण जाणन्ति, किं उण दीहप्पवासविच्छिण्णं रामस्स उत्तन्तम् ।

य—किं जानासि रामोऽत्र तपोवनं प्राविशदिति ?
किं जाणासि रामो एत्थ तपोवणं पाविसदित्ति ?

वे—कुतस्तस्यागमः ?
कुदो तस्स आअमो ?

य—गच्छ त्वं तिलोत्तमासकाशम्, अहं च सीतायाः पार्श्वपरि-
गच्छ तुमं तिलुत्तमाए सआसं, अहं अ सीदाए पस्सपरि-
वर्तिनी भवामि ।
वट्टिणी होमि ।

(इति निष्क्रान्ते)

(प्रवेशकः)

भाष्यप्रयोगात् प्रभृतिशब्दयोगे । दर्शनपथं दृष्टिमार्गं परिहरन्ती परित्यजन्ती । दीर्घिकातीरे वापीतटे अतिवाहयति नयति ।

बालभावेन शिशुभावेन । मुनिजनस्य संसर्गेण संबन्धेन । दीर्घप्रवासविच्छिन्नं दीर्घेण चिरकालिकेन प्रवासेन परदेशावस्थित्या विच्छिन्नं त्रुटितं वृत्तान्तं वार्त्ताम् । पार्श्वपरिवर्त्तिनी भवामि निकटस्थायिनी भवामि समीपं यामीत्यर्थः । प्रवेशक । अत्र नीरसस्य वस्तुविस्तरस्य संसूचनाय यज्ञवतीविद्वतीपात्रयो प्रवेशोऽभीष्टः । एवञ्च दशरूपके 'नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तर' इत्यनेन सूच्यवस्तु निरूप्य तन्निरूपणप्रकार 'अर्थोपक्षेपकै सूच्यं पञ्चभि प्रतिपादयेत् । विष्कम्भचूलिका-ङ्कास्याङ्कावतारप्रवेशकैः' इत्यादिना प्रतिपादितः । तत्र प्रायो विष्कम्भसदृश एव

(ततः प्रविशत्युत्तरीयकृतप्रावरणा सीता यज्ञवती च)

य—सखि वैदेहि, केन तवोपदिष्टमपूर्वमुत्तरीययुगलधारणम् ?

सहि वैदेहि, केण तुह उवदिट्ठं अपुव्वं उत्तरीअजुअलधारणं ?

सी—अत्यन्तशीतलेन तरङ्गवाहिना दीर्घेण दीर्घिकामारुतेन ।

अच्चन्तसीअलेण तरङ्गवाहिणा दीहेण दीहिआमारुदेण ।

य—सखि, प्रवासविरुद्धं खल्वेतच्छारदचन्द्रकिरणराशिपरि-

सहि, पवासविरुद्धं खु एद सारदचंदकिरणरासिपरि-

पाण्डुरं सुरभिबहुलामोदसमारब्धमधुकरकुलसङ्गीतमनोहर-

पडुर सुरहिबहुलामोदसमारद्धमहुअरउलसंगीदमणुहर

मेतत्प्रावरणम् ।

एदं पावरणं ।

सी—सखि, यदाहं महाराजशासनेन वनप्रवासे परित्यक्ता चित्रकूटं

सहि, जदा अहं महाराअसासणेण वणप्पवासे परिच्चत्ता चित्तऊटं

परित्यज्य दक्षिणापथं प्रस्थिता तदा चिरनिवाससमुत्पन्नसखी-

परिच्चइअ दक्खिणापहं पत्थिदा तदा चिरणिवाससमुप्पण्णसहि-

प्रवेशकः, तदपि तत्रैव 'वृत्तवर्तिष्यमाणाना कथांशाना निदर्शकः संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजित ' इति विष्कम्भलक्षणमुक्त्वा 'तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजित. । प्रवेशोऽङ्कद्वयस्यान्त· शेषार्थस्योपसूचक' इति विष्कम्भलक्षणापवादकत्वेन प्रवेशकलक्षणं दर्शितम् । भरतोऽप्याह 'नोत्तममध्यमपुरुषैराचरितो नाप्युदात्तवचनकृतः। प्राकृतभाषाकार· प्रवेशको नाम विज्ञेय.' । एतच्च सर्वं रत्नावलीप्रभायां निरूपितं नारायणपादैः । एवं प्रवेशकेन सूचितप्रवेशा सीता प्रविशतीत्याह ।

उत्तरीयकृतप्रावरणा उत्तरीयेण कृतं प्रावरणम् आच्छादनं यया सा । उपदिष्टम् अपूर्वम् अद्भुतम् उत्तरीययुगलधारणम् उत्तरीययुगलस्य दुकूलद्वयस्य धारणम् । अत्यन्तशीतलेन अत्यन्तम् अतिमात्रं शीतलेन शिशिरेण तरङ्गवाहिना तरङ्गेभ्यो वीचिभ्य वाहिना वहनशीलेन तरङ्गसंसर्गवतेत्यर्थ. । दीर्घेण दीर्घकालं प्रवहता दीर्घिकामारुतेन दीर्घिकाया वाप्या मारुतः पवनस्तेन ।

प्रवासविरुद्धं प्रवासे विरहदशाया विरुद्धं विपरीतम् । शरदि भव· शारदो यश्चन्द्र· शशिस्तस्य यः किरणानां राशि समूहस्तद्वत् परिपाण्डुरं धवलम् । सुरभिः इष्टगन्धः स चासौ बहुल· प्रभूतः आमोदश्च, 'आमोदो गन्धहर्षयोः' इति मेदिनी, तेन समारब्धं प्रवृत्त मधुकरकुलेन मधुकराणा भ्रमराणा कुलं समूहस्तेन यत् सङ्गीतं तेन मनोहरं सुन्दरम् एतत् प्रावरणम् आच्छादनम् उत्तरीयम् ।

महाराजशासनेन महाराजो दशरथस्तस्य शासनमाज्ञा तेन । चित्रकूटं तदाख्यं गिरिं परित्यज्य त्यक्त्वा दक्षिणापथं दक्षिणगामिनमध्वानं प्रस्थिता प्रच-

स्नेहया चिन्ताकुलया वनदेवतया मायावत्या स्मरणनिमित्तं चन्द्र-
सिणेहाए चिन्ताउलाए वणदेवदाए मायावईए सुमरणणिमित्तं चंद-
धवलं वासितसुगन्धमात्मनो दिव्यमुत्तरीयकं मम प्रणीतम्।
धवलं वासिदसुअधं अत्तणो दिव्वं उत्तरीअअं मम पणीदं।
तदार्यपुत्रस्य ममापि हस्तेऽत्यन्तसखीभूतं चिरदुःखसहायमित्य
तं अअउत्तस्स मम वि हत्थे अच्चन्तसहीभूदं चिरदुखसहायत्ति एत्थ
आत्मना सादरं धारितम्। (इति रोदिति)
अत्ताइं साअरं धारिदं।

य—सखि, मा रोदीः, नह्येष तपोवनवासो वनवास इति प्रोच्यते।
सहि, मा रोदी, णहि एसो तपोवणवासो वणवासोत्ति पुच्चिअदि।

सी—कथं न रोदिष्यामि ? कथमेतत्तपोवनमागत आर्यपुत्र इति
कहं ण रोइस्सं ? कहं एदं तपोवण आअदो अअउत्तोत्ति
द्विगुण . . .. .धारयामि। एकाकिनी दीर्घनिःश्वासै-
दिउण विद्धारं आस सअणं पत्थरेमि। एआइणी दीहणीसासेहिं
रात्रिन्दिवमतिवाहयामि। तद्बलवत् खलु आवेगकारणम्।
रत्तिदिवं अदिवाहेमि। ता बलियं खु आविअकारणं।

य—आलक्षणीयानि एतानि कदनानि। त्वमेतस्मिन् दीर्घिका-
आलक्खणीआइ एदाणि कदणाणि। तुमं एतस्सिं दीहिआ-

लिता। चिरनिवाससमुत्पन्नसखीस्नेहया चिरनिवासेन चिरकाल सहवासेन समुत्पन्नः सञ्जात· सख्याः स्नेह· प्रीतिर्यस्याः सा तया। चिन्ताकुलया चिन्तया आकुला चिन्ताकुला तया। स्मरणनिमित्तं स्मरणार्थं चन्द्रधवलं चन्द्र इव धवलं शुभ्र वासितसुगन्धं वासितः प्रवेशित· सुष्ठुगन्धो यत्र तत्। दिव्यं लोकोत्तरं प्रणीतं कृतम्। अत्यन्तसखीभूतम् अत्यन्तं सख्यतां गतम्। चिरदुखसहायं चिराय दुःखेऽपि सहायम्। सादरं सप्रेम आत्मना धारितं मया परिहितम्।

मा रोदी अश्रुपातं न कुरु। तपोवनवास· तपोवने वाल्मीकिमुनेराश्रमे वास· स्थिति·। दीर्घनि·श्वासै दीर्घैरतिविस्तृतिं गतैः नि·श्वासैः रात्रिन्दिवं दिवारात्रं, नक्तन्दिवम् अतिवाहयामि गमयामि। बलवत् प्रबलम् आवेगस्य क्षोभस्य कारणं हेतुः। आलक्षणीयानि अनुभवितव्यानि कदनानि दुःखानि। विहङ्गममिथुनविभ्रमं विहङ्गममिथुनस्य पक्षिद्वन्द्वस्य विभ्रमं विलासम् अवलोकयन्ती पश्यन्ती आत्मानं चेतः विनोदय प्रसादय। 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेणे'ति नियमेन मर्त्यस्य कदाचिद् दुःखं कदाचित्सुखम्। यथा चक्रवाकमिथुनस्य रात्रौ वियोगो दिवसे सङ्गतिस्तथैव तवापि प्रवासः क्षणिक एव। अहमपि आत्मनो नियोगं स्वकर्त्तव्यम् अनुतिष्ठामि पालयामि।

तीरे विहङ्गममिथुनविभ्रममवलोकयन्त्यात्मानं विनोदय,
तीरविहगममिहुणविभमं अवलोअअन्ती अत्ताणं विणोदेहि ।
अहमप्यात्मनो नियोगमनुतिष्ठामि । (परिक्रामति)
अह वि अत्तणो णिओअ अणुचिट्ठामि ।

सी—(दीर्घिकामालोक्य) अतिधन्यं खल्वेतद्राजहंसमिथुनमेवमनासा-
अइधण्ण खु एदं राअहसमिहुणं एवं अणासा-
दितविरहं समागमसुखमनुभवतीति । नास्ति दम्पत्योर्मम
दिअविरहं समाअमसुहं अणुहोदित्ति णत्थि दंपईणं मम
विरहसम उपदेशनिपुण उपाध्यायः, येन पक्षिणोपि अन्यो-
विरहसमो उपदेसणिउणो उपज्झायो, जेण पक्खिणो वि अण्णो-
न्यहृदयग्रहणसमर्थललितमधुराश्चाटुप्रयोगं प्रस्थापयन्ति
ण्णहिअअग्गहणसमत्थललिअमहुरा चाडुप्पओअं पत्थावयन्ति ।

य—(निर्वर्ण्य) यथैष ससम्भ्रमतत्क्षणविमुक्तासनः परिग्रहांसदेश-
जह एसो ससंभमतक्कणविमुत्तासणो परिग्गहअंसदेस-
समुत्क्षिप्तवल्कलः विस्मयोत्फुल्ललोचनः सर्व एव
समुक्खित्तवक्कलो सुअसंभमणपाउवो विंमयोफुल्ललोअणो सव्वो जेव
.... मुनिजन एकमुखकोपसृतस्तथा जानामि सम्प्राप्तेन
(एव्व) मुणिअणो एअमुक्खो अपसरिदो तह जाणामि संपत्तेण
महाराजेन भवितव्यमिति
महाराएण होदव्वंदि ।

इति निष्क्रान्ता ।

राजहंसमिथुनं कलहंसयुगलम् अनासादितविरहम् न आसादित. न अधिगतो विरहो वियोगो येन तत् । समागमसुख समागमस्य सङ्गमस्य सुखमानन्दम् अनुभवतीति दम्पत्योर्मिथुनयोर्मम विरहसम. विरहेण समस्तुल्य. उपदेशनिपुण उपदेशे शिक्षाया निपुणश्चतुर उपाध्याय अध्यापको नास्ति । अन्योन्यहृदयग्रहणसमर्थललितमधुराः—अन्योन्यं परस्परं हृदयस्य मनसो ग्रहणे वशीकरणे समर्थाश्च ते ललिताश्च कोमलाश्च मधुराश्च प्रियाश्च ते, चाटुप्रयोगं मधुरालापं प्रस्थापयन्ति प्रस्तुवन्ति । यथैष इति । यथा तथेत्यव्ययद्वयं हेतूपपत्तौ, एवञ्च यथेत्यस्य यत इत्यर्थः । तथेत्यस्य तत इत्यर्थ. । 'यथा निदर्शने द्वौ तूद्देशे निर्देशसाम्ययोः । हेतूपपत्तौ चे'त्यनेकार्थसङ्ग्रहे हेमचन्द्रः । ससम्भ्रमतत्क्षणविमुक्तासनः ससम्भ्रमं सपदि तत्क्षण एव तदागमनश्रवणसमकालमेव विमुक्तं त्यक्तम् आसनं येन स. । परिग्रहांसदेशसमुत्क्षिप्तवल्कल परिग्रहस्य परिजनस्य पत्नीजनस्य अंसदेशे स्कन्धप्रदेशे समुत्क्षिप्तानि निहितानि वल्कलानि वृक्षत्वच. येन सः ।

(तत प्रविशति राम सचिन्त कण्वश्च)

कण्वः—आदिष्टोऽस्मि भगवता वाल्मीकिना कण्व कण्व, दाशरथिं नैमिशारण्यरामणीयकदर्शनेन विनोदय—इति। एष पुनश्चिन्तापराधीनत्वात्पुरोगामिनमपि मां नावगच्छति। तथाहि-

स्खलति मुहुरयं समेपि मार्गे
निभृतगतिः प्रविलम्बते विदूरात्।
अवनतवदनो नितान्तरम्ये
नच नयने निदधाति काननेऽस्मिन्॥ १॥

(उपसृत्य) भो राजन्!

रा--हन्त, वयस्य, तापसविरुद्धमामन्त्रणम्। अथ वा वयसः परि-

विस्मयोत्फुल्ललोचन विस्मयेनाश्चर्य्येणोत्फुल्लानि विकसितानि लोचनानि नेत्राणि यस्य स मुनिजन। एकमुखक. एकस्मिन्नेव कार्य्ये रामाभिनन्दनरूपे मुखं यस्य स। अपसृत प्रस्थित।

आदिष्टोऽस्मि आज्ञप्तोऽस्मि। दाशरथिं दशरथस्यापत्यं पुमान् दाशरथिस्तं रामम्। नैमिशारण्यरामणीयकदर्शनेन नैमिशारण्यस्य नैमिशवनस्य यद् रामणीयकं रमणीयस्य भावस्तत् सौन्दर्यं तस्य दर्शनेनावलोकनेन विनोदय प्रसादय। एष रामः चिन्तापराधीनत्वात् चिन्तया मनोविकारेण पराधीन परायत्तस्तस्य भावस्तत्त्वं तस्मात् चिन्तावशवर्तित्वात् पुरोगामिनम् अप्रस्थितम् अपि मा नावगच्छति न जानाति. कण्वोऽयमिति न परिचिनोति। तथा हि

अ०—समे अपि मार्गे अय मुहुः स्खलति। निभृतगति. विदूरात् प्रविलम्बते। नितान्तरम्ये अपि अस्मिन् कानने अवनतवदनः न च नयने निदधाति॥ १॥

स—निभृतगति·—निभृता गतिर्यस्य सः। अवनतवदन—अवनतं वदनं यस्य सः। नितान्तरम्ये—नितान्तं रम्यं नितान्तरम्यं तस्मिन्।

सम—level. **मुहु.**—again and again. **स्खलति**—stumbles. **निभृत**—sluggish. **प्रविलम्बते**—lags behind. **नितान्त**—exceedingly. **रम्य**—delightful. **कानन**—forest. **अवनत**—bent.

टी०—समे सरले अपि मार्गे पथि अयं राम मुहुः पुनः पुनः स्खलति। निभृतगतिः निभृता मन्थरा गतिर्गमनं यस्य स. विदूरात् दूरतरं प्रविलम्बते विलम्बं करोति। स्तोकेपि गन्तव्येऽध्वनि बहुकालं गमयति। अवनतवदन अवनतं नम्रं वदनं मुखं यस्य सः। नितान्तं सातिशयं रम्ये मनोज्ञे अस्मिन् कानने वने नयने नेत्रे न च निदधाति नैव व्यापारयति॥ १॥

तापसविरुद्धं तापसाना तपस्विजनस्य विरुद्धम् अनुचितम् राजन्निति सम्बो-

णामेनेदमपराद्धं न भगवता ।

अहं रामस्तवाभूवं त्वं मे कण्वश्च शैशवे ।
यूयमार्या वयश्चाद्य राजानो वयसा कृताः ॥ २ ॥

क—अहो धीरोदात्तोऽयमुपालम्भः ।

रा—उच्यतां यद्विवक्षितम् ।

क—सुरभिकुसुमगन्धैर्वासिताशामुखानां
फलभरनमितानां पादपानां सहस्रैः ।

धनम् । तपोधना हि सर्वेषामपि पूज्याः, सत्कारविशेषेणामन्त्रणं तापसजनस्य न शोभते तत्रापि बालमित्रस्य । राजन्निति सम्बुद्धौ कारणमाह—अथ वेति वयसः आयुषः परिणामेन परिपाकेन इदमपराद्धम्, अवस्थापरिणाम एवात्रापराधी न भवान्। एतदेव सोपपत्तिकमाह—

अ०—शैशवे अहं तव राम. अभूवं त्वं च मे कण्व. (अभू), अद्य वयसा यूयम् आर्या. वयं च राजान. कृताः ॥ २ ॥

शैशव—childhood. **वयस्**—age. **आर्य**—venerable.

टी०—शैशवे बालभावे अहं तव राम अभूवं त्वं च मे कण्व, आवयोर्नामग्रहणपूर्वक एव व्यवहार आसीत् । अद्य साम्प्रतं वयसा यूयम् आर्याः कृताः वयञ्च राजान. कृता । अहं त्वाम् आर्यशब्देन सम्बोधयामि त्वञ्च मां राजपदेनामन्त्रयसे ॥ २ ॥

धीरोदात्तः धीरश्चासौ उदात्तश्चेति स । उच्यतां कथ्यतां विवक्षितं वक्तुमिष्टम् ।

अ०—सुरभिकुसुमगन्धैः वासिताशामुखानां फलभरनमितानां पादपानां सहस्रैः विरचितपरिवेषश्यामलोपान्तरेखः वनान्त हन्त ते हृदयं रमयति ॥३॥

स०—सुरभिकुसुमगन्धैः-सुरभीणि च तानि कुसुमानि तानि सुरभिकुसुमानि तेषा ये गन्धास्तैः । वासिताशामुखानाम्-वासितानि आशाना दिशा मुखानि यैस्तेषाम् । फलभरनमितानाम्—फलाना भरेण नमितास्तेषाम् । विरचितपरिवेषश्यामलोपान्तरेख —विरचितेन परिवेषेण श्यामला उपान्ते रेखा यस्य सः ।

वासित—made fragrant. **आशा**—quarter, direction. **भर**—load. **नमित**—bent. **परिवेष**—circle. **श्यामल**—dark. **उपान्त**—border. **रेखा**— line. **वनान्त**—woodland. **रमयति**—delights.

टी०—सुरभीणि मनोज्ञानि यानि कुसुमानि पुष्पाणि तेषा ये गन्धा आमोदास्तैः वासिताशामुखाना वासितानि सुरभितानि आशानां दिशां मुखानि यैस्तेषाम्। फलभरनमिताना फलाना भर फलभरस्तेन नमितानां नम्राणा पादपानां वृक्षाणां सहस्रैः विरचितेन कृतेन परिवेषेण मण्डलेन श्यामला कृष्णवर्णा उपान्ते समीप-

विरचितपरिवेषश्यामलोपान्तरेखो
रमयति हृदयं ते हन्त कच्चिद्वनान्तः ॥ ३ ॥

रा—बहुमाननिरन्तरीकृतमानसं मां तपोवनमिदं रमयति न रमयतीति वचनावकाश एव नास्ति। पश्य—

दावाग्निं क्रतुहोमपावकधिया यूपास्थया पादपान्
अव्यक्तं मुनिगीतसामगतया भक्त्या शकुन्तस्वनम्।

वर्तिनि प्रदेशे रेखा राजिर्यस्य सः। वनान्त वनप्रदेश. कच्चित् ते तव हृदयं चेत. रमयति रञ्जयति ॥ ३ ॥

बहुमाननिरन्तरीकृतमानसम् बहुमानेन बहुना भूयसा मानेनादरेण निरन्तरीकृतं निर्गतम् अन्तरं यस्मात्तन्निरन्तरम् अनिरन्तरं निरन्तरं कृतमिति अभूततद्भावे च्विप्रयोग., निरवकाशीकृतमशून्यं कृतमिति यावत् मानसं हृदयं यस्य स· तं माम् इदं तपोवन रमयति रञ्जयति न वेति वचनावकाश. वचनस्य कथनस्य अवकाशः अवसर एव नास्ति। कार्यान्तरव्यापृते मनसि तपोवनरमणीयतावधानस्य स्थानमेव कुत इत्यर्थ·।

अ०—नैमिशे दावाग्निं क्रतुहोमपावकधिया, पादपान् यूपास्थया, अव्यक्तं शकुन्तस्वनं मुनिगीतसामगतया भक्त्या, वन्यान् हरिणान् तापसगौरवेण सम्भावयन् स अहं यन्त्रणया कथं कथम् अपि पादौ भुवि न्यस्यामि ॥४॥

स०—क्रतुहोमपावकधिया—क्रतौ होमः क्रतुहोमः स यस्य सः पावकः तद्धिया। यूपास्थया—यूपे या आस्था सा यूपास्था तया। मुनिगीतसामगतया—मुनिभिर्गीतं यत्साम तस्मिन् गता तया। शकुन्तस्वनम्—शकुन्ताना स्वनम्। तापसगौरवेण—तापसाना गौरवं तापसगौरवं तेन।

दावाग्नि—forest conflagration. **क्रतु**—sacrifice. **पावक**—fire. **यूप**—sacrificial post. **अव्यक्तम्**—indistinctly. **शकुन्त**—bird. **स्वन**—chirping. **भक्ति**—devotion. **वन्य**—wild. **गौरव**—regard. **यन्त्रण**—constraint. **न्यस्यामि**—plant.

अस्मिन् नैमिशे नैमिशारण्ये दावाग्निं वनवह्निं क्रतुहोमपावकधिया क्रतौ यज्ञे यो होमः सोऽस्ति यस्य तादृशो य पावको वह्निस्तद्धिया तद्बुद्ध्या पादपान् वृक्षान् यूपास्थया यूपे स्तम्भे याऽऽस्था विश्वासो बुद्धिर्वा तया अव्यक्तम् अस्फुटं शकुन्तस्वनं शकुन्ताना पक्षिणा स्वनं रावं मुनिगीतसामगतया मुनिभिर्गीतं यत् साम सामवेदस्तस्मिन् गता तया भक्त्या सम्भावयन् आकलयन्, शकुन्तारावेषु सामध्वनिधियं विदधानः सोऽहं वन्यान् वने भवा वन्यास्तान् हरिणान् मृगान् तापसगौरवेण तापसास्तपोधनास्तदर्थं यद् गौरवं बहुमानस्तेन सम्भावयन् सोऽहं तथाभूतोहं यन्त्रणया पीडया कथं कथमपि महता दुःखेन भुवि पृथिव्या पादौ

वन्यांस्तापसगौरवेण हरिणान् सम्भावयन्नैमिशे,
सोऽहं यन्त्रणया कथं कथमपि न्यस्यामि पादौ भुवि ॥ ४ ॥

क—युक्तरूपोऽयं धर्मैकपरायणस्य महाराजस्य सकलजगदभ्युदय-निःश्रेयसहेतोर्निष्प्रत्यूहतपःसिद्धिक्षेत्रे पूर्वराजर्षिवंशाध्यासिते नैमिशे बहुमानः ।

आनाकमेकधनुषा भुवनं विजित्य
पुण्यैर्दिवं क्रतुशतैर्विरचय्य मार्गम्
इक्ष्वाकवः सुतनिवेशितराज्यभारा
निःश्रेयसाय वनमेतदुपाश्रयन्ते ॥ ५ ॥

(राम. प्रणमति)

क—इदमनन्यतपोवनसाधारणं नैमिशस्य माहात्म्यमवलोकय—

चरणौ न्यस्यामि स्थापयामि । तपोवनम्प्रति बहुमानाद्भुवि पादन्यासोऽपि रामस्य दुःखाकर ॥ ४ ॥

युक्तरूप श्लाघ्य । धर्मैकपरायणस्य धर्म एवैकं परायणं परं स्थानं यस्य तस्य । सकलजगदभ्युदयनिश्रेयसहेतो सकलानाम् अखिलाना जगता लोकानाम् अभ्युदयः समृद्धि निश्रेयसञ्च कल्याणञ्च तयोर्हेतु कारणं तस्य । निष्प्रत्यूहतपःसिद्धिक्षेत्रे निर्गता प्रत्यूहा यस्मात् सा चासौ तपसा सिद्धिस्तस्या. क्षेत्रं स्थानं तस्मिन् । पूर्वराजर्षिवंशाध्यासिते पूर्वे ये राजर्षय· राजानश्च ते ऋषयश्च तेषा वंशेन कुलेन अध्यासितेऽधिष्ठिते नैमिशे तदाख्येऽस्मिन्नरण्ये बहुमान आदरातिशयः ।

अ०—एकधनुषा आनाकं भुवन विजित्य पुण्यै. क्रतुशतै दिवः मार्गं विरचय्य सुतनिवेशितराज्यभाराः इक्ष्वाकवः निश्रेयसाय एतद् वनम् उपाश्रयन्ते ॥ ५ ॥

स०—क्रतुशतैः—क्रतूना शतं तैः । सुतनिवेशितराज्यभारा —सुते निवेशितः राज्यस्य भारो यैस्ते ।

आनाकम्—upto celestial regions. **राज्यभार**—the burden of kingdom. **निश्रेयस्**—bliss. **उपाश्रयन्ते**—resort to.

टी—एकधनुषा एकेन धनुषा शरासनेन आनाकं नाकपर्यन्तं स्वर्गावधि भुवनं पृथिवीतलं विजित्य पुण्यै· पवित्रै क्रतुशतै क्रतूनां यज्ञाना शतैः दिव. स्वर्गस्य मार्गं पन्थानं विरचय्य निर्माय सुतनिवेशितराज्यभाराः सुते पुत्रे निवेशित स्थापितो राज्यस्य भारो धूर्यै ते इक्ष्वाकव. इक्ष्वाकुवंशोत्पन्ना राजान. निःश्रेयसाय कल्याणाय एतद् वनम् अरण्यम् उपाश्रयन्ते सेवन्ते ॥ ५ ॥

अनन्यतपोवनसाधारणम् अन्येषा तपोवनाना साधारणं सामान्यं न भवतीति तत् । नैमिशस्य माहात्म्यम् अवलोकय पश्य ।

अस्मिन् सन्निवसन्महेश्वरशिरस्ताराधिपज्योत्स्नया
मिश्रीभूय कवोष्णतामुपगतस्तिग्मो निदाघातपः
न म्लानिं तरुपल्लवेषु सरसां तोयेषु नैव क्षयं
सन्तापं न जनस्य किन्तु जनयत्यालोकमात्रं दृशाम् ॥ ६ ॥

किञ्च,—

एतस्मिन् विततध्वरे प्रतिदिनं सान्निध्ययोगाद्धर-
स्त्यक्त्वा नन्दनचन्दनावनिरुहानालानतां प्रापिता ।

अ०—अस्मिन् तिग्म निदाघातप सन्निवसन्महेश्वरशिरस्ताराधिपज्यो-त्स्नया मिश्रीभूय कवोष्णताम् उपगतः सन् तरुपल्लवेषु म्लानिं न, सरसां तोयेषु क्षय नैव, जनस्य सन्तापं न, किन्तु दृशाम् आलोकमात्रं जनयति ॥ ६ ॥

स०—निदाघातप—निदाघस्य आतप । सन्निवसन्महेश्वरशिरस्ताराधिप-ज्योत्स्नया—सन्निवसन् यो महेश्वरस्तस्य शिरसि यस्ताराधिपस्तस्य या ज्योत्स्ना तया।

तिग्म—scorching. **निदाघ**—summer. **आतप**—heat. **ताराधिप**—moon. **ज्योत्स्ना**—light. **कवोष्णता**—slight warmth. **म्लानि**—withering. **सरस्**—pond. **तोय**—water.

टी०—अस्मिन् नैमिशवने तिग्मः तीव्र निदाघातपः निदाघस्य ग्रीष्मर्तोरातपः प्रकाश सन्निवसन् सततं निवासं कुर्वन् महेश्वरस्य शिवस्य शिरसि यस्ताराधिप-श्चन्द्रस्तस्य या ज्योत्स्ना कौमुदी तया मिश्रीभूय सङ्गतिं प्राप्य कवोष्णता मन्दोष्णताम् उपगतः प्राप्त· सन् तरुपल्लवेषु तरूणा द्रुमाणां पल्लवेषु पत्रेषु म्लानिं न जनयति नोत्पादयति। सरसा जलाशयाना तोयेषु जलेषु क्षयं शोषं नैव जनयति। जनस्य सन्तापं घर्मं न जनयति । किन्तु दृशा नेत्राणाम् आलोकमात्रं प्रकाशमात्रं जनयति ॥ ६ ॥

अ०—विततध्वरे एतस्मिन्(नैमिशवने) प्रतिदिन हरे सान्निध्ययोगात् नन्दन-चन्दनावनिरुहान् त्यक्त्वा आलानतां प्रापिता (मन्तः), उच्चनिवेशितेन नयनेन आलोकनीयाः अमी पादपाः मत्तैरावणकण्ठरज्जुवलयन्यासक्षतिं बिभ्रति ॥७॥

स०—विततध्वरे—अध्वानं रातीति अध्वरः। वितत—विशेषेण ततः । वितता अध्वरा यत्र तस्मिन्। प्रतिदिनं—दिनं दिनं प्रति। सान्निध्ययोगात्—सन्निवे-भाव. सान्निध्यं तस्य योगस्तस्मात्। नन्दनचन्दनावनिरुहान्—नन्दने ये चन्दनस्य अवनिरुहास्तान्। उच्चनिवेशितेन—उच्चैः निवेशितं तेन । मत्तैरावणकण्ठरज्जुवलय-न्यासक्षतिम्—मत्तो य एरावणस्तस्य या कण्ठरज्जवस्तासा वलयस्य न्यासेन या क्षतिस्ताम् ।

अध्वर—sacrifice. **प्रतिदिनम्**—daily. **सान्निध्य**—presence. **चन्दन**—sandal. **आलान**—tying post. **उच्चनिवेशित**—set on high. **मत्त**—intoxicated. **रज्जु**—rope. **क्षति**—injury. **बिभ्रति**—bear.

बिभ्रत्युच्चनिवेशितेन नयनेनालोकनीया अमी
मत्तैरावणकण्ठरज्जुवलयन्यासक्षतिं पादपाः ॥ ७ ॥

रा—(विलोक्य) सततप्रवृत्तमहाध्वरेण धर्मारण्येन नन्दनवनमपि विस्मारितो भगवान् पुरन्दरः ।

सचकितमवधाय कर्णमस्मिन् सुरपतिकर्षणमन्त्रनिःस्वनेषु ।
विरचयति शची सदैव नूनं स्रजमवधूय वियोगवेणिबन्धम् ॥८॥

क—इदमपरं न पश्यसि—

अस्मिन् कपोलमदपानसमाकुलानां
विघ्नं न जातु जनयन्ति मधुव्रतानाम् ।

टी०—वितता विशेषेण तता विस्तृता यज्ञा यत्र तस्मिन् । एतस्मिन् अरण्ये प्रतिदिनं दिवसे दिवसे हरेर्विष्णोः सान्निध्ययोगात् सान्निध्यं सामीप्य तस्य योग सम्बन्धस्तस्माद् नन्दनचन्दनावनिरुहान् नन्दनम् इन्द्रवनं तत्र ये चन्दनस्य अवनिरुहा वृक्षास्तान् त्यक्त्वा विहाय आलानताम् आलानं गजबन्धनस्तम्भः तस्य भाव स्तत्ता ता प्रापिता नीताः, उच्चनिवेशितेन उच्चैः निवेशितेन प्रवेशितेन नयनेन नेत्रेण आलोकनीया दर्शनीया अमी पादपा वृक्षाः मत्तैरावणकण्ठरज्जुवलयन्यासक्षतिं मत्तो मदं प्राप्तो य ऐरावणो गज इन्द्रस्य हस्ती तस्य या. कण्ठरज्जव· कण्ठे गले रज्जवस्तासा वलयस्य कङ्कणस्य न्यासेन घर्षणेन या क्षतिस्ता बिभ्रति दधति । सततप्रवृत्तत्वादध्वरस्यात्रेन्द्र ऐरावणेन सह निरन्तरं तिष्ठतीत्यभिप्रायः ॥ ७ ॥

टी०—सततप्रवृत्तमहाध्वरेण सततं निरन्तरं प्रवृत्ता महान्तोऽध्वरा यज्ञा यत्र तेन । धर्मारण्येण पावनेनारण्येन नन्दनवनं नन्दनाख्यमरण्यं विस्मारितः पुरन्दर. इन्द्र· ।

अ०—अस्मिन् (नैमिशवने) सुरपतिकर्षणमन्त्रनि स्वनेषु सचकितं कर्णम् अवधाय शची स्रजम् अवधूय वियोगवेणिबन्धं विरचयति ॥ ८ ॥

स०—सुरपतिकर्षणमन्त्रनि स्वनेषु—सुराणा पतिः सुरपतिस्तस्य ये कर्षणमन्त्रास्तेषां यत् नि·स्वनं तेषु । वियोगवेणिबन्धम्—वियोगे वेणिबन्धस्तम् ।

सुरपति—Indra, Lord of the gods. **कर्षण**—invocation. **नि.स्वन**—recital. **सचकित**—timorously. **अवधाय**—listening to. **स्रक्**—garland. **अवधूय**—having disregarded. **वेणि**—braid.

टी०—अस्मिन् नैमिशे सुराणा देवानां पतिरिन्द्रः सुरपतिस्तस्य ये कर्षणमन्त्राः कर्षणायाह्वानाय मन्त्रा ऋच. तेषा यत् निःस्वनं शब्दस्तेषु सचकितं सभयं सविस्मयं वा कर्णं श्रोत्रम् अवधाय दत्वा शची इन्द्राणी नूनं निश्चयेन स्रजं पुष्पमालाम् अवधूय तिरस्कृत्य वियोगवेणिबन्धं वियोगे विरहे यो वेणिबन्ध एकवेणीरूपः केशबन्धस्तं विरचयति ।

अ०-अस्मिन् (नैमिशे) सामध्वनिश्रवणदत्तमनोऽवधानानिष्पन्दमन्दमद-

सामध्वनिश्रवणदत्तमनोऽवधान-
निष्पन्दमन्दमदवारणकर्णतालाः ॥ ९ ॥

रा—(विहस्य) किमत्राश्चर्यम्—
मुनीनां सामगीतानि पुण्यानि मधुराणि च ।
प्रवासिनामपि मनो हरन्ति किमु दन्तिनाम् ॥ १० ॥

क—(आत्मगतम्) अहो रामस्य प्रवासे महान्निर्वेदः, यदयं तिर्यग्भ्योऽपि प्रवासिन एव शून्यहृदयानवगच्छति । (प्रकाशम्)

वारणकर्णताला कपोलमदपानसमाकुलाना मधुव्रताना जातु विघ्न न जनयन्ति ॥ ९ ॥

स०—कपोलमदपानसमाकुलानाम्—कपोलयोर्यो मदस्तस्य पाने समाकुलास्तेषाम् । सामध्वनिश्रवणदत्तमनोऽवधाननिस्पन्दमन्दमदवारणकर्णताला—साम्ना यो ध्वनिस्तस्य श्रवणे दत्तस्य मनसो यद् अवधानं तेन निष्पन्दा मन्दा ये मदवारणाना कर्णा एव तालाः ते ।

कपोल—temple. **समाकुल**—engaged. **मधुव्रत**—bee. **अवधान**—attentiveness. **निष्पन्द**—motionless. **मन्द**—still. **मदवारण**—rutting elephant. **कर्णताल**—the flapping of ears.

टी०—अस्मिन् अरण्ये साम्ना सामवेदमन्त्राणा यो ध्वनि शब्दस्तस्य श्रवणे आकर्णने दत्तस्य मनसः यद् अवधानं स्थिरीकरणं तेन निष्पन्दा निश्चला मन्दा स्वल्पगतयो ये मदवारणाना मत्तहस्तिना कर्णताला कर्णा एव तालास्ते कपोलयोर्गण्डयोर्यो मदो दानवारि तस्य पाने समाकुलास्तेषाम् । मधुव्रताना भ्रमराणा जातु कदापि विघ्नम् अन्तरायं न जनयन्ति नोत्पादयन्ति ।

अत्र मत्तदन्तिनः सामध्वनिश्रवणदत्तचित्ततया मधुव्रतकृता दानचौर्य्यप्रवृत्तिं नैव जानन्ति । अन्यत्र गतहृदयत्वादङ्गाना व्यापारशून्यता, तथा च कर्णतालयोरुद्धूननव्यापारविरतत्वाद् भ्रमराणा मधुपाने नान्तरायजनकत्वमिति बोध्यम् ॥ ९ ॥

अ०—मुनीनां पुण्यानि मधुराणि च सामगीतानि प्रवासिनाम् अपि मनः हरन्ति दन्तिनां किमु ॥ १० ॥

मधुर—melodious. **प्रवासिन्**—traveller, one who has gone abroad. **दन्तिन्**—elephant.

टी०—मुनीनाम् ऋषीणा पुण्यानि पावनानि मधुराणि श्रवणप्रियाणि सामगीतानि साम्ना गीतानि प्रवासिना वियोगिनाम् अपि मनश्चेत हरन्ति वशीकुर्वन्ति । दन्तिना किमु हस्तिना कथैव का । विरहिणोऽपि सामध्वनिश्रवणेन गृहं गन्तुं न प्रभवन्तीतिभाव ॥ १० ॥

अहो इत्याश्चर्ये । प्रवासे वनवासे महान् निर्वेदः खेदो वैराग्यं वा । तिर्यग्भ्यः पशुभ्यः अपि प्रवासिनः विदेशिन शून्यहृदयान् शून्य हृदयं येषां तान् अन्यत्र

इतस्तावदवधीयतां दृष्टिः—

मुक्त्वा वसन्तविरहेऽपि मुनिप्रभावा-
दुन्निद्रसान्द्रकुसुमां सहकारशाखाम् ।
धावन्त्यमी मधुकराः क्रतुहोमधूम-
सन्त्रासिताः सरसि वारिरुहोदराणि ॥ ११ ॥

रा—कथमनवरताहुतिसंवर्द्धितो धूमराशिर्मधुकरानिवास्मान् पर्याकुलयितुं प्रवृत्तः । (धूमसंबाधा नाटयति)

क—भो भोः किं बाढं धूमेन पर्याकुलनयन इवासि संवृत्तः ।

गतहृदयान् अवगच्छति जानाति । अवधीयता सावाहत दीयताम् । दृष्टिश्चक्षु. ।

अ०—क्रतुहोमधूमसन्त्रासिता अमी मधुकराः वसन्तविरहे अपि मुनिप्रभावात् उन्निद्रसान्द्रकुसुमां सहकारशाखां मुक्त्वा सरसि वारिरुहोदराणि धावन्ति ॥ ११ ॥

स०—क्रतुहोमधूमसन्त्रासिता –क्रत्वर्थं यो होमस्तेन यो धूमस्तेन सन्त्रासिता. । वसन्तविरहे–वसन्तस्य विरह वसन्तविरहस्तस्मिन् । मुनिप्रभावात्—मुने. प्रभावः मुनिप्रभावस्तस्मात् । उन्निद्रसान्द्रकुसुमाम्–उन्निद्राणि सान्द्राणि कुसुमानि यस्यास्ताम् । सहकारशाखाम्—सहकारस्य शाखा ताम् । वारिरुहोदराणि–वारिरुहाणाम् उदराणि ।

क्रतुहोम—sacrificial fire. **धूम**—smoke. **सन्त्रासित**—frightened. **मधुकर**—bee. **वसन्त**—vernal season. **विरह**—absence. **प्रभाव**—power. **उन्निद्र**—full-bloomed. **सान्द्र**—thick. **सहकार**—mango. **मुक्त्वा**—leaving aside. **वारिरुह**—lotus. **उदर**—interior.

टी०–क्रत्वर्थं यज्ञार्थं यो होम. अग्नौ घृतप्रक्षेपस्तेन यो धूमस्तेन सन्त्रासिता उद्वेजिता अमी एते मधुकरा भ्रमराः वसन्तविरहेऽपि वसन्तापगमेऽपि मुनीना ऋषीणा प्रभावात् तपोबलात् उन्निद्रसान्द्रकुसुमाम् उन्निद्राणि विकसितानि सान्द्राणि निबिडानि कुसुमानि यस्या ताम् । सहकारशाखा सहकारस्याम्रस्य शाखा सा सहकारशाखा ताम् मुक्त्वा विहाय सरसि कासारे वारिरुहोदराणि वारिरुहाणा पद्मानाम् उदराणि, कोषभागान् प्रतिधावन्ति गच्छन्ति ॥ ११ ॥

कथमिति । अनवरताहुतिसंवर्द्धित. अनवरतं सततं या आहुतय आज्यादिद्रव्यप्रक्षेपास्ताभिः संवर्द्धित. पोषितः वर्द्धित इति यावत् धूमराशिः धूमसमूह. मधुकरान् भ्रमरान् इव अस्मान् पर्याकुलयितुं खेदितुं प्रवृत्त· । धूमेन सम्बाधा व्यथा ताम् । पर्याकुलनयनः परितः आकुले खिन्ने नयने लोचने यस्य स तथाभूतः ।

अ०—चरता सीताविरहबाष्पेण नित्यदु.खिते मम लोचने भूयः बाढम् आयासिते ॥ १२ ॥

रा—सीताविरहबाष्पेण क्षरता नित्यदुःखिते ।
बाढमायासिते भूयो धूमेन मम लोचने ॥ १२ ॥

क—तदेनामग्रतोवर्तिनीमाश्रमदीर्घिकामवगाह्य शीतलेन सलिलेन क्षालितव्यपनीतनयनखेदं विश्रम्य मुहूर्त्तमत्र तिष्ठतु । अहमपि कुलपतेरग्निहोत्रवेलां सन्निधानेन सम्भावयामि । (इति निष्क्रान्त.)

रा—(परिक्रम्य) एतद्दीर्घिकातीरमवतरामि । (अवतीर्य) अहो प्रसन्नसलिलता कमलाकरस्य (उदकमध्ये छायां निर्वर्ण्य ससम्भ्रमम्) कथं सीताप्यत्रैव ! (हर्षविस्मयं नाटयति)

सी—(विलोक्य) हा धिक् ! हंसमिथुनदर्शनव्यापृतया मयाऽतर्कित-
हद्धी हंसमिहुणदंसणवावुदाए मए अतक्किद-
समागत आर्यपुत्रो न संलक्षितः । तदपसरामि । (तथा करोति)
समाअदो अज्जउत्तो ण संलक्खिदो । ता ओसरिस्सं ।

रा—कथमसम्भाव्यैव मां प्रस्थिता सीता ।

स०—सीताविरहबाष्पेण—सीताया विरह. सीताविरहस्तेन यद् बाष्पं तेन । नित्यदु खिते—नित्यं दु खितं नित्यदु खितं ते ।

क्षरत्—flowing. नित्यदु.खित—perpetually sore. भूयः—again. बाढम्—intensely. आयासित—afflicted.

टी०—क्षरता प्रस्रवता सीताविरहबाष्पेण सीताया जानक्या यो विरहो वियोगस्तेन यद् बाष्पम् ऊष्माश्रु तेन । नित्यदु खिते नित्यं सदा दुःखिते मम लोचने नेत्रे धूमेन भूय पुनरपि बाढं भृशम् आयासिते पीडिते ॥ १२ ॥

टी०—तदेनामिति । अग्रतोवर्त्तिनीं पुरोवर्त्तिनीम् आश्रमसरसीम् अवगाह्य स्नात्वा शीतलेन शिशिरेण सलिलेन जलेन । क्षालितव्यपनीतनयनखेदम् क्षालितेन धावनेन व्यपनीतो दूरीभूतो नयनयोर्लोचनयोः खेदो दु खं यस्या क्रियाया तद् यथा स्यात्तथा । विश्रम्य मुहूर्तं क्षणमात्रम् । कुलपतेः वाल्मीकेः । कुलपतिलक्षणञ्च यथा :—

"मुनीना दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपति स्मृतः ॥"

अग्निहोत्रवेलाम्—अग्निहोत्रस्य सवनस्य वेला समय. ताम् । सन्निधानेन उपस्थित्या सम्भावयामि ।

एतदिति । दीर्घिकातीरं कासारतटम् । अहो इति विस्मये । प्रसन्नसलिलता प्रसन्नञ्च स्वच्छञ्च तत् सलिलं जलं तस्य भावस्तत्ता । कमलाकरस्य दीर्घिकायाः । उदकमध्ये उदकस्य जलस्य मध्येऽन्त. । छायां प्रतिबिम्बं निर्वर्ण्य विलोक्य । हर्षविस्मयम् हर्षेण विस्मयो हर्षविस्मयस्तम् ।

आपाण्डरेण मयि दीर्घवियोगखेदं
लम्बालकेन वदनेन निवेदयन्ती ।
एषा मनोरथशतैः सुचिरेण दृष्टा
क्वापि प्रयाति पुनरेव विहाय सीता ॥ १३ ॥

तदेनामालम्बे । (बाहू प्रसार्य) नैषा वैदेही, किन्तु-
वैदेह्याः क्वापि गच्छन्त्या दीर्घिकातीरवर्त्मना ।
अन्तर्गतजलच्छाया मया सैवेति वीक्षिता ॥ १४ ॥

हंसमिथुनदर्शनव्यापृतया हंसमिथुनस्य दर्शने निरीक्षणे व्यापृता लग्ना तया । अतर्कितसमागत अतर्कितम् असम्भावितं समागतं यस्य स तथाभूत । न संलक्षित: नावलोकितः । तत्तस्माद्धेतो अपसरामि दूरीभवामि असम्भाव्य एव अनादृत्य एव ।

अ०—आपाण्डरेण लम्बालकेन वदनेन दीर्घवियोगखेदं मयि निवेदयन्ती एषा सुचिरेण मनोरथशतै दृष्टा सीता पुन एव विहाय क्वापि प्रयाति ॥१३॥

स०—लम्बालकेन—लम्बा अलका यत्र तेन । दीर्घवियोगखेदम्—दीर्घश्चासौ वियोगो दीर्घवियोगस्तेन य: खेदस्तम् । मनोरथशतै:—मनोरथाना शतैः ।

आपाण्डर—slightly palish **अलक**—tresses. **दीर्घ**—long. **वियोग**—separation. **खेद**—anguish. **मनोरथ**—longing. **विहाय**—leaving.

टी०—आपाण्डरेण ईषत् पाण्डरेण श्वेतपीतेन लम्बालकेन लम्बा दीर्घा अलका: केशा यत्र तेन वदनेन मुखेन दीर्घवियोगखेदं दीर्घश्चिरकालिको यो वियोगो विरहस्तेन य: खेदो दु खं तं निवेदयन्ती प्रकटयन्ती । आपाण्डरेणेति म्लानत्वेऽपि लावण्याविरोधिपाण्डुतोक्ता । रामविरहे सीताया ईदृश्यैव दशा निरूपिता भवभूतिना 'परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्' इत्यादिना । ग्रीष्मविरहतापयोरयमेव विशेष यत् ग्रीष्मस्य लावण्यनाशकत्व विरहस्य तु तदभाव इति तथा च कालिदासः 'समस्तापः कामं मनसिजनिदाघप्रसरयोर्न तु ग्रीष्मस्यैवं सुभगमपराधं युवतिषु' । तथा च वाल्मीकि —'ज्योत्स्ना तुषारमलिना पौर्णमास्या हि लक्ष्मण । सीतेव चातपश्यामा दृश्यते न च शोभते' । ग्रीष्मस्यातपश्यामेति लावण्यनाशकत्वम्। इति तलस्पर्शिन्या वीरराघव । एषा मनोरथशतै मनोरथाना शतैः, अनन्तवाची शतशब्दः 'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्' इत्युक्तेः । सुचिरेण विलोकिता सीता पुनरेव पुनरपि विहाय त्यक्त्वा मामिति शेष क्वापि अलक्षितं स्थानं प्रयाति गच्छति ॥ १३ ॥

अ०—दीर्घिकातीरवर्त्मना क्वापि गच्छन्त्या वैदेह्याः अन्तर्गतजलच्छाया सा एव इति मया वीक्षिता ॥ १४ ॥

स०—दीर्घिकातीरवर्त्मना—दीर्घिकायाः तीरे यद् वर्त्म तेन । **अन्तर्गतजल-**

तदस्याः प्रतिकृतेर्मूलप्रकृतिमन्वेषयामि। (अन्वेषणं नाटयति) निःसम्पातविविक्तमिदं दीर्घिकातीरम्, बिम्बेन च विना प्रतिबिम्ब-मित्यसम्भाव्यमेतत्। किमिदम्?

सी—प्रेक्षते प्रतिकृतिं कथं न प्रेक्षते मामार्यपुत्रः। (विचिन्त्य) भवतु,
पेक्खदे पडिकिदिं, कहं ण पेक्खदि मं अज्जउत्तो। होदु
विज्ञातम्, मुनिप्रसाद एष तपोवनवासिनीनां स्त्रीणामेतस्मिन्
विण्णादं, मुणिप्पसादो एसो तपोवणवासिणीणं इत्थिआणं एदस्सिं
दीर्घिकातीरे पुरुषनयनानामगोचरता। यदि प्रतिकृतेरप्यदर्शनं
दीहिआतीरे पुरुसणअणाणं अगोअरदा। जदि पडिकिदिए वि अदंसणं
महर्षिणाऽऽदिष्टं भवेत् तदायं जनोऽनुगृहीतो भवेत्। अह
महेसिणा आदिट्ठं भवे तदा अअं जणो अणुग्गहिदो भवे। अहं
मपि तावत् यथैषा प्रतिकृतिर्न दृश्यते तथापसरामि। (अपसरति)
वि जाव जह एसा पडिकिदी ण दीसइ तह ओसरिस्सं।

रा—तामेव तावत् प्रसन्नसलिलमध्यवर्तिनीं प्रतिमासीतामवलोक-यामि। (विलोक्य) कथं साप्यन्तर्हिता। (मोहं गच्छति)

सी—हा धिक्! हा धिक्! मोहं गत आर्यपुत्रः। उपसर्पामि।
हद्धी! हद्धी! मोहं गदो अज्जउत्तो। उपसप्पिस्सं।
(परिक्रामति) अथवा यदि संलक्षित आर्यपुत्रः पुनरपि कोपि-
अहवा जदि संलक्खिदो अज्जउत्तो पुणो वि कुप्पि-

च्छाया—जले छाया जलच्छाया, अन्तर्गता चासौ जलच्छाया सा।

दीर्घिका—lake. तीर—shore. वर्त्म—path. छाया—reflection.

टी०—दीर्घिकाया. सरस्या. तीरे तटे यद् वर्त्म मार्गस्तेन क्वापि अलक्षितं प्रदेशं गच्छन्त्या वैदेह्याः सीताया अन्तर्गतजलच्छाया अन्तर्गता चासौ जले छाया सा एवेति सीतैवेति मया रामेण वीक्षिता दृष्टा ॥ १४ ॥

टी०—अस्याः प्रतिकृतेः प्रतिबिम्बस्य मूलप्रकृतिं मूलरूपां प्रकृतिं कारणम् अन्वेषयामि। निःसम्पातविविक्तं जनसमूहशून्यम्। बिम्बेन विना प्रतिबिम्बमित्य-सम्भाव्यम् अशक्यम्, मूलप्रकृतिं विना प्रतिकृतेरसम्भवात्।

प्रेक्षते पश्यति। प्रतिकृतिं प्रतिबिम्बम्। एषः मुनिप्रसादः मुनेर्वाल्मीकेः प्रसन्दः प्रसन्नता। तपोवनवासिनीनां स्त्रीणां तपस्विनीनाम् एतस्मिन् दीर्घिकातीरे सरसीतटे पुरुषनयनानां मानुषचक्षुषाम् अगोचरता अविषयता। प्रतिकृतेः प्रतिबिम्बस्य अपि अदर्शनं महर्षिणा वाल्मीकिना आदिष्टं भवेत् उक्तं स्यात् तदायं जनः अहमित्यर्थः अनुगृहीता अनुकम्पिता भवेत्। अपसरामि दूरं गच्छामि। हा धिक्

ष्यति तदा मुनिजनः अविनीतेति मां सम्भावयिष्यन्ति । तद्गमि-
स्सदि तदा मुणिअणा अविणीदेत्ति मं संभावइस्संति । ता गमि-
ष्यामि । (निवृत्य) अथ वा नैष युक्तायुक्तविचारणस्य कालः,
स्सं । अहवा ण एसो जुत्ताजुत्तविआरणस्स कालो,
कुप्यतु वा मामार्यपुत्रः, मुनिजनो वाविनीतेति सम्भावयतु ।
कुप्पदु वा मं अअउत्तो, मुणिअणो वा अविणीदेत्ति संभावेदु ।
सर्वथा न शक्नोमि एतादृशावस्थां गतमार्यपुत्रमुपेक्षितुम् ।
संवहा ण. सक्कणोमि एदारिसावत्थं गदं अअउत्त उवेक्खिदु ।
(परिक्रामति) शृण्वन्तु भवन्तो लोकपालाः, अहमार्यपुत्रेण
सुणंतु भवन्तो लोअवाला, अह अअउत्तेण
निर्वासिता साम्प्रतमविनीततयार्यपुत्रस्य न शासनं खलु अति-
णिव्वासिदा, संपदं अविणीददाए अअउत्तस्स ण सासणं खु अदि-
क्रमामि, किन्तु शोकावेगबलात्कारिताऽऽत्मनो न प्रभवन्ती
कमामि, किंदु सोआवेअबलक्कारिदा अत्तणो ण पहवन्ती
ईदृशं साहसमनुतिष्ठामि । (उपसृत्य निर्वर्ण्य) हा धिक्! हा धिक्!
ईदिसं साहसं अणुचिट्ठामि । हद्धी ! हद्धी !
परित्यक्तचेतन इवार्यपुत्रः । (परिष्वजते)
परिच्चत्तचेदणो विअ अअउत्तो ।

(राम प्रत्यागमनं नाटयति)

(सीता अपसरणं नाटयति)

रा—कथमकस्मादेव रोमाञ्चितोऽस्मि ?

सी—तथा नाम निर्वासितेदृशं साहसमनुष्ठाय यत्सत्यं भीतास्मि
तह णाम णिव्वासिदा इदिसं साहसं अणुचिट्ठिअ ज सच्च भीदम्हि
संवृत्ता ।
संवुत्ता ।

महत्कष्टम् । उपसर्पामि पार्श्वे गच्छामि । संलक्षितः अवलोकितः आर्यपुत्रः को-पिष्यति कोपं करिष्यति । अविनीता दुस्स्वभावा । सम्भावयिष्यन्ति कलयिष्यन्ति । अथवेति पक्षान्तरे । न एष युक्तायुक्तविचारणस्य कार्याकार्यविवेकस्य कालः । उपेक्षितुम् औदासीन्यमाचरितुम् । निर्वासिता निष्कासिता । साम्प्रतम् अधुना अविनीततया अशिक्षिततया आर्यपुत्रस्य शासनम् आज्ञां न अतिक्रमामि न उल्लङ्घयामि । शोकावेगबलात्कारिता शोकस्य य आवेगस्तीव्रता तेन बलात्कारिता वशीकृता आत्मनो न प्रभवन्ती आत्मानमवरोद्धुं न पारयन्ती ईदृशम् एवंविधं

रा—(विलपन्)—गाढमालिङ्ग वैदेहि—

सी—अनपराद्धास्मि ।

अणवरद्धंमि ।

रा—देहि मे दर्शनं प्रिये ।

सी—प्रभवति सिद्धशासनं किमत्र करोमि मन्दभाग्या

पहवदि सिद्धसासणं; किं एत्थ करेमि मंदभाआ ।

रा—त्यज्यतां दीर्घरोषोऽयं—

सी—अहमप्यार्यपुत्रमेवं विज्ञापयामि ।

अहं वि अअउत्तं एव्व विण्णवेमि ।

रा—किं नु निष्करुणा मयि ॥ १५ ॥

सी—आर्यपुत्र ! विपरीतः खलूपालम्भः ।

अअउत्त ! विवरीओ खु उवालभो ।

रा— देवि विज्ञापयामि त्वां—

सी—अवहितास्म्येषा, आज्ञापय ।

अवहिदंमि एसा, आणवेहि ।

रा— यत्वं चारित्रशालिनी ।

सी—अहो अत्यागयोग्याः प्राणाः ।

अहो अच्चाइजोग्गा पाणा ।

रा— निर्वासितासि विषयात्—

साहसम् अनुतिष्ठामि करोमि । परित्यक्तचेतन. परित्यक्ता चेतना येन स तथाभूतो गतसंज्ञ इत्यर्थः ।

प्रत्यागमनं पूर्वावस्थाम् । नाटयति अभिनयति । अकस्मात् अकारणमेव ।

अ०—प्रिये वैदेहि ! गाढम् आलिङ्ग । दर्शनं मे देहि । अयं दीर्घरोषः त्यज्यताम्, किन्तु मयि निष्करुणा ॥ १५ ॥

गाढम्—closely. **आलिङ्ग**—embrace. **दर्शन**—sight **दीर्घरोष**—keen resentment. **निष्करुणा**—merciless.

टी०—हे प्रिये वैदेहि विदेहराजपुत्रि गाढम् आलिङ्ग परिष्वजस्व मे मह्यं दर्शनं देहि । अयं दीर्घरोष दीर्घश्चासौ रोष स त्यज्यता विसृज्यताम् । किं नु कथं मयि निष्करुणा निर्दया त्वं संवृत्ता ॥ १५ ॥

अत्र प्रथमपादोक्तिमाकर्ण्य सीतात्मगतं कथयति—अनपराद्धास्मि । रामस्य पुनः गाढालिङ्गनप्रार्थनया सम्भावितापराधशङ्काऽपास्ता । न सीतया किमप्यपराद्धं यतो गाढालिङ्गनाय भूयोऽपि राम उत्सुक एव । पुनश्च ईप्सिते सीतादर्शने सिद्धशासनमेव प्रतिबन्धकं, दीर्घिकापरिसरे नारीजनस्य पुरुषचक्षुषोरविषयत्वे

सी—प्रभवत्यार्यपुत्रः सकलस्य परिजनस्य ।

पहवदि अअउत्तो सअलस्स परिअणस्स ।

रा— अस्मिन् दोषे प्रसीद मे ॥ १६

सी—त्वं प्रसीद, नित्यप्रसन्नाहम् ।

तुम पसीद, णिच्चपसएणा अहं ।

रा—कदा बाहूपधानेन पटान्तशयने पुनः ।

गमयेयं त्वया सार्द्धं पूर्णचन्द्रां विभावरीम् ॥ १७ ॥

वाल्मीकिवचस एव हेतुत्वात् । भूयश्च दीर्घरोषत्यागाय विहिताया रामेण प्रार्थनायां सीतयापि तदर्थमेवाऽभ्यर्थ्यते राम । निर्दयत्वन्तु तव संगच्छत इत्यत. किं नु निष्करुणा मयीत्युपालम्भोऽयुक्त इत्यभिप्रायेण विपरीत. खलूपालम्भ इति सीताया उक्ति ।

अ०—देवि त्वां विज्ञापयामि यत् चारित्रशालिनी त्वं विषयात् निर्वासिता असि । अस्मिन् मे दोषे प्रसीद ॥ १६ ॥

विज्ञापयामि—beseech. **चारित्रशालिनी**—endowed with character. **विषय**—kingdom. **निर्वासिता**—exteined. **दोष**—fault.

टी०—हे देवि त्वा विज्ञापयामि निवेदयामि यत् चारित्रशालिनी सुचरित्रा त्वं विषयात् स्वदेशात् निर्वासिता विवासिता असि अस्मिन् निष्कासनरूपे दोषे अपराधे मे ममोपरि प्रसीद प्रसन्ना भव ।

अत्र प्रथमे पादे रामेण विज्ञापनाया कृतायाम् अवहितास्मीति सीताया स्वात्मनि वच । द्वितीये पादे 'त्वं चारित्रशालिनीत्युक्ते सीता स्वजीवितं बहुमनुते । तृतीये पादे निर्वासितासि विषयादित्युक्ते रामेण सीता रामाज्ञोद्वहनमङ्गीकरोति 'प्रभवत्यार्यपुत्रः सकलस्य परिजनस्य' इति वचसा । चतुर्थे पादे प्रसीदेति रामेण प्रार्थनाया कृताया 'नित्यप्रसन्नाहम्' इत्युक्त्वा त्वं प्रसीदेति सीतायाः स्वमनसीप्सा ॥ १६ ॥

अ०—पटान्तशयने बाहूपधानेन पूर्णचन्द्रां विभावरीं त्वया सार्द्धं कदा पुन. गमयेयम् ॥ १७ ॥

स०—पटान्तशयने—पटस्य अन्तः पटान्त तेन आस्तृतं शयनं पटान्तशयनम् तस्मिन्, अत्र मध्यमपदलोपी तत्पुरुषः । बाहूपधानेन—बाहुरेव उपधानं बाहूपधानं तेन । पूर्णचन्द्राम्—पूर्णश्चन्द्रो यस्या सा पूर्णचन्द्रा ताम् ।

पटान्त—lovely tapestry. **शयन**—couch. **उपधान**—pillow. **पूर्णचन्द्र**—full moon. **विभावरी**—night.

टी०—पटान्तेन वस्त्रैकदेशेनास्तृतं यत् शयनं शय्या यद्वा पटेन अन्तं रम्यं यच्छयनं शय्या तस्मिन् । बाहूपधानेन बाहुरेव भुजैव उपधानम् उपबर्हस्तेन । पूर्णचन्द्रा पूर्णश्चन्द्रो यस्या ताम् । विभावरीं रात्रिं कदा पुनः गमयेयं नयेयम् । बाहूपधानस्य शयनदशायामुपकरणत्वमुत्तररामचरितेपि

सी—अयि जनवादभीरुक, अत्र सान्निहिते जने सन्तपसि ।
अयि जणवादभीरुअ, एत्थ सण्णिहिदे जणे संतपसि ।
रा—हा प्रिये जनकराजपुत्रि ! देहि मे प्रतिवचनम् । (मोहं गच्छति)
सी—कथं पुनरप्यार्यपुत्रो मोहं गतः । समाश्वासयामि (पटान्तेन वीजयति)
कहं पुणो वि अज्जउत्तो मोहं गदो । समस्ससं
रा—(हस्तं प्रसार्य पटान्तं गृह्णाति) कथं पटान्त इव संलक्ष्यते । को नु खल्वेष भविष्यति ? (विचिन्त्य) अथ वा—

जनकदुहितरं विहाय देवीं
जनमपरं भुवने तथाप्रभावम् ।
अहमिह न विलोकयामि या मे
स्पृशति पटान्तसमीरणैः शरीरम् ॥ १८ ॥

तदेनामवलोकयामि । (चक्षुरुन्मीलयन्) अनवरतबाष्पपिहितलोचनतया न किञ्चिदपि दृश्यते । तस्मादेनमपकृष्य तावदपनयामि । (तेनैवोत्तरीयान्तेनाश्रूणि प्रमार्जन्नाकर्षति)

दृश्यते ॥ १७ ॥

आविवाहसमयाद् गृहे वने शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥

जनवादभीरुक पुरुषापवादसन्त्रस्त । सन्निहिते पार्श्वस्थे समीपवर्तिनि जने मयीत्यर्थः ।

पटान्त• वसनप्रान्तभाग । इवेत्यनेनानुमितिमात्रमेव वस्त्रं न तु नेत्रग्राह्यम् मुनितप•प्रभावेनास्यादृश्यत्वात् ।

अ०—जनकदुहितरं देवीं विहाय इह भुवने तथाप्रभावम् अपरं जनम् अहं न विलोकयामि या पटान्तसमीरणै मे शरीर स्पृशति ॥ १८ ॥

स०—जनकदुहितरम्—जनकस्य दुहिता जनकदुहिता ताम् । पटान्तसमीरणै.—पटस्यान्त पटान्तः पटान्तेन कृत. समीरण. पटान्तसमीरण तैः ।

विहाय—leaving पटान्त—skirt of garment. समीरण—breeze

टी०—जनकस्य दुहिता पुत्री ता देवीं सीता विहाय परित्यज्य इह भुवने तथाप्रभावं तादृशप्रभावशालिनम् अपरम् अन्यं जनम् अहं न विलोकयामि न पश्यामि या पटान्तसमीरणै पटान्तस्य वसनप्रान्तस्य समीरणै पवनै. मे मम शरीरं स्पृशति वीजयति ॥ १८ ॥

टी०—अनवरतबाष्पपिहितलोचनतया—अनवरतं सततं बाष्पैरश्रुभिः पिहिते निमीलिते लोचने नयने तयोर्भावस्तत्ता तया न किञ्चिदपि दृश्यते न किञ्चिदप्यवलो-

सी—(उत्तरीयं मुञ्चति) आयपुत्र न त्वया परकीयेनोत्तरीयेण प्रणय-
अअउत्त ण तुए परकेरएण उत्तरीएण पणअ-
कोविदस्य (कोपितस्य) इव जनस्याश्रुप्रमार्जनमनुष्ठातव्यम् ।
कोविदस्स विअ जणस्स अस्सुप्पमज्जणं अणुचिट्ठिदव्वं ।

रा— उत्तरीयं पतितमवलोक्य) कथमुत्तरीयमात्रमेव पश्यामि न पुनः परिधानकम् ।

अन्यांशुकमतिरभसादविमृश्यविधायिना मयाकृष्टम् ।
गगनतलात्परिगलितं ज्योत्स्नानिर्मोकललितमिदम ॥ १६ ॥

पुनर्निर्वर्ण्य) क्रमपरमकस्मादेवासमीक्ष्यकारिणमात्मानमव गच्छामि । सुव्यक्तं तयैव चित्रकूटवनदेवतया मायावत्या प्रदर्शितम्-

क्यते । तस्मात् कारणात् एनं पटान्तम् अपकृष्य आकृष्य अपनयामि अश्रूणि प्रमार्जयामि। परकीयेन अन्यस्वत्त्वभूतेन उत्तरीयेण प्रणयकोपितस्य प्रणये प्रेम्णि कोपितस्तस्य जनस्य इव अश्रुप्रमार्जनम् अश्रुप्रोञ्छनं नानुष्ठातव्यं न कर्त्तव्यम् । उपालम्भगर्भमिदं वच । परकीयोत्तरीयेणाश्रुप्रोञ्छनं नाभिमतं कुलीनाना, यावच्च रामभद्रो नाभिजानाति सीताया उत्तरीयं तावच्च न युज्यतेऽस्याश्रुप्रमार्जनमनेन । कथमिति । परिधानकं परिधातारम् ।

अ०—अविमृश्यविधायिना मया अतिरभसात् आकृष्टं ज्योत्स्नानिर्मोकललितम् इदम् अन्यांशुकं गगनतलात् परिगलितम् ॥ १६ ॥

स०—ज्योत्स्नानिर्मोकललितम्—ज्योत्स्ना च निर्मोकश्च तौ ज्योत्स्नानिर्मोकौ तद्वत् ललितम् । अन्याशुकम्—अन्यस्य अन्यस्या वा अंशुकम् । गगनतलात्—गगनस्य तलं गगनतल तस्मात् ।

अविमृश्यविधायिना—by one acting without due thought. **अतिरभस**- violent. **आकृष्ट**—seized. **निर्मोक**—snake's slough. **ललित**—lovely. **अंशुक**—upper garment. **गगन**—sky. **परिगलित**—dropped.

टी०—अविमृश्यविधायिना असमीक्ष्यकारिणा मया रामेण अतिरभसात् अतिवेगात् आकृष्टं ज्योत्स्ना चन्द्रिका निर्मोक कञ्चुक तद्वत् ललितं मनोहरम् इदम् अन्याशुकम् अन्यस्य अन्यस्या वा अंशुकं वसनं गगनतलात् आकाशमण्डलात् परिगलितं पतितम् ॥१६॥

निर्वर्ण्य विलोक्य । अकस्मादेव अकारणमेव असमीक्ष्यकारिणम् अविमृश्यकारिणम् आत्मानम् अवगच्छामि जानामि । असमीक्ष्यकारितैवात्र शुभोदर्का संवृत्ता यतोंऽशुकादानं चापलदोषाङ्कुरितमपि सीतापरिचायकत्वात्स्पृहणीयं संवृत्तम् । सुव्यक्तं तयैव चित्रकूटवनदेवतया चित्रकूटाख्यस्यारण्यस्याधिष्ठात्र्या देव्या मायावत्या प्रदर्शितं सीतायै दत्तम् आसीत् ।

द्यूते पणः प्रणयकेलिषु कण्ठपाशः
क्रीडापरिश्रमहरं व्यजनं रतान्ते ।
शय्या निशीथकलहे हरिणेक्षणायाः
प्राप्तं मया विधिवशादिदमुत्तरीयम् ॥ २० ॥

सी—दिष्ट्याऽभिज्ञातमार्यपुत्रेण ।
दिट्ठिआ अहिरणादं अज्जउत्तेण ।

रा—कीदृशमिदानीमस्य प्रियावल्लभस्य सम्मानविशेषमनुतिष्ठामि (विचिन्त्य) भवत्वयमेवास्यानन्यसाधारणः सम्मानविशेषः । (प्रावृणोति) (आत्मानं प्रावृत्यावलोक्य) द्वितीयप्रावरणं मामव

अ०—द्यूते पणः, प्रणयकेलिषु कण्ठपाशः, रतान्ते क्रीडपरिश्रमहरं व्यजनं, निशीथकलहे शय्या, हरिणेक्षणाया इदम् उत्तरीयं मया विधिवशात् प्राप्तम् ॥ २० ॥

स०—प्रणयकेलिषु—प्रणयस्य केलय प्रणयकेलय तासु । क्रीडापरिश्रमहरम्—क्रीडया य परिश्रमः स क्रीडापरिश्रमस्तस्य हरस्तम् । रतान्ते—रतस्य अन्तस्तस्मिन् । निशीथकलहे—निशीथे कलह निशीथकलहस्तस्मिन् । हरिणेक्षणायाः—हरिणस्य ईक्षणे हरिणेक्षणे, हरिणेक्षणे इव ईक्षणे यस्यास्तस्या. ।

द्यूत—gambling. पण—stake. प्रणयकेलि—amorous sport. कण्ठपाश—noose. रत—amorous pleasure. अन्त—conclusion. क्रीडा—enjoyment. परिश्रम—fatigue. व्यजन—fan. निशीथ—night. कलह—quarrel शय्या—bed उत्तरीय—upper garment. विधि—luck.

टी०—द्यूते कैतवे पणः ग्लहः, प्रणयस्य प्रेम्ण केलयः क्रीडा. तासु कण्ठपाश. कण्ठयोरुद्बन्धनं प्रणयहेतुकमित्यर्थ. । रतान्ते सुरतक्रियापरिसमाप्तौ क्रीडापरिश्रमहरं व्यजनं क्रीडया य. परिश्रमः क्लम तस्य हरं निवारकं व्यजनम् । निशीथकलहे निशीथे रात्रौ य कलहः प्रणयरूपस्तस्मिन् शय्या शयनीयं, मञ्चकशय्या परित्यज्य भूमावुत्तरीयेण शय्यान्तरपरिकल्पनादित्यर्थः । हरिणेक्षणाया मृगाक्ष्या इदम् उत्तरीयम् मया विधिवशाद्दैववशात् प्राप्तमुपलब्धम् ।

अत्र द्यूते पण इत्यादिभिरेकस्यैवोत्तरीयस्य सीताया. द्यूते पणकार्यकारित्वं प्रणयकेलिषु कण्ठपाशकार्यकारित्वं रतान्ते व्यजनकार्यकारित्वं निशीथकलहे शय्याकार्यकारित्वं रूपितम् ।

दिष्ट्येति हर्षे । अभिज्ञातं पूर्वदृष्टमिदमुत्तरीयं तदेवेत्यवधारितम् प्रियावल्लभस्य प्रियायाः सीतादेव्या वल्लभस्य प्रियस्य उत्तरीयस्येत्यर्थ. । संमानविशेषम् आदरातिशयम् अनुतिष्ठामि करोमि । अनन्यसाधारणः न अन्येन साधारण. अलौकिक इति

लोक्य किमपि चिन्तयिष्यति मुनिजनः। तस्मादात्मायमुत्तरीयं परित्यजामि। (इत्युत्क्षिपति)

सी—(गृहीत्वा सहर्षम्) प्रियं मे संवृत्तं चिरजीवितायाः फलम्।
पिअं मे संवुत्तं चिरजीविदाए फलं।
(आघ्राय) दिष्ट्याऽसङ्क्रान्तावलेपनामोदमार्यपुत्रस्योत्तरीयम्। सर्वथा सत्यसन्धा राघवाः। (प्रावृत्य) अहो एतत् प्रियजनसंसर्गसुखस्पर्शमुत्तरीयं प्रावृत्यार्यपुत्रवक्षःस्थलपरिश्रान्तमिवाविरलसमुद्भिन्नरोमाञ्चनिरन्तरमात्मानमुद्वहामि।
दिट्ठिआ असंकंतविलेवणामोअं अज्जउत्तस्स उत्तरीअं। सव्वहा सच्चसन्धा राहवा। अम्हे एदं पियजणसंसग्गसुहप्परिसं उत्तरीअं पावरिअ अज्जउत्तवच्छत्थलपरिस्संतं विअ अविरलसमुब्भिण्णरोमंचणिरंतरं अत्ताणं उव्वहामि।

रा—(सविस्मयम्) यथैतदुत्तरीयमप्राप्तमहीतलमेव केनाप्यपहृतं तथा जानामि प्रत्यासन्नफलो मे मनोरथ इति। (विचिन्तयन्) उत्तरीयापहारो जलच्छायायां दृश्यते, न सीता; किमेतत्? भवतु सिद्धाश्रमवासिभ्यो जनेभ्योऽस्याः प्रभावो भविष्यति। तत्को नु खल्वस्याः प्रत्यासन्नदर्शनेऽभ्युपायः। अयि वैदेहि! न किञ्चित्

यावत्। द्वितीयप्रावरणं द्वितीयं प्रावरणम् उत्तरीय यस्य स तम्। किमपि चिन्तयिष्यति मुनिजन अन्यादृशमिव गणयिष्यति तापसवर्ग.। तस्मात् प्राय. आत्मीयं स्वीयम् उत्तरीयं परित्यजामि। चिरजीवितायाः चिरजीविनो भावश्चिरजीविता तस्या. फलं मे प्रियं संवृत्तम्। सत्यपि महति विवासनजे दु खे यन्मया प्राणधारणमक्रियत तदधुना भूयोपि भर्तृदर्शनात् तदुत्तरीयग्रहणाच्च शुभोदर्कं संवृत्तमिति सीताया अभिप्रायः। असङ्क्रान्तविलेपनामोदम् न सङ्क्रान्तो विलेपनस्याङ्गरागस्यामोदो गन्धो यस्मिन् तत्। सत्यसन्धा सत्या सन्धा. प्रतिज्ञा येषा ते। राघवा रघुवंशीयाः। प्रियजनसंसर्गसुखस्पर्शम् प्रियश्चासौ जनः प्रियजनस्तस्य य. संसर्गस्तेन सुखं स्पर्शो यस्य तत्। प्रावृत्य धारयित्वा आर्यपुत्रवक्षःस्थलपरिश्रान्तम् आर्यपुत्रस्य वक्ष.स्थल उरसि परिश्रान्तम् आयासितम् इव। अविरलसमुद्भिन्नरोमाञ्चनिरन्तरम् अविरलो घन. समुद्भिन्नः समुत्थितो यो रोमाञ्चो रोम्णामुद्रेकस्तेन निरन्तरम् अन्तररहितम् आत्मानम् उद्वहामि धारयामि। सविस्मयं साश्चर्यम्। यथा एतदुत्तरीयम् अप्राप्तमहीतलम् न प्राप्तम् अधिगतं महीतलं भूतलं येन तत्। केनापि जनेन अपहृतं गृहीतम् तथा जानामि मन्ये मे मनोरथ सङ्कल्पः प्रत्यासन्नफलः प्रत्यासन्नं निकटवर्त्ति फलं सीतासमागमरूपं यस्य सः तथाभूत.। उत्तरीयापहारः उत्तरीयस्य अपहारोऽपहरणं जलच्छायायां सलिलगतेप्रति-

स्मरसि कस्यचित् पूर्ववृत्तान्तस्य, यन्मामेवं दर्शनमात्रेणापि न सम्भावयसि।

सी—अद्यापि कीदृशः पूर्ववृत्तान्तः?

अज्जवि कीदिसो पुव्ववुत्तन्तो?

रा—अविदितमनुसृत्य चित्रकूटे
सुतनु सुमापचयाय निर्गतां त्वाम्।
कुसुममपचितं विकीर्य भूमौ
स्मरसि रसेन मया धृतं पटान्तम्॥ २१॥

सी—(विहस्य) साहसिक, अत एव दूरे परिह्रियसे।

साहसिअ अदो एव्व दूरे परिहरिअसि।

रा—कथं न किञ्चिदपि प्रतिवचनं प्रयच्छसि?

सी—आसन्ना मम दिवसावसानवेला। न युक्तं चैतदवस्थां गतमार्य-

आसण्णा मम दिअहावसाणवेला। ण जुत्त अ एतावत्थं गदं अ्अ-

बिम्बे दृश्यते, न सीता, सीता तु न दृश्यते। सिद्धाश्रमवासिभ्य. सिद्धस्य वाल्मीकिमुनेराश्रमे वसन्तीति ते सिद्धाश्रमवासिनस्तेभ्यः जनेभ्य अस्या सीताया' प्रभावः जनावलोकनाक्षमत्वरूपं सामर्थ्यं भविष्यति। प्रत्यासन्नदर्शने समीपनिरीक्षणे। पूर्ववृत्तान्तस्य पूर्वोदन्तस्य। अद्यापीति। अद्यापि इत्थं विवासितायाम् अपि कीदृश पूर्ववृत्तान्तः, एवं गते पूर्वोदन्तस्मारणं नोचितम् इति भाव.।

अ०—सुतनु! चित्रकूटे सुमापचयाय निर्गतां त्वाम् अविदितम् अनुसृत्य अपचितं कुसुमं भूमौ विकीर्य मया रसेन पटान्तं धृतं स्मरसि॥ २१॥

स०—सुतनु—शोभना तनुर्यस्याः तत्संबुद्धौ। सुमापचयाय—सुमानाम् अपचय. सुमापचयस्तस्मै। पटान्तम्—पटस्य अन्त पटान्तस्तम्।

सुम—flower. **अपचय**—plucking. **अविदितम्**—stealthily. **अपचित**—plucked. **विकीर्य**—scattering. **पटान्त**—skirt of garment.

टी०—हे सुतनु! शोभना तनु· शरीरं यस्यास्तत्सम्बुद्धौ, हे शोभनाङ्गि, चित्रकूटे तन्नाम्नि पर्वते सुमापचयाय सुमाना पुष्पाणाम् अपचयाय अवचयनाय निर्गता निर्याता त्वाम् अविदितम् अज्ञातं यथा स्यात्तथा अनुसृत्य अनुगम्य अपचितम् अवचितं कुसुमं पुष्पं भूमौ पृथिव्या विकीर्य प्रक्षिप्य रसेन प्रेम्णा धृतं गृहीतं पटान्तं पटस्य अन्तं प्रान्तभागं स्मरसि किम्॥ २१॥

टी०—साहसिक अविमृश्यकारिन्! अतएव कारणात् दूरे परिह्रियसे त्यज्यसे। प्रतिवचनम् उत्तरम्। प्रयच्छसि ददासि। आसन्ना निकटस्था। दिवसावसानवेला दिवसस्यावसानं विरामस्तस्य वेला समयः। न युक्तम् अयुक्तम् एतदवस्था विरह-

पुत्रं देवताद्वितीयं कृत्वापक्रमितुम् । तत् किमत्र करिष्यामि ।
उत्तं देवदादुदिअ कदुअ अपक्कमिदुं । ता किं एत्थ करइस्सं ।
(दिशोऽवलोक्य) दिष्ट्या एष प्रियवयस्यः कौशिकः किमप्यन्वि
दिट्ठिआ एसो पिअवअस्सो कोसिओ किंवि अण्णे
ष्यन्निव कौतूहलसमावेशनिक्षिप्तलोचन इत एवागच्छति ।
संतो विअ कोदूहलसमावेसणिक्खित्तलोअणो इदो एव्व आअच्छइ,
तदपसरामि । (निष्क्रान्ता)
ता ओसरिस्सं ।

(ततः प्रविशत्यन्वेषमभिनयन् विदूषक)

वि—कुत्र नु खलु तत्रभवान् भविष्यति राजा । (परिक्रम्यावलोक्य च)
कहिं णु खु तत्तभव भविस्सदि राआ
एष प्रियवयस्यश्चिन्ताकुल इव निभृतमनोहरयाऽऽकृत्या दीर्घि
एसो पिअवअस्सो चिन्ताउलो विअ णिहुदमणोहराए आकिदीए दीहि
कातीरमलङ्करोति । तदुपसर्पामि । (उपसृत्य) जयतु भवान् ।
आतीरं अलंकरेइ, ता उवसप्पिस्स । जेदु भव ।

रा—(विलोक्य) दिष्ट्या प्रियवयस्यः कौशिकः प्राप्तः । वयस्य
कौशिक ! कुतो भवान् ?

वि—अद्य सूर्योदयप्रभृति मम त्वामन्वेषमाणस्य (?) सकलो दिवसो-
अज्ज सूरोदअप्पहुदि मम तुमं अण्णेसमाणस्स सअलो दिअहो
ऽतिक्रान्तः ।
अदिक्कंदो ।

रा—किङ्कृतोऽयमस्मदन्वेषणे भवतः प्रयासः ?

दशा गतं प्राप्तम् आर्यपुत्रं देवताद्वितीय देवता वनदेवता एव द्वितीया सहवासिनी यस्य तम् एकाकिनमित्यर्थ कृत्वा अपक्रमितुम् अपसर्तुम् । कौशिक विश्वामित्र भिन्नोऽयं कश्चिन्मुनिविशेष. । कौतूहलसमावेशनिक्षिप्तलोचन कौतूहलस्य विस्मयस्य य समावेश. सम्प्राप्तिस्तेन निक्षिप्ते विक्षिप्ते लोचने चक्षुषी यस्य सः । इत एव अत्रैव आगच्छति । तदपसरामि अस्मात्प्रदेशात्प्रदेशान्तरं यामि । अन्वेषं गवेषणम् अभिनयन् नाटयन् । तत्रभवान् अर्च्य· । चिन्ताकुल चिन्तया आकुलो-व्याकुलश्चिन्ताग्रस्त इति यावत् । निभृतमनोहरया निभृतमत्यन्तं मनोहरा रम्या तया आकृत्या शरीरेण दीर्घिकातीरं दीर्घिकाया· सरस्यास्तीरं तटम् अलङ्करोति विभूषयति ।

टी०—सूर्योदयप्रभृति सूर्योदयादारभ्य त्वाम् अन्वेषमाणस्य अन्विष्यतः । अत्रात्मनेपदं चिन्त्यम् । सकल· समग्रो दिवसोऽतिक्रान्तो गतः । किङ्कृत· किम्मूल अस्मदन्वेषणे

वि- श्रुतं मया प्राभातिके समयेऽतिमुक्तमण्डपाभ्यन्तरे प्रच्छन्न-
सुदं मए पहादए समए अदिमुत्तमंडपब्भंतरे पच्छरण
स्थितेन विस्रब्धप्रवृत्तसङ्कथानां मुनिकन्यकानामप्सरसामपि
ट्ठिदेण विस्सद्धपउत्तसंकहाणं मुणिकण्णआणं अच्छराणं वि
मुखतः किमपि तपोवनरहस्यं मन्त्र्यमाणम्। तत् तव अ
मुहादो किंवि तवोवणरहस्सं मंतिअमाणं। तं तुह अ
प्रियमासीत्। अभ्यन्तरस्थितमिव गूढगर्भमधिकतरं बाधते।
प्पिअं आसी। अब्भंतरट्ठिदं विअ गूढगब्भ अहिअदरं बाहेइ।

रा—कीदृशं तपोवनरहस्यम?

वि—भोः किं न जानासि तत्रभवता—
भो किं ण जाणासि तत्तहोदी—

रा—(कर्णौ पिधाय) स्त्रीसम्बद्धमेव तद्रहस्यम्, तदलमनेन श्रुतेन।

वि—मा भीः, रामवयस्यः खल्वहम्। न जानासि तत्रभवती पुराण-
मा भयाहि, रामवअस्सो खु अहं। ण जाणासि तत्तहोदिं पुराण-
स्वर्गदासीम्—
सग्गदासिं।

रा—(आत्मगतम्) देवगणिकासम्बद्धैषा कथा, न कश्चिद्दोषस्तदा-
कर्णने। (प्रकाशम्) कतमासौ पुराणस्वर्गदासी किमुर्वशी किं
तिलोत्तमा।

वि—न जानामि किं तिलोत्तमा सिलोत्तमेति। सा किल तत्रभवत्या-
ण आणामि किं तिलुत्तमा सिलुत्तमेत्ति। सा किल तत्तहोदीए

अस्माकम् अन्वेषणे मार्गणे प्रयासः परिश्रमः। प्राभातिके समये उषसि अतिमुक्त-मण्डपाभ्यन्तरे अतिमुक्तो माधवीलता तस्य मण्डपस्य जनाश्रयस्य अभ्यन्तरेऽन्तः प्रच्छन्नस्थितेन प्रच्छन्नं सुगुप्तं यथा स्यात्तथा स्थितेन विस्रब्धप्रवृत्तसङ्कथानां विस्रब्धं विश्वस्तं यथा स्यात्तथा प्रवृत्ताः सङ्कथा वार्त्तालापो यासां तासाम्। मुनिकन्यकानाम् तथा अप्सरसां देवाङ्गनानाम् अपि मुखतः किमपि तपोवनरहस्यम्। अभ्यन्तर-स्थितं गूढगर्भम् इव अभ्यन्तरस्थितो मूढगर्भ इवेत्युचितः पाठः। तद्रहस्यं मां बाधते पीडयति, यथाऽभ्यन्तरस्थितो मूढगर्भो जननीं पीडयति तद्वदिदं रहस्यं हृदि स्थितं मां बाधते। स्त्रीसंबद्धमेव तद्रहस्यम्। अनेन रामस्य चरित्रोत्कर्षो दर्शितः। राम-वयस्यः खल्वहम्, तवाखिलं चरित्रादिकं जानामीति कौशिकस्याभिप्रायः। देव-गणिकासम्बद्धा देवाङ्गनाविषयत्वादस्याः कथायाः श्रवणे न मम कोपि दोष इति वक्तुर्हृदयम्। तत्रभवत्याः पूज्यायाः चिरकालवियुक्तायाः अनल्पविरहिण्याः विदेह-राजतनयायाः विदेहानां राजा विदेहराजस्तस्य या तनया पुत्री तस्याश्चरितं

श्चिरकालवियुक्ताया विदेहराजतनयायाश्चरितमनुष्ठाय प्रिय-
चिरकालविउत्ताए विदेहराअतणआए चरिदं अणुचिट्ठिय पिअ-
वयस्यमुपहसितुमिच्छति ।
वयस्स उपहसिदु इच्छइ ।

रा—(आत्मगतम्) कष्ट ! सम्यगुपलक्षितं कौशिकेन । अन्यथा हि दृश्यमाने प्रियासन्निधानाभिज्ञाने स्वयं न दृश्यत इत्यसम्भाव्य मेतन्मानुषीषु । सर्वथा वञ्चितोऽस्मि कामरूपिण्या तिलोत्तमया ।

तृषितेन मया मोहात् प्रसन्नसलिलाशया ।
अञ्जलिर्विहितः पातुं कान्तारमृगतृष्णिकाम् ॥ २२ ॥

(उत्तरायमवलोक्य) कथमुत्तरीयमाप निर्मितमतिमायाविन्या । अहो परवञ्चनायामतिमहन्नैपुणम् ।

भूमिकाम् अनुष्ठायाभिनीय प्रियवयस्यं त्वाम् उपहसितुम् इच्छति । 'उपलक्षितं ज्ञातम् । अन्यथा प्रियासन्निधानाभिज्ञाने प्रिया सीता तस्या. सन्निधानं सामीप्य तस्याभिज्ञाने चिह्ने दृश्यमाने विलोक्यमाने स्वयं न दृश्यते नयनविषयं न यातीत्ये-तन्मानुषीषु लौकिकासु स्त्रीषु असम्भाव्य न सङ्घटते । कामरूपिण्या यथाभिलषित-रूपान्तरग्राहिण्या तिलोत्तमया तिलोत्तमानाम्न्या देवाङ्गनया वञ्चितोऽस्मि प्रतारितोऽस्मि ।

अ०—तृषितेन मया प्रसन्नसलिलाशया मोहात् कान्तारमृगतृष्णिकां पातुम् अञ्जलिः विहितः ॥ २२ ॥

स०—प्रसन्नसलिलाशया–प्रसन्नं च तत् सलिलं तत् प्रसन्नसलिलं तदर्थं या आशा सा प्रसन्नसलिलाशा तया । कान्तारमृगतृष्णिकाम्–कान्तारे या मृग-तृष्णिका सा कान्तारमृगतृष्णिका ताम् ।

तृषित—thirsty. **प्रसन्न**—transparent. **सलिल**—water. **आशा**—hope. **मोह**—delusion. **मृगतृष्णिका**—water of a mirage. **अञ्जलि**—folded hands

टी०—तृषितेन पिपासितेन मया प्रसन्नसलिलाशया प्रसन्नं निर्मलञ्च तत् सलिलं तत् प्रसन्नसलिलं तदर्थं या आशा सा प्रसन्नसलिलाशा तया । कान्तारमृग-तृष्णिकाम् कान्तारे या मृगतृष्णिका मिथ्याऽध्यवसितं जलं ता पातुं मयाञ्जलिर्विहित. । मरुस्थले ग्रीष्मघर्मसन्तापाद् भासमानं जलं मृगा पातुं धावन्ति, परमार्थतस्तु तत्र सलिलाभावान्निष्फलप्रयासा पीडामुद्वहन्ति, तथैव मयापि तिलोत्तमाया सीताध्यवसायो मोहात्कृतः, तदर्थञ्च सर्वोऽपि यत्नो व्यर्थ एव ॥ २२ ॥

टी०—निर्मितं रचितम् अतिमायाविन्या मायावत्या । परवञ्चनाया परव्या-

वि—भो वयस्य! विलक्षमुख इव दृश्यसे। किं तया वञ्चितोऽसि?

भो वयस्स! विलक्खमुहो विअ दीससि। किं ताए वञ्चिदोसि?

रा—वञ्चितः कृतोऽस्मि।

वि—किं मया श्रुतं रहस्यमन्यथा भवति?

किं मए सुदं रहस्सं अण्णहा होदि?

(नेपथ्ये)

सन्ताप्य लोकमखिलं निरवग्रहेण
तीव्रो नरेश्वर इव प्रथमं स्वधाम्ना।
सोऽयं वयःपरिणतेरिव शान्ततेजाः
सायं मृदुर्भवति तिग्मरुचिः क्रमेण॥ २३॥

रा—(निर्वर्ण्य) अस्तं गच्छति भगवान् दिवाकरः।

प्रियजनरहितानामङ्गुलीभिर्वधूना-
मवधिदिवससङ्ख्याव्यापृताभिः सहैव।

मोहने नैपुणं चातुर्यम्। विलक्षमुख विलक्षं विस्मयान्वित मुखं यस्य स। वञ्चित प्रतारितः। रहस्यं मन्त्रणम्। अन्यथा भवति विपरीततामुपैति।

अ०—सः अय तिग्मरुचि. निरवग्रहेण स्वधाम्ना अखिलं लोकं प्रथमं सन्ताप्य वय परिणते· क्रमेण शान्ततेजा. तीव्र नरेश्वरः इव सायं मृदु· भवति॥२३॥

स०—तिग्मरुचि—तिग्मा रुचिर्यस्य स.। निरवग्रहेण—निर्गतोऽवग्रहो यस्मात्स निरवग्रहस्तेन। वय परिणते—वयस. परिणतिः वय परिणतिस्तस्या·। शान्ततेजाः—शान्तं तेजो यस्य स·।

तिग्मरुचि—hot-rayed sun. **निरवग्रह**—irresistible. **धाम**—lustre. **अखिल**—entire. **सन्ताप्य**—having scorched. **वय.परिणति**—ripeness of age. **क्रमेण**—in due course of time. **शान्ततेजाः**—with splendour diminished. **तीव्र**—violent. **नरेश्वर**—king, ruler of men. **सायम्**—towards eventide. **मृदु**—mild.

टी०—सोऽयं तिग्मरुचि· तिग्मा प्रचण्डा रुचयो दीप्तय· यस्य स चण्डांशुः सूर्यः निरवग्रहेण प्रतिबन्धरहितेन स्वधाम्ना निजेन तेजसा अखिलं सर्वं लोकं भुवन सन्ताप्य तापयित्वा वयःपरिणते. वयस. आयुषः परिणति. परिपाकस्तस्या क्रमेण शान्ततेजाः शान्तं शममुपगतं तेजो यस्य स· तीव्रः कठोरशासनो नरेश्वर इव नृप इवं सायम् अस्तमनसमये मृदु· कोमलो भवति। यथा हि तीव्रोपि नृपो वयसः परिणामाच्छान्ततेजा जायते तथैव तीव्रांशुरपि सहस्ररश्मि. सायंसमये आयुष परिपाकात्सह्यातपो भवतीति निष्कर्ष॥ २३॥

टी०—निर्वर्ण्य विलोक्य भगवान् दिवाकरो भास्करः अस्तं गच्छति

व्रजति किरणमालिन्यस्तमेकैकशोऽस्मिन्
सरसकमलपत्रश्रेणयः सङ्कुचन्ति ॥ २४ ॥

अपि च,—

आकर्षात् प्रग्रहाणां नियमितगतयो नोदितास्तोत्रपातै-
र्नैव स्थातुं न यातुं सचकितचरणाः सारथेः पारयन्तः ।
दुर्विन्यस्तैः खुराग्रैर्विषमपारसरादस्तशलस्य शृङ्गा
द्वाहन्ते वारिराशिं कथमपि विधुरा वाजिनस्तिग्मरश्मेः ॥२५॥

(इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः ।

अस्त याति

अ०—प्रियजनरहितानां वधूनाम् अवधिदिवससङ्ख्याव्यापृताभि अङ्गुलीभिः सहैव अस्मिन् किरणमालिनि अस्तं व्रजति (सति) सरसकमलपत्रश्रेणयः एकैकश सङ्कुचन्ति ॥ २४ ॥

स०—प्रियजनरहितानाम्—प्रियश्चासौ जन· प्रियजनस्तेन रहितास्तासाम् । अवधिदिवससङ्ख्याव्यापृताभि·—अवधिदिवसाना या सङ्ख्या तस्या व्यापृतास्ताभि· । सरसकमलपत्रश्रेणयः—रसेन सह वर्तन्त इति सरसानि, कमलाना पत्राणि कमलपत्राणि, सरसानि च यानि कमलपत्राणि तानि सरसकमलपत्राणि तेषा श्रेणयः ।

रहित—separated. **अवधि**—period. **सङ्ख्या**—reckoning. **व्यापृत**—engaged. **अङ्गुली**—finger. **किरणमालिन्**—sun. **सरस**—fresh. **कमल**—lotus. **पत्र**—petal. **श्रेणी**—row. **एकैकश·**—one by one. **सङ्कुचन्ति**—contract.

टी०—प्रियजनरहिताना प्रियश्चासौ जन प्रियजनस्तेन रहिताना वियुक्तानां वधूना स्त्रीणाम् अवधिदिवससङ्ख्याव्यापृताभि· अवधिदिवसाना देशान्तरं गतस्य पत्यु प्रतिनिवृत्तिदिनाना या सङ्ख्या परिगणनं तस्या व्यापृताभिः लग्नाभिः अङ्गुलीभि· सहैव सार्धमेव अस्मिन् किरणमालिनि अंशुमालिनि सूर्ये अस्तं व्रजति अस्तमिते सति सरसकमलपत्रश्रेणय· रसेन जलेन सह वर्तन्त इति सरसानि जलार्द्राणि यानि कमलाना पद्माना पत्राणि दलानि तेषां श्रेणयः पङ्क्तय· एकैकश· क्रमशः सङ्कुचन्ति निमीलन्ति ॥ २४ ॥

वियोगिनीकर्तृकम् अवधिदिवसगणनमन्यत्रापि दृश्यते । तथा च शकुन्तलाया दुष्यन्त आह—

एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत्प्रिये मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति ॥

अ०—सारथे प्रग्रहाणाम् आकर्षात् नियमितगतय तोत्रपातै नोदिता सचकितचरणा विधुरा. तिग्मरश्मे वाजिन. नैव स्थातुं न (च) यातुं पारयन्तः विषमपरिसरात् अस्तशैलस्य शृङ्गात् दुर्विन्यस्तैः खुराग्रैः वारिराशिं कथम् अपि गाहन्ते ॥ २५ ॥

स०—नियमितगतय.—नियमिता गतिर्येषा ते । तोत्रपातै—तोत्रस्य पाता· तोत्रपातास्तै । सचकितचरणा—सचकिता. चकितेन सह वर्तमानाश्चरणा येषा ते । तिग्मरश्मे—तिग्मा रश्मयो यस्य स तिग्मरश्मिस्तस्य । विषमपरिसरात्—विषम. परिसरो यस्य तस्मात् ।

प्रग्रह—reins. **आकर्ष**—drawing. **नियमित**—restrained. **तोत्र**—goading pike. **विधुर**—bewildered. **तिग्मरश्मि**—hot-rayed sun. **वाजिन्**—horse. **विषम**—rugged. **परिसर**—border. **अस्तशैल**—western hill. **शृङ्ग**—peak. **दुर्विन्यस्त**—placed falteringly. **खुराग्र**—hoofs. **वारिराशि**—ocean. **गाहन्ते**—plunge.

टी०—सारथेररुणस्य प्रग्रहाणा रश्मीनाम् आकर्षाद् आकर्षणवशात् नियमितगतयः नियमिता नियन्त्रिता गतिश्चलनं येषा ते । तोत्रपातैः तोत्रस्य पातै पातनै. नोदिता प्रेरिता. सचकितचरणाः चकितेन भयेन सह वर्तमाना· चरणाः पादा येषा ते । विधुरा व्याकुलास्तिग्मरश्मे· सूर्यस्य वाजिनोऽश्वा नैव स्थातुं न च यातुं पारयन्त. शक्नुवन्तः विषमपरिसरात् विषमो निम्नोन्नतः परिसरः समीपवर्ती प्रदेशो यस्य तस्मात् । अस्तशैलस्य अस्ताचलस्य शृङ्गात् शिखरात् दुर्विन्यस्तै. दु खेन संस्थापितैः खुराग्रै. खुराणाम् अग्रभागै. वारिराशिम् अम्बुनिधिम् अवगाहन्ते प्रविशन्ति ॥ २५ ॥

पञ्चमोऽङ्कः

(तत प्रविशति विदूषक.)

वि—(नेपथ्याभिमुखमवलोक्य) **आसन्नस्तपोधनानां सम्पातसमयः, तत्**
आसण्णो तपोधणाण संपातसमओ, ता

त्वरतु भवान्।
तुवरेदु भवं।

(तत प्रविशति राम)

रा—सवनमवसितं हुतं कृशाना-
वुदयगत समुपासितो विवस्वान्।
इति विधिमवसाय्य वासरादौ
नियमधनानहमागतः प्रणन्तुम् ॥ १ ॥
एतदास्थानमण्टपम्, प्रविशतु भवान्।
एदं अत्थाणमंटपं, पविसदु भवं।

तत प्रविशतीति। अत्रोद्वेगवतो रामस्य विनोदाय विदूषकप्रवेशो नितान्तमभिमतः, निर्वेदातिशयपरिहारायोचित एव तादृशस्य पात्रस्य प्रवेश.। विदूषकलक्षणं यथा दर्पणे—"कुसुमवसन्ताद्यभिध· कर्मवपुर्वेषभाषाद्यै। हास्यकर· कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञ."। अन्यत्राप्युक्तम् 'विकृताङ्गवचोवेषैर्हास्यकारी विदूषक.।' तपोधनाना तप एव धनं येषा तेषा तापसानामित्यर्थ·। सम्पातसमय· सम्भूयोपस्थानकाल। आसन्न समीपवर्ती।

अ०—सवनम् अवसितम्, कृशानौ हुतम्, उदयगतः विवस्वान् समुपासितः, इति वासरादौ विधिम् अवसाय्य नियमधनान् प्रणन्तुम् अहम् आगतः ॥ १ ॥

स०—नियमधनान्—नियम एव धनं येषा तान्।

सवन—bath. **अवसितम्**—is over. **कृशानु**—fire. **उदयगत**—the rising. **विवस्वान्**—sun. **समुपासित**—properly worshipped. **वासर**—day. **आदि**—beginning. **विधि**—rite. **अवसाय्य**—having concluded. **नियमधन**—the ascetics who regard self control as their wealth. **प्रणन्तुम्**—to pay homage.

टी०—सवनं स्नानं अवसितं समाप्तम्। कृशानौ अग्नौ हुतं घृतमिश्रितस्य चरोर्निक्षेपः कृत। उदयगत उदयाचलस्थः विवस्वान् भास्कर. समुपासितः सम्यक् पूजित.। इति एवं वासरादौ वासरस्य दिवसस्य आदौ आरम्भे विधिं कृत्यम् अव

रा—(प्रविष्टकेन चिन्ता नाटयन्)

आ ! आश्चर्यमस्माकं किं वृत्तमतीतेऽह्नि ?

अतिप्रसादादसतीव तस्मिन्
दृष्टा मया वारिणि पङ्कजाक्षी।
लम्बालकं पाण्डुरपीनगण्डं
प्रसादरम्यं वदनं वहन्ती ॥ २ ॥

अथ वा विलोक्यते तिलोत्तमया कृतोऽयं परिहास इति।

तस्याः स्वहस्तरचितामिव कुन्दमालां
सादृश्यवन्ति सिकतासु पदानि तानि।

साग्य समाप्य नियमधनान् नियमाः संयमादय एव धनं येषां तान् मुनीन् प्रणन्तुम् अभिवादयितुम् अहम् आगतोऽस्मि ॥ १ ॥

टी०—आस्थानमण्टपम् आतिष्ठन्त्यत्रेति आस्थानम् तस्य मण्टपं मण्डपं जनाश्रयः अत्र मण्टपशब्द प्रान्तिक मण्डपार्थे रूढ इति केचित्। प्रविष्टकेन प्रवेशनेन चिन्ता स्मृतिं नाटयन् अभिनयन्। आश्चर्यं विस्मयः। किं वृत्तं किं भूतम्। अतीते गते अहनि दिवसे।

अ०—अतिप्रसादात् असति इव तस्मिन् वारिणि लम्बालकं पाण्डुरपीनगण्डं प्रसादरम्य वदनं वहन्ती पङ्कजाक्षी मया दृष्टा ॥ २ ॥

स०—लम्बालकम्—लम्बा अलका यत्र तत्। पाण्डुरपीनगण्डम्—पाण्डुरौ पीनौ गण्डौ यस्य तत्। प्रसादरम्यम्—प्रसादेन रम्यम्। पङ्कजाक्षी पङ्कजे इवाक्षिणी यस्याः सा।

अतिप्रसाद—extreme transparence. **वारि**—water. **अलक**—tresses. **पाण्डुर**—palish. **पीन**—fleshy. **गण्ड**—cheek. **पङ्कजाक्षी**—lotus-eyed.

टी०—भूतमाश्चर्यं वर्णयति—अतिप्रसादात् अत्यन्तं नैर्मल्यात् असतीव अविद्यमान इव तस्मिन् वारिणि सलिले दीर्घिकाजल इत्यर्थः। पयसो विमलत्वाद्दुर्लक्ष्यत्वमिति भाव। लम्बालकं लम्बा लम्बमाना अलकाः केशा यत्र तत्। पाण्डुरपीनगण्डं पाण्डुरौ श्वेतपीतौ पीनौ पीवरौ गण्डौ कपोलौ यत्र तत् तादृशम्। अत्र विरहत्वात्कपोलयो पाण्डुरत्वं भर्तुस्सान्निध्यात्पीनत्वमिति विशेषणद्वयस्य सार्थकत्वं ज्ञेयम्। अत एव प्रसादरम्यं प्रसादेन प्रसन्नतया रम्यं रमणीयं वदनं मुखं वहन्ती धारयन्ती पङ्कजाक्षी पङ्कजे कमले इवाक्षिणी नयने यस्याः सा कमललोचना सीता मया दृष्टेत्याश्चर्यम् ॥ २ ॥

टी०—अथ वेति। विलोक्यते उन्नीयते सम्भाव्यते इति वा। तिलोत्तमया देवगणिकया अयं परिहासः उपहासः सलिले सीताप्रतिबिम्बदर्शनरूप कृतः।

अ०—देवगणिका तस्याः स्वहस्तरचिताम् इव कुन्दमालाम्, सिकतासु

छायां च देवगणिका विदधातु येन
रामं कथं स्पृशति हस्तपटान्तवातैः ॥ ३ ॥

(चिन्तां नाटयति)

वि—एष सचिन्त इव, अद्य तदुपविश्य निर्बन्धयिष्यामि । (उपविश्य)
एसो सचिन्तो विअ, अज्ज ता उपविसिअ निब्बन्धइस्सम् ।
भो भो वयस्य, मा त्वमत्र स्थितः खलु कुत्र स्थितः खलु त्वं
भो भो वअस्स, मा तुमं एत्थ ठिदो खु कहि ठिदो खु तुमं
नवमेघस्निग्धश्यामलः परिणद्धमुक्ताहारोऽत्यन्तसमुन्नद्धदुरारो
णवमेहसिणिद्धस्सामलो परिणद्धमुत्ताहारो अच्चंदसमुण्णद्धदुरारो-
हाणामिन्द्रनीलमयानां भवनस्तम्भानामन्यतम इव मम हृदय-
हाणं इंदनीलमआणं भवणक्कंभाणं अण्णतमो विअ मम हिअअ

तानि सादृश्यवन्ति पदानि, छायां च येन (कारणेन) विदधातु, हस्तपटान्तवातैः रामं कथं स्पृशति ॥ ३ ॥

स०—स्वहस्तरचिताम्—स्वस्य हस्तेन रचिता ताम् । हस्तपटान्तवातैः—हस्ते धृतः पटान्त हस्तपटान्तस्तस्य वातास्तै ।

देवगणिका—celestial courtezan. कुन्दमाला—jasmine garland, a garland of the Kunda flowers. सिकता—sand. पद—impressions of feet. छाया—reflection. पटान्त—skirt of the garment.

टी०—देवगणिका स्वर्वेश्या तिलोत्तमा तस्याः सीतायाः स्वहस्तरचिता स्वस्य हस्तेन करेण रचितामुद्ग्रथिताम् इव जानकीकरनिर्मितमाल्यसमानाकारा कुन्दमाला कुन्दकुसुमस्रजं विदधातु विरचयतु, तुल्यकौशलतः कुन्दमाला तिलोत्तमयापि समुद्ग्रथितुं शक्या, सिकतासु बालुकासु सादृश्यवन्ति सीतापदसमानानि पदानि चरणचिह्नानि सा विदधातु, पदविन्यासमाम्यमपि शक्यं सम्भवितु कर्तुं वा, छाया दीर्घिकाजले सीताप्रतिबिम्बं विदधातु पातयितुं समर्था येन सीताध्यवसायो मे स्यात्, परं हस्तपटान्तवातैः हस्ते करे धृतो यः पटान्तो वसनप्रान्तभागस्तस्य वातैः पवनैः रामं कथं स्पृशति । आसक्तिविमुखस्य रामस्योपगूहनं सर्वथाऽशक्यम् । एवंविधे कर्मणि तिलोत्तमा निष्प्रभावेति रामस्याशय ॥ ३ ॥

एष इति । एष रामः । सचिन्त इव चिन्तया सह वर्तत इति सचिन्तः, चिन्ताग्रस्त इव दृश्यत इति शेषः । उपविश्य स्थित्वा निर्बन्धयिष्यामि सातिशयं प्रार्थयिष्ये । अत्र स्थितः खलु कुत्र स्थितः खलु यत्र तत्र स्थितः त्वं नवमेघस्निग्धश्यामलः नवो नूतनो नो मेघस्तद्वत् स्निग्धः सान्द्रः श्यामलश्च श्यामवर्णश्च । परिणद्धमुक्ताहारः परिणद्धः परितो नद्धो धृतो मुक्ताहारो मुक्ताभिरुद्ग्रथितो हारो दाम

विभ्रममुत्पादयसि । तदेतस्य लक्ष्मीनिवासभवनस्य सेवासमय-
विब्भमं उप्पादेसि । ता एदस्स लक्खीणिवासभवणस्स सेवासमअ-
समुपागतसामन्तनरेन्द्रमधुरशब्दोपगीतस्यास्थानदासेरमण्टप-
समुवागदसामंतणरिंदमहुरसद्दोपगीतस्स अत्थाणदासेरमंडप-
पुण्डरीकस्य कर्णिकामण्डल इवैतस्मिन् सिंहासने मधुमथन-
पुण्डरीअस्स कण्णिआमंडले विअ एदस्सि सिंहासणे महुमहण-
नाभिकमलकर्णिकासमारूढस्य भगवतः पितामहस्य महत्त्वमधि-
णाभिकमलकण्णिआसमारूढस्स भअवदो पिदामहस्स महत्तणं अधि-
क्षिपन्नुपविष्टो भव ।
क्खिवन्तो उवविठ्ठो होहि ।

रा—यथाह भवान् । (उपविश्य चिन्ता नाटयन्) अद्याहमभिनवसुख-
दुःखस्य सचेतन इवास्मि संवृत्तः । (ध्यानमभिनीय हस्तं च हृदये
निवेश्य)

आसीदियत्सु दिवसेषु निरस्तज्ञान-
नैराश्यलुप्तमनसो न सुखं न दुःखम् ।

येन सः । अत्यन्तसमुन्नद्धदुरारोहाणाम् अत्यन्तम् अतिमात्रं समुन्नद्धाः समुन्नताः अत एव दुरारोहा दुःखेनारोढुं शक्यास्तेषाम्, इन्द्रनीलमयानाम् इन्द्रनीलमणिनिर्मितानां, भवनस्तम्भानां प्रासादस्थूणानाम् अन्यतम एकतम इव हृदयविभ्रमं मनोविक्षोभम् उत्पादयसि जनयसि । अत्रेन्द्रनीलमणिमये प्रासादस्तम्भे रामस्य सादृश्यं विदूषकप्रतिभानुकूलम्, नवमेघस्निग्धश्यामलत्वाद् रामस्य नीलमयभवनस्तम्भानामन्यतमेन साम्यमुत्प्रेक्षितम् । एतस्य पुरोवर्त्तिनः लक्ष्मीनिवासभवनस्य लक्ष्मीनिवासनाम्नः प्रासादस्य सेवासमयसमुपागतसामन्तनरेन्द्रमधुरशब्दोपगीतस्य सेवासमये सेवाकाले समुपागताः समुपेताः ये सामन्तनरेन्द्रा माण्डलिका राजानस्तेषा मधुरा प्रिया ये शब्दास्तैः उपगीतस्य शब्दायमानस्य, आस्थानदासेरमण्टपपुण्डरीकस्य आस्थानं सभास्थानं तत्र ये दासेराः सेवापुरुषास्तेषा मण्टपं मण्डलमेव पुण्डरीकं कमलं तस्य, कर्णिकामण्डले बीजकोषे इव एतस्मिन् सिंहासने, मधुमथननाभिकमलकर्णिकासमारूढस्य मधुमथनो मधुसूदनस्तस्य या नाभिस्तत्र यत् कमलं पुण्डरीकं तस्य या कर्णिका बीजकोषस्तां समारूढस्य समारुह्य स्थितस्य भगवतः पूज्यस्य पितामहस्य ब्रह्मणः महत्त्वं महिमानम् अधिक्षिपन् तिरस्कुर्वन् उपविष्टः स्थितो भव ।

अद्येति । अभिनवसुखदुःखस्य अभिनवं नूतनञ्च यत्सुखदुःखं तस्य सचेतनः ज्ञातेवास्मि संवृत्तः । वस्तुतः पूर्वं मम सुखदुःखज्ञानं नासीदिदानीन्तु तत्संवृत्तमिति रामस्याभिप्रायः ।

छायादिदर्शनवलादधुना मनो मे
दुःखं सुखञ्च परिगृह्य पुनः प्रसूतम् ॥ ४ ॥

(चिन्ता नाटयति)

वि—(निर्वर्ण्यात्मगतम्) अहो! अस्य साम्प्रतमभिप्रायं लक्षयिष्ये।
अहो! से संपद अभिप्पाअं लक्खइस्सम्।

(प्रकाशम्) भो राजन्, एत आसनकेसरिणो गुरुतरभारोद्वहन-
भो राअ, एदे आसनकेसरिणो गुरुदरभरुव्वेहण-

जातपरिश्रमा इव मुखविवरविनिर्गतमुक्ताकलापच्छलेन फेन-
जादपरिस्समा विअ मुहविवरविणिग्गअमुत्ताकलावछलेन फेण-

धारामुद्वमन्ति, तथा तर्कयामि बाहुयुगलेन पृथिवीं हृदयेन
धारं उव्वमंति, तह तक्केमि बाहूजुअलेण पुढवीं हिअएण

पृथिवीदुहितरमुद्वहन्नतीव गुरुतरः संवृत्त इति।
पुढवीदुहिदरं उव्वहंतो अदीव गुरुअरो संवुत्तोत्ति।

अ०—इयत्सु दिवसेषु निरस्तजाने: नैराश्यलुप्तमनस न सुखं न दुःखम् आसीत्। अधुना छायादिदर्शनबलात् मे मनः दुःखं सुखं च परिगृह्य पुनः प्रसूतम्॥ ४ ॥

स०—निरस्तजाने:—निरस्ता जाया येन तस्य। नैराश्यलुप्तमनस:—नैराश्येन लुप्तं मनो यस्य तस्य। छायादिदर्शनबलात्—छायादेर्दर्शनस्य बल तस्मात्।

निरस्तजानि—one who had deserted his wife **नैराश्य**—despair. **छाया**—reflection. **प्रसूत**—generated.

टी०—इयत्सु दिवसेषु सीतापरित्यागदिनात्प्रभृति अद्यावधिवासरेषु निरस्तजानेः निरस्ता विवासिता जाया पत्नी येन तस्य, नैराश्यलुप्तमनसः निराशस्य भावो नैराश्यम् आशाराहित्यं तेन लुप्तं विकृतिं गतं मनो यस्य तस्य, मम न सुख न दुःखम् आसीत् सुखदुःखे नाभूताम्, सीताविषयकशोकातिरेकात् मनसः स्वविषयेष्वप्रवृत्तित्वम्, तदेव कविना लुप्तत्वेनोत्प्रेक्षितम्। अधुना साम्प्रतं छायादिदर्शनबलात् दीर्घिकाया सीताप्रतिबिम्बनिरीक्षणवशात् मे मनः दुःखं सुखं च परिगृह्य दुःखसुखरूपमाधाय पुनः प्रसूतं पुनरुत्पन्नम्। अत्र मनसो लुप्तत्वं प्रसूतत्वं च कविकल्पनासिद्धमेव, वस्तुतस्तु मनसो लुप्तिप्रसूत्यविषयत्वमेव ॥ ४ ॥

टी०—निर्वर्ण्य विचार्य। आत्मगतं स्वगतम्। अभिप्रायम् आशयम्। लक्षयिष्ये आकारेङ्गितादिभिरवधारयितुं यतिष्ये। आसनकेसरिणः आसनमुद्वोढुं कल्पिता: सिंहाः। गुरुतरभारोद्वहनजातपरिश्रमा: गुरुतरस्य महत्तरस्य भारस्य भरस्योद्वहनेन उत्थापनेन जात: समुद्भूत परिश्रम आयासो येषा ते तथाभूता:। मुखविवरविनिर्गतमुक्ताकलापच्छलेन मुखविवरात् आननबिलाद् विनिर्गता विनिर्याता ये मुक्ताकलापा मुक्तानां कलापाः समूहास्तेषां छलेन व्याजेन फेनधाराम् फेनस्य

रा—(आत्मगतम्) सीताकथामुपश्रुत्य कौशिको नूनं जिज्ञासते; एष बालमित्रम्, तदस्मै यथास्थितं निवेदयामि। (प्रकाशम्) वयस्य, अस्त्येतत् स्मराम्यहमविच्छेदेन वैदेहीम्।

वि—किं दोषत उत गुणतः?
किं दोसदो आदु गुणदो?

रा—न दोषतो नापि गुणतः।

वि—एतदुभयमुज्झित्वा कथं सीमन्तिन्यः स्मर्यन्ते?
एदं उभयं उज्झिअ कहं सीमन्तिणीओ सुमरीअन्ति?

रा—अन्यदम्पतीविषय एव कारणानुरोधी प्रेमावेशः, सीतारामयोस्तु न तथा।

दुःखे सुखेष्वप्यपरिच्छदत्वा-
दसूच्यमासीच्चिरमात्मनीव।

समुद्रकफस्य धारा राजिम् उद्वमन्ति उद्गिरन्ति। तथा तर्कयामि सम्भावयामि बाहुयुगलेन भुजद्वयेन पृथिवीं, हृदयेन चेतसा पृथिवीदुहितरं सीताम्, उद्वहन् दधान अतीवात्यन्तं गुरुतर. संवृत्त सञ्जात·। हृदि सीतोद्वहनाद् भुजयो. पृथिवीधारणाच्च रामस्य भारातिशयेनासनकेसरिणा महान् परिश्रमो जात·, अत एव सिंहाना दशनव्यपदेशाय मुखविवरे निहितस्य मुक्ताकलापस्य व्याजेन फेनोद्गमत्वम् उत्प्रेक्षितम्।

टी०—सीताकथाम् उपश्रुत्याकर्ण्य। जिज्ञासते ज्ञातुमिच्छति। बालमित्रं बालसख·। अविच्छेदेन सन्ततम्। उभयं गुणदोषावित्यर्थ। उज्झित्वा विसृज्य। सीमन्तिन्य· स्त्रिय। अन्यदम्पतीविषये अन्यौ मदतिरिक्तौ यौ दम्पती जायापती तद्विषये एव प्रेमावेशः स्नेहातिशय. कारणानुरोधी कारणसम्बन्धेन वर्तते, सीतारामयोस्तु तथा न, अहेतुक एव सीतारामयो. प्रीत्यतिशय, न तु गुणसम्बन्धेन वर्त्तते इति रामस्याभिप्रायः। एतदनुरूप एवार्थो भवभूतिनोत्तररामचरिते समर्थितः—

व्यतिषजति पदार्थानान्तरः कोपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतय. संश्रयन्ते।

अ०—दुःखे सुखेषु अपि अपरिच्छदत्वात् असूच्यं दोषगुणानपेक्षः निर्व्याजसिद्धः मम भावबन्धः तस्यां चिरम् आत्मनि इव स्थित आसीत्॥ ४॥

स०—अपरिच्छदत्वात्—परिच्छदस्य भावः परिच्छदत्वम् न परिच्छदत्वम् अपरिच्छदत्वं तस्मात्। असूच्यम्—न सूच्यम्। दोषगुणानपेक्ष·—गुणाना दोषानाञ्च नास्त्यपेक्षा यस्य स.। निर्व्याजसिद्ध —निर्व्याजं सिद्ध.।

अपरिच्छद—not concealed, visible. असूच्य—unproclaimed. चिरम्—for long. अनपेक्ष—unmindful. निर्व्याज—without any cause. सिद्ध—established. भावबन्ध—bond of affection.

तस्यां स्थितो दोषगुणानपेक्षो
निर्व्याजसिद्धो मम भावबन्धः ॥ ५ ॥

वि—मा सुमं वैदेहीमलीकमधुरवचनैरस्माद्दशं वञ्चयसि । स
मा सुमं वैदेहिं अलिअमहुरवअणेहि अहारिसं वंचेसि । सो
खलु त्वं देवीमन्तरेण—
खु तुमं देविं अन्तरेण—

रा—नैवमध्यवसितं—एकान्ते सीतानिरपेक्षो राम इति ।

अन्तरिता अनुरागा भावा मम कर्कशस्य बाह्येन ।
तन्तव इव सुकुमाराः प्रच्छन्नाः पद्मनालस्य ॥ ६ ॥

स्थित—centred.

टी०—दुःखे सुखेष्वपि अपरिच्छिदत्वात्सुलक्ष्यत्वात् असूच्यं न सूच्यं न निरूपणीयमित्यसूच्यं यथा स्यात्तथा दोषगुणानपेक्ष दोषान् कोपादीन् गुणान् माधुर्यादीन् अनपेक्ष्य स्थितः निर्व्याजसिद्ध स्वभावसिद्ध. मम भावबन्ध स्नेहातिशय तस्या सीताया चिरम् आत्मनीव स्थित । यथा स्वात्मनि दोषगुणानपेक्षयैव प्रीतिस्तद्वन्ममापि सीताया दोषगुणाननुरोधी प्रेमावेश । दोषास्सीताया मम प्रणयं नापकर्षन्ति नैव च गुणा भूयसा प्रीतिं संवर्द्धयन्ति, तस्या हि मम पक्षपातस्याहेतुत्वात्, तथा चोक्तमुत्तररामचरिते —

अहेतु· पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥

टी०—मा सुममिति—यथा सुमं कुसुमं पुष्पकोमलाङ्गीमित्यर्थ., वैदेही सीताम् अलीकमधुरवचनै· अलीकैरसत्यैर्मधुरैः प्रियैर्वचनैर्वाक्यैर्वञ्चयसि, अत्र भूतार्थे वर्त्तमानप्रयोगः, वर्त्तमानसामीप्ये वर्त्तमानवद्वेति सूत्रोक्ते । तथाऽस्माद्दशं जनं मिथ्योक्तिभिर्वञ्चयितुं न यतस्वेति भावः । देवीमन्तरेण सीतात्यागानन्तरं सीता विना यत्त्वं दिवसानगमयोऽतोऽनुमीयते तव सीताविषयक. प्रणयो वचस्येव न तु चेतसीति विदूषकस्याभिप्राय. । नैवमिति । अध्यवसितम् एवं न, तवैवंरूपम् अध्यवसितं निश्चयो न युक्तम्, एकान्ते सीतानिरपेक्षो राम., अत्यन्तं सीतावियोगेनाखिन्नमना राम इति निश्चयोऽयुक्तः । तदेव दर्शयति .—

अ०—अनुरागाः अन्तरिताः, बाह्येन कर्कशस्य मम सुकुमाराः भावाः पद्मनालस्य तन्तवः इव प्रच्छन्नाः ॥ ६ ॥

अनुराग—affection. **अन्तरित**—suppressed. **बाह्य**—exterior. **कर्कश**—harsh. **सुकुमार**—tender. **भाव**—feeling. **पद्मनाल**—lotus-stalk. **तन्तु**—filament. **प्रच्छन्न**—concealed.

टी०—अनुरागाः प्रीतयः अन्तरिता. प्रच्छन्ना., नाहं बहिरनुरागं दर्शयामि,

वि—त्वमतिप्रबलेन हृदयसन्तापेन वडवानलेनेव भगवान् महासमुद्र
तुमं अदिप्पवलेण हिअअसंदावेण वडवाणलेण विअ भअव महासमुद्दो
आत्मनो महत्त्वेन परिहीयसे, अहं पुनः स्वभावलघुतया देव्याः
अत्तणो महत्तणेन परिहीअसि, अहं उण सहावलहुदाए देवीए
सीताया गतिं स्मृत्वा दावानलेनेव तुषारबिन्दुर्निरवशेषं परि-
सीदाए गइ सुमरिअ दावाणलेण विअ तुसारबिंदु णिरवसेसं परि-
शुष्यामि, तत् परित्रायस्व माम् (इति रोदिति)
सुस्सामि, ता परित्ताएहि मं।

रा—यदि त्वं स्मरणयोग्यां सीतामवगच्छसि कस्मादहं तत्परित्याग-
प्रवृत्तस्तदा न प्रतिषिद्धः ?

वि—प्रसादसुमुखोऽपि राजा दुर्विज्ञाप्यः सेवकैः, किं पुनः कोप-
पसादसुमुहो वि राआ दुव्विएणव्वो सेवएहिं, किं उण कोव-
भीषणः।
भीसणो।

रा—वयस्य, नहि मादृशास्तादृशीं कोपावस्थामवगाहन्ते, यस्यां वर्त-
मानायां सुहृदामनाश्रवा भवन्ति।

सीताविषये मम प्रीतिर्नाकारं प्रकटयति। बाह्येन कर्कशस्य मम सुकुमारा कोमला भावाः प्रीत्यात्मकाः पद्मनालस्य नलिनदण्डस्य तन्तव इव सूत्राणीव प्रच्छन्नास्तिरोहिताः सन्ति। रामहृदयमन्तर्गूढघनव्यथमुपरिष्टात्कर्कशमिवाभाति नलिनदण्डतन्तुवत्। यथा च पद्मनालस्य बाह्यतः कर्कशस्याप्यन्तस्तन्तवो मृदुलास्तथैव रामहृदयं बाह्येन कठोरमप्यन्तः सुकुमारमिति॥ ६॥

टी०—त्वमिति। यथा भगवान् महासमुद्रो वाडवेन शोषितोऽपि नापचीयते तथैव त्वं प्रबलेन सन्तापानलेन परिभूतोपि महिम्ना न त्यज्यसे। अहं पुनः स्वभावलघुतया क्षुद्रहृदयत्वात् देव्यास्सीतायाः गतिं दशां स्मृत्वा विचिन्त्य दावानलेन वनवह्निना तुषारबिन्दुरिव हिमकण इव निरवशेषमत्यन्तं परिशुष्यामि। यथा तुषारकणस्य क्षुद्रत्वाद्दावानलेन दहनं सुकरं तथैव मम हृदयस्याल्पाशयतया सन्तापेनावशोषः सुकरः।

टी०—यदीति। यदि त्वं सीतां स्मरणयोग्यां सच्छीलमधुरालापादिभिर्गुणैः स्मरणार्हाम् अवगच्छसि मनुषे तदा कस्मात्केन हेतोः तत्परित्यागप्रवृत्तः तस्याः परित्यागस्तत्परित्यागस्तस्मिन् प्रवृत्त उद्यतोऽहं न प्रतिषिद्धो नैव वारितः। अथ विदूषकः स्वात्मानमदोषं समर्थयन्नाह—प्रसादसुमुख इति। प्रसादसुमुखः प्रसादेन प्रसन्नतया सुमुखो हृष्टाननोऽपि राजा सेवकैः भृत्यैः दुर्विज्ञाप्यो दुःखेन विज्ञापयितुं शक्यः, किं पुनः कोपभीषणः, कोपेन क्रोधेन भीषणो भयङ्करः कथं पुनर्विज्ञाप-

नरपतिरधिकप्रवृत्ततेजा गुणनिहितैः सचिवैर्निवारणीयः ।
भुवनमभितपन् सहस्ररश्मिर्जलगुरुभिर्व्यपनीयते हि मेघैः ॥ ७ ॥

वयस्य, वर्तमाना सीताकथा द्वयोः सन्तापकारिणी । तद्गच्छ प्रतीहारभूमिम्, समाज्ञापय दौवारिकान्—समासन्नस्तपोधनानां सम्पातसमयः, तस्मात्सम्भृतवेत्राणि सर्वद्वाराणि क्रियन्ताम् ।

वि—भो राजन्, कीदृशाः पुनरेते कन्दमूलफलाशिनो वल्कलपरिधाना उद्दण्डदण्डधरा ईदृशेनाचारेण सम्भाव्यन्ते ।
भो राअ, कीस उण एदे कंदमूलफलासिणो वक्कलपरिधाणा उद्दण्डदंडधरा ईरिसेण आआरेण संभाविअन्ति ।

नीय स्यात्, कोपभीषणत्वात्तदानी न मया त्वं वारित इत्यत्र भवानेवापराधी नाहमिति भाव । अथ राम· स्वकीयं दोषं परिहरन्नाह—वयस्येति । मादृशास्तादृशी कोपावस्थां नावगाहन्ते न प्राप्नुवन्ति यस्या क्रोधदशाया वर्त्तमानाया विद्यमानाया सुहृदा मित्राणाम् अनाश्रवा हितोपदेशाङ्गीकारपराङ्मुखा अवश्या वा भवन्ति ।

अ०—अधिकप्रवृत्ततेजा· नरपतिः गुणनिहितैः सचिवै· निवारणीय. । सहस्ररश्मिः भुवनम् अभितपन् जलगुरुभि मेघैः व्यपनीयते हि ॥ ७ ॥

स०—अधिकप्रवृत्ततेजा.—अधिकं प्रवृत्तं तेजो यस्य स । गुणनिहितै –गुणेषु निहिता गुणनिहितास्तै । जलगुरुभिः–जलेन गुरुभि ।

अधिक—excessive. **प्रवृत्ततेजा.**—wielding authority. **गुणनिहित**—appointed for virtuous counsel. **सचिव**—minister. **निवारणीयः**—ought to be restrained. **सहस्ररश्मि**—the thousand-rayed one, sun. **अभितपन्**—oppressing or heating. **भुवन**—the world. **व्यपनीयते**—is removed. **गुरु**—heavy.

टी०—अधिकमतिशयेन प्रवृत्तं प्रवृद्धं तेज. प्रभावो यस्य स. तथाभूतो नरपतिर्भूप. गुणनिहितै गुणेषु मन्त्रणादिषु कर्मसु निहितै स्थापितैः सचिवैर्मन्त्रिभिर्निवारणीयो वारयितव्य । सहस्ररश्मि· सूर्य. भुवनं पृथिवीम् अभितपन् तापयन् जलगुरुभिः जलेन सलिलेन गुरुभि पूर्णैं मेघैर्जलदैः व्यपनीयते दूरीक्रियते आच्छाद्यते इत्यर्थः । अति सर्वत्र वर्जयेदिति न्यायमनुसरद्भिस्सचिवै राजाऽधिकप्रवृत्ततेजा दुरन्ताद् व्यवसायाद् रोद्धव्यः ॥ ७ ॥

टी०—वयस्य ! मित्र ! वर्तमाना प्रवृत्ता सीताकथा द्वयोस्तव च मम चोभयोः सन्तापकारिणी दु.खोत्पादका । तद्गच्छ प्रतीहारभूमिं द्वारपालस्थानम् । दौवारिकान् द्वारपालान् समाज्ञापय । तपोधनाना तापसाना सम्पातसमय. सम्भूयागमनवेला समासन्नः निकटवर्त्ती । तस्मादत· सर्वद्वाराणि सम्भृतवेत्राणि क्रियन्ताम् ,

रा—अस्थानेऽयमत्रभवतः सन्देहः । ननु मूलस्वयोगमूलसकल-
पुरुषार्थसंवेदिनी ज्ञाननिष्पत्तिः । पश्य—

ज्योतिः सदाभ्यन्तरमाप्तपादै-
रदीपितं नार्थगतं व्यनक्ति ।
नालं हि तेजोऽप्यनलाभिधानं
स्वकर्मणो मारुतमन्तरेण ॥ ८ ॥

सर्वेषु द्वारेषु द्वारपालैः सर्वैः सावहितैश्च स्थातव्यम् । भो राजन्निति । कन्दमूल-फलाशिन कन्दश्च मूलञ्च फलञ्च तानि कन्दमूलफलानि तान्यशितुं शील येषा ते कन्दमूलफलाहारिणस्तपस्विन । वल्कलपरिधाना वल्कल वृक्षत्वक् परिधानं वासो येषा ते । उद्दण्डदण्डधरा· उद्दण्डा प्रोत्तुङ्गा अत एव भयावहा ये दण्डास्तेषा धरा धारिण । ईदृशेनैवविधेन आचारेण सम्मानरूपेण व्यवहारेण सम्भाव्यन्ते आद्रियन्ते । कथमेते सम्मानप्रदद्रव्यविहीना सातिशय सत्क्रियन्ते, अनर्हा एते तथाविधस्य मानस्येति विदूषकस्याशय ।

टी०—अस्थान इति । अत्रभवतः पूज्यस्य ब्राह्मणत्वात्, यद्वा अत्रास्मिन् विषये भवतः सन्देह. सशयः अस्थानेऽयुक्त । मूलं सर्वस्यास्य जगतो मूलभूतं कारणरूपं ब्रह्म तेन य· स्वस्यात्मनो योग सम्बन्धस्तन्मूलास्तान्निमित्ता ये सकला सर्वे पुरुषार्थास्तेषा संवेदिनी ज्ञापयित्री ज्ञाननिष्पत्ति ज्ञानसमृद्धिरेषा वर्तते । तथाविध-ज्ञानसद्भावादेते सम्माननार्हा इति भाव ।

अ०—सत् आभ्यन्तरं ज्योतिः आप्तपादैः अदीपितं न अर्थगतं व्यनक्ति । अनलाभिधानं तेज. हि मारुतम् अन्तरेण स्वकर्मणः न·अलम् ॥ ८ ॥

सत्—supreme. **ज्योति**—light. **आभ्यन्तर**—inner. **आप्तपाद**—great soul. **अदीपित**—not enkindled. **अर्थगत**—the true meaning of things. **व्यनक्ति**—manifests. **तेज·**—energy.—**अनल**—fire. **अभिधान**—the appellation. **मारुत**—wind. **अन्तरेण**—without. **न अलम्**—is not equal.

टी०—सत् शाश्वतम् उत्तमं वा आभ्यन्तरम् अन्त.करणस्थितं ज्योतिस्तेजः प्रकाशात्मकं ब्रह्म आप्तपादैराप्तै साक्षात्कृतधर्मभिः प्रमाणभूतैर्मुनिभिर् अदीपितम् अप्रकाशितं सत् अर्थगतम् परमार्थवस्तुस्थितिं न व्यनक्ति न प्रकटयति । अत्रायमाशयः । ब्रह्मात्मकं तेजोऽन्तःकरणात्मकगुहायां निहितम् आप्तोपदेश-मन्तरेण न व्यक्तं भवति ; जीवस्वरूपज्ञानायाप्तोपदेशात्मकं बाह्योपकरणमपेक्ष्यते । अत्र दृष्टान्तमाह । अनलाभिधानम् अग्निसंज्ञकं तेजो ज्योतिः मारुतमन्तरेण वायुना विना स्वकर्मणः दाहक्रियाया कृते नालं न शक्तम् । यथा ज्वलनकर्मणो-प्यग्नेर्दीपनाय वायोरपेक्षा तथैव प्रकाशात्मकस्यापि परब्रह्मण· प्रकाशाय मुनिजनो-

वि—यदि महार्थस्तपोधनानां समागमः, अहं च लघु गत्वा यथा-
जदि महत्थी तपोधणाणा समाअमो, अह अ लहु गच्छिअ जहआ-
ज्ञप्ति सम्पादयामि। (निष्क्रम्य पुनः प्रविश्य) ही ! ही ! साम्प्रतं मया
णत्ति संपादेमि। ही ही संपदं मए
राज्ञ आज्ञया प्रतीहारनिक्षिप्तेन दृष्टौ सुस्निग्धश्यामलच्छायौ, अनु-
राइणो आण्णाए पडिहारणिक्खित्तेण दिट्ठा सुसिणिद्धसामलच्छाआ, अणु-
द्भिन्नतारुण्यविग्रहौ, तोरणस्तम्भावस्थितौ, मङ्गलाङ्कराविव बाल-
ब्भिण्णतारुण्णविग्गहा तोरणत्थंभवट्ठिदा मंगलंकुरा विअ बाल-
भावेन, असमाप्तप्रमाणाविव, अप्रमादाविव, कन्दर्पदारकाविव रूप-
भावेण, असमत्तपमाणा विअ, अप्रमाधा विअ, कंदप्पदारआ विअ रुप-
सौभाग्येन, उच्चतरौ सालतरू इव, प्रस्पन्दाविव, लोलतराविव,
सोवग्गेण, उच्चदरा सालतरु विअ, पप्पंदा विअ, लोलदरा विअ,
महाबलाविव, अत्यन्तधीराविव, अत्यन्तललिताविव, असंक्षेपिता-
महाबला विअ अच्चंतधीरा विअ, अच्चंदललिदा विअ, असंखेपिदा
विव, वयस्यस्य कलादर्शनावागतौ द्वौ तापसकुमारकौ ।
विअ, वअस्सस्स कलादंसणा आगदा दुवे तापसकुमारआ ।

पदेशापेक्षा । अत एतेषा सम्मानना युक्तैवेति रामस्याभिप्रायः ॥ ८ ॥

टी०—तपोधनाना तपस्विना समागम सम्भूयावस्थानं यदि महार्थः महानर्थः प्रयोजनं यस्य स., तर्हि अहं लघु शीघ्रं गत्वा यथाज्ञप्ति यथादिष्टं सम्पादयामि अनुतिष्ठामि। ही हीति हर्षविस्मयद्योतकमव्ययम्। प्रतीहारनिक्षिप्तेन प्रतीहार-कर्मणि द्वारपालनरूपे निक्षिप्तेन योजितेन मया सुस्निग्धश्यामलच्छायौ सुष्ठु स्निग्धा श्यामला च छाया सुषमा ययोस्तौ । अनुद्भिन्नतारुण्यविग्रहौ नोद्भिन्नं न प्रकटी-भूतं तारुण्यं यौवनं विग्रहे शरीरे ययोस्तौ। तोरणस्तम्भावस्थितौ तोरणे बहिर्द्वारं तत्र यः स्तम्भ स्थूणा तत्रावस्थितौ । बालभावेन शैशवेन । मङ्गलाङ्कुराविव मङ्गलस्य श्रेयस. अङ्कुरौ प्ररोहाविव, शैशवमङ्गलयोरारम्भ एव सद्भावात्सादृश्यम् । असमाप्तप्रमाणौ न समाप्तं नावसितं प्रमाणमुच्छ्रायो ययोस्तौ । अप्रमादौ प्रमादोऽ-नवधानता स नास्ति ययोस्तौ प्रमादरहिताविति यावत् । रूपसौभाग्येन सौन्दर्य-श्रिया कन्दर्पदारकौ कामसुतौ इव । उच्चतरौ अत्युन्नतौ सालतरू इव सालपादपा-विव । प्रस्पन्दौ प्रकृष्टः स्पन्दः स्फुरतिरूपो ययोस्तौ । लोलतरौ चपलतरौ इव महाबलौ अतिमात्रबलोपेतौ इव । अत्यन्तधीरौ अत्यन्तधैर्यान्वितौ । अत्यन्त-ललितौ अत्यन्तं लालित्ययुक्तौ । असंक्षेपितौ उपचीयमानारोहपरिणाहौ । कला-दर्शनौ कलाया. सङ्गीतकलाया दर्शनं विज्ञानं ययोस्तौ । वयस्यस्य तव कृते आगतौ समुपस्थितौ तापसकुमारकौ तपस्विपुत्रौ । साकूतं साभिप्रायम् । तयोः बालकयोः

रा—(साकूतम्) कस्तयोरस्मन्नयनसीमावतरणप्रतिबन्धः ?

वि—शृणु तावदेतयोर्बालभावललितयोः कौतूहलसम्बद्धयोरेत-
सुणाहि दाव एदाणं बालभावललिदाणं कोऊहलसंबद्धाणं एदं
मुपन्यासम्।
उवण्णासम्।

रा—कथय कथय।

वि—तौ किल भगवतो वाल्मीकिमहर्षेः शिष्यौ प्रवीणौ वीणाकलाविज्ञा-
ते किल भअवदो वम्मीइमहेसिणो सिस्सा पवीणा॰ वीणाकलाविण्णा
नेऽपूर्वं किलागमं धारयतः। एतौ किलैवं वदतः—"राजर्षेर्जनानां
णेअपुव्वं किल आअम धारिंति। एदे किल एव्वं वदंति—"राएसिणो जणाणं
तपोधनबहुमानेनास्माकमिव भूस्थानमासनं .. ..अनुष्ठातव्यम्,
तपोधणबहुमाणेण अह्लाणं विअ भूट्ठाणं आसणं पदाणं अ अणुचिट्ठिदव्वं,
.. ..दुष्करविन्यासं महा-
जदा अहे मदभद्दस्स दीअइ रादललुअ दुक्खरविण्णासं महा-
कविसङ्ग्रथितमहापुरुषचरित्रबन्धं महार्थगम्भीरं केनाप्यश्रुत-
कइसंगधितमहापुरुसचरित्तबंधं महत्थगंभीरं केण वि अस्सुद-
पूर्वमागमं गान्धर्ववेदसंवादि सरसं योगविरचितवर्णरमणीयकं
पुव्वं आअमं गधव्ववेदसंवादि सरसं जोअविरइअवण्णरमणीअं
वीणातन्त्रीरसितानुविद्धं गीतं गायावः, तदा विज्ञानविशेषप्रसन्न-
वीणातंतिरसिदाणुविद्धं गीदं गाअह्म, तदा विण्णाणविसेसपसण्ण-

अस्मन्नयनसीमावतरणप्रतिबन्ध अस्माकं नयनयोर्नेत्रयो सीमाया मर्यादाया अवतरणे विषयताया प्रतिबन्धो विघ्न· कः, कथमेतत्कुमारदर्शनेनास्माकं दृष्टिव्यापारो नान्यत्र भवति। नयनयोरेकत्रैव संलग्नत्वादन्यत्र व्यापाराभाव। शृणिवति। बालभावललितयो बालभावेन बाल्येन ललितयो. मनोहरयो. एतयोः कुशलवयो. एतम् उपन्यासं कथां शृणु। कथयेति रामेणोक्ते विदूषक आह—ताविति। वाल्मीकिमहर्षे शिष्यावित्युक्त्या तयोस्सद्गुरुत्वं सूचितम्। प्रवीणौ निपुणौ वीणाकलाविज्ञाने वीणायास्तन्त्र्या या कला वादनकला तस्या यद्विज्ञानं दर्शनं तस्मिन् अपूर्वम् लोकातिशायि आगमं विज्ञानं धारयत.। राजर्षे रामभद्रस्य जनानाम्, अत्र पाठस्त्रुटितः। दुष्करविन्यासं दुष्कर दु.खेन कर्तुं शक्य. पदविन्यास पदानां विन्यासो रचना यत्र तत्। महाकविसङ्ग्रथितमहापुरुषचरित्रबन्धं महाकविर्वाल्मीकिस्तेन सङ्ग्रथितो निर्मितो महापुरुषस्य लोकोत्तरस्य रामस्य चरित्रबन्धश्चरितप्रसङ्गो यत्र तत्। महार्थगम्भीरं महांश्चासावर्थ. महार्थस्तेन गम्भीरं गहनम्। केनापि जनेन अश्रुतपूर्वं पूर्वं न श्रुतम्। गान्धर्ववेदसंवादि गान्धर्वश्चासौ वेदः गान्धर्ववेद· सामवेदस्तस्य संवादि

हृदयो राजा यद्वृत्तान्तमनुष्ठास्यति एष ज्ञातव्य इत्यस्माकं
हिअओ राआ जं वुत्तंतं अणुचिट्ठस्सदि एसो जाणिदंव्वोत्ति अह्माणं
भगवतो वाल्मीकिमहर्षेरादेशः-इति ।
भअवदो वंमीइमहेसिणो आदेसोत्ति" ।

रा—**अहो विज्ञानावलेपः शौण्डीर्यगर्भश्चापन्यासः । वयस्य ! यथाभिमतं प्रतिज्ञाय प्रवेशयाविलम्बितं पुरा तौ न चिरावस्थाननिर्वेदेन पराङ्मुखीभवतः ।**

विं—**कुत इदानीं निर्वेदः ? तौ हि अन्योन्यवत्सलत्वमाकारसा-**
कुदो दाणिं णिव्वेदो ? ते हि अण्णोण्णवच्चलत्तणं आआरसा-
दृश्यं काकपक्षपरिभूषितं च वदनं प्रेक्ष्य 'एवं रामलक्ष्मणौ महा-
रिचं काअपक्खपरिभूसिदं च वअणं पेक्खिअ 'एव्वं रामलक्खणा महा-

संवदनशीलं सामवेदवद्गातुं शक्यमित्यर्थ । सरसं रसैः शृङ्गारादिभिस्सह वर्तत इति तत् । योगविरचितवर्णरमणीयकं योगश्चित्तवृत्तिनिरोधस्तेन विरचितं वर्णानामक्षराणा रामणीयकं सौन्दर्यं यत्र तत् । वीणातन्त्रीरसितानुविद्ध वीणाया विपञ्च्या यास्तन्त्र्यस्तासा यद् रसितं नादस्तेनानुविद्धं सङ्गतं वीणावादननादमिश्रितमित्यर्थ । विज्ञानविशेषप्रसन्नहृदय विशिष्टं ज्ञानं विज्ञानं सङ्गीतकला तस्य विशेषस्तेन प्रसन्नं हृष्टं हृदयं मनो यस्य स. । यद्वृत्तान्तं यमुदन्तम् अनुष्ठास्यति विधास्यति एष वृत्तान्तः ज्ञातव्य इत्यस्माकं वाल्मीकिमहर्षेः आदेश आज्ञा ।

टी०—अहो इति । विज्ञानावलेप. विज्ञानस्य विद्यायास्सङ्गीतकलाया इति यावत् अवलेपोऽहङ्कार. । शौण्डीर्यगर्भ. शौण्डीरस्य भाव शौण्डीर्यं मदातिरेक तद् गर्भे मध्ये यस्य सः । उपन्यासः कथानकम् । यथाभिमतं यथेष्टं प्रतिज्ञाय प्रतिज्ञां कृत्वा अविलम्बितं शीघ्रं तौ प्रवेशय यथा चिरावस्थाननिर्वेदेन चिराय बहुकालं यदवस्थानं बहिर्द्वारे स्थितिस्तेन यो निर्वेदो ग्लानिस्तेन न पराङ्मुखीभवत न प्रतिनिवर्त्तेते ।

टी०—कुत इति । इदानीमधुना निर्वेदो वैराग्यं कुत कस्माद्धेतो. स्यादिति शेष । शङ्कितश्चिरावस्थाननिर्वेदस्तयोर्नास्तीति विदूषकस्याभिप्रायः । ताविल्यस्य द्वितीयान्तस्य पदस्य प्रेक्ष्येत्यनेनान्वय । तयो. अन्योन्यवत्सलत्वम् आकारसादृश्यं काकपक्षपरिभूषितं वदनं च प्रेक्ष्येति सम्बन्ध । अन्योन्यवत्सलत्वम् अन्यस्य अन्यस्य अन्योन्यस्य वत्सलत्वं भ्रातृत्वम्, अत्रान्योन्यपदयो. समासविरहत्वं बोध्यम्, कर्मव्यतिहारत्वात्सर्वनाम्नो द्वित्वं, समासवद्भावनिषेधश्च, असमासवद्भावे पूर्वपदस्थस्य सुपः सु. । आकारसादृश्यम् आकृतिसाम्यम् काकपक्षपरिभूषितं काकपक्ष. शिखण्डकस्तेन परिभूषितमलङ्कृतं वदनं मुखं प्रेक्ष्य विलोक्य एवं एवंरूपेणाकारेण रामलक्ष्मणौ महाराजदशरथे ध्रियमाणे जीवति राजस्थानं

राजदशरथे म्रियमाणे राजस्थानमलङ्कुर्वन्तावभूताम्'-इति
राअदसरहे धरमाणे राअट्ठाणं अलङ्करंता भवंति'-त्ति
युवयोर्बालभावं महाराजं च स्मृत्वा बाष्पपूर्णनयनैः सौविदल्लैः
तुझाणं बालभावं महाराअं अ सुमरिअ बफ्फपुरणणअणेहिं सोविदल्लएहिं
परिपृष्टौ तिष्ठतः।
परिपुट्टा चिट्ठति।

रा—किमस्मच्छैशवानुकारिणी तयोराकृतिः?

वि—अथ किम्।
अह इं।

रा—वर्धते मे कुतूहलम्, तत्प्रवेशयाविलम्बितम्।

वि—यद्भवानाज्ञापयति।
जं भवं आणवेदि।

(इति निष्क्रान्तः)

(ततः प्रविशतो विदूषकेणोपदिश्यमानमार्गौ तापसौ कुशलवौ)

वि—इत इत आर्यौ।
इदो इदो अआ।

(परिक्रम्य)

कुशः—(अपवार्य) वत्स लव! इदानीं भगवतो वाल्मीकेरादेशादम्बामभिवाद्य पार्थिवभवनाभिमुखं प्रस्थिते मयि काकपक्षग्रहणसञ्ज्ञया पर्णशालायां प्रवेश्य कीदृशेन रहस्येनाम्बया पृथक् संविभक्तो भद्रमुखः?

राजा दशरथस्तस्य स्थानं प्रासादं सभां वाऽलङ्कुर्वन्तौ भूषयन्तौ अभूतामित्येवं युवयोः रामलक्ष्मणयोः बालभावं शैशवं महाराजं दशरथं च स्मृत्वा चिन्तयित्वा बाष्पपूर्णनयनैः बाष्पैरश्रुभिः पूर्णानि भरितानि नयनानि येषां तैः सौविदल्लैः कञ्चुकिभिः परिपृष्टौ तिष्ठतः बहिर्द्वारदेशे इति शेषः।

टी०—किमस्मच्छैशवेति। अस्माकं शैशवस्य बाल्यस्य अनुकारिणी अनुरूपा। आकृतिः शरीररचना। कुतूहलम् आश्चर्यम्। अविलम्बितं शीघ्रम्। उपदिश्यमानमार्गौ उपदिश्यमानो मार्गो ययोः तौ। अपवार्य, अपवारितलक्षणं यथा 'तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते' इति साहित्यदर्पणे। आदेशात् आज्ञया अम्बां मातरम् अभिवाद्य प्रणम्य पार्थिवभवनाभिमुखं पार्थिवस्य राज्ञो भवनाभिमुखं प्रस्थिते गन्तुं प्रवृत्ते मयि काकपक्षग्रहणसञ्ज्ञया काकपक्षाणां शिखण्डकानां ग्रहणेन स्पर्शेन या सञ्ज्ञा सङ्केतस्तया पर्णशालायाम् उटजे प्रवेश्यानीय कीदृशेन रहस्येन अम्बया जनन्या भद्रमुख भद्रं शुभं मुखमाननं यस्य

लवः—न खलु कश्चित्संविभागः। किन्तु तदानीं तापसजनसङ्कीर्ण-मुटजाभ्यन्तरं प्रविश्य बाहूपपीडं तनूदरेण परिष्वज्य शिरसि चाघ्राय सीत्कारलक्षितस्मितमधुरं साशङ्का शनैः शनैः कर्ण-पत्रं वर्धयन्ती स्वमखेन मन्मुखमपवार्यैवं सन्दिष्टवती—वत्स! युवाभ्यां स्वाभाविकमवलेपं परित्यज्य सत्कर्त्तव्या महार्षिजः, कुशलञ्च परिप्रष्टव्यम् - इति

कुशः—युज्यते कुशलप्रश्नः, प्रणामस्तु कथम्?

लवः—न कथम्?

कुशः—अप्रणन्तारः किलास्मद्वंश्याः।

लवः—क एवमाह?

कुशः—अम्बा।

लवः—प्रणाममपि सैवोपदिष्टवती। न च गुरुनियोगा विचारमर्हन्ति।

कुशः—साधयामस्तावत्, अग्रतस्तत्र यत्कालोचितमनुष्ठास्यावः।

(परिक्रामत.)

स त्वम्। पृथक् संविभक्त पृथक् कर्त्तव्यतया समादिष्ट.।

न खल्विति। संविभागः पृथगनुष्ठेयम्। तदानीं तस्मिन् समये तापसजन-सङ्कीर्णं तापसजनैस्तपस्विभिः सङ्कीर्णं व्याप्तम् उटजाभ्यन्तरम् उटजं पर्णशाला तस्याभ्यन्तरमन्तर्वर्त्तिप्रदेशं प्रविश्य बाहूपपीडं बाहुभ्यामुपपीड्य तनूदरेण कृशो-दरेण परिष्वज्याभिलष्य शिरसि मूर्ध्नि आघ्राय परिचुम्ब्य सीत्कारलक्षितस्मित-मधुरं सीत्कारेण लक्षितं ज्ञातं यत् स्मितं तेन मधुरं हृदयग्राहि यथा स्यात्तथा। साशङ्का शङ्कया सह वर्त्तमाना शनैः शनैः मन्दं मन्दं कर्णपत्रं कर्णभूषणं वर्ध-यन्ती अपसारयन्ती। स्वाभाविक बालभावसुलभम् अवलेपं गर्वं परित्यज्य विहाय। सत्कर्तव्य. सम्माननीय। कुशलं कल्याणं परिप्रष्टव्यम्। कुशलस्य प्रश्नः युज्यते, स्वभावसिद्ध एवेत्यर्थः, प्रणामस्तु कथं युज्यते इति कुशस्य तर्कः। कथं न युज्यत इति लवस्य पृच्छागर्भं वच.। अत्र कुश उपपत्तिमाह। अप्रणन्तार इति। अस्म द्वंश्याः अस्माकं वंशे भवा. अप्रणन्तार. न कदापि प्रणमन्ति। क एवमाह केने-दमुक्तमिति लवेनापृष्टे अम्बयेदमभिहितमिति कुशस्य प्रतिवचनम्। अत्र लव आह—सैव अम्बैव प्रणामं नमस्कारमपि उपदिष्टवती कथितवती। गुरुनियोगा. गुरूणां नियोगाः शासनं विचारं तर्कं नार्हन्ति नापेक्षन्ते। अथ कर्त्तव्याकर्त्तव्य-निश्चयपराङ्मुख. कुशो लवं गमनायैव प्रेरयति—साधयामः गच्छाम· 'प्रायेण एयन्तकः साधिर्गमेः स्थाने प्रयुज्यते' इति दर्पणे। कालोचितं समयानुसृतम् अनुष्ठास्यावः करिष्याव.।

वि—इत इत आर्यौ ।
इदो इदो अंज्जा ।

रा—(विलोक्य) नूनं तदेवैतद्दारकद्वयं कौशिकेनोपदिश्यमानमार्गमित एवाभिवर्तते । कथमस्मायितोऽस्मि । किन्तु खल्वेतत ।

न चैतदभिजानामि नाकूतमपि किञ्चन ।
तथाप्यापातमात्रेण चक्षुरुद्बाष्पतां गतम् ॥ ६ ॥

अथ वा किमत्राश्चर्यम्—

आपातमात्रेण कयापि युक्त्या
सम्बन्धिनः सन्नमयन्ति चेतः ।
विमृश्य किं दोषगुणानभिज्ञ-
श्चन्द्रोदये श्च्योतति चन्द्रकान्तः ॥ १० ॥

टी०—नूनमिति । एतत् समीपतरवर्त्ति पुरतो दृश्यमानं वा दारकद्वयं बालकयुगलं कौशिकेन मुनिविशेषेण उपदिश्यमानमार्गम् उपदिश्यमानो निर्दिश्यमानो मार्गो वर्त्म यस्य तत् इत एव अभिवर्तते इत एवागच्छति । कथम् अस्मायित· आत्मानं विस्मृत्यान्यथाभावं प्रापितोऽस्मि ।

अ०—एतत् न अभिजानामि किञ्चन आकूतम् अपि न च जानामि, तथापि आपातमात्रेण चक्षु. उद्बाष्पतां गतम् ॥ ६ ॥

अभिजानामि—(I) recognise. आकूत—intention. आपातमात्र—merely casting a glance. उद्बाष्पता—tearfulness.

टी०—एतत् अग्रतो वर्त्तमानं दारकद्वयं न अभिजानामि न परिचिनोमि । किञ्चन आकूतम् अभिप्रायम् अपि न जानामि न वेद्मि । तथापि आपातमात्रेण आपातत एव दर्शनसमय एव चक्षु· नेत्रम् उद्बाष्पता गतमश्रुपूर्णं संवृत्तम् ॥ ६ ॥

अ०—सम्बन्धिनः कयापि युक्त्या आपातमात्रेण चेतः सन्नमयन्ति । दोषगुणानभिज्ञः चन्द्रकान्तः चन्द्रोदये विमृश्य किम् श्च्योतति ॥ १० ॥

स०—दोषगुणानभिज्ञ.—दोषाश्च गुणाश्च ते दोषगुणास्तेषामनभिज्ञः । चन्द्रोदये—चन्द्रस्य उदयस्तस्मिन् ।

सम्बन्धिन्—relation. आपातमात्र—first sight. सन्नमयन्ति—enslave. अनभिज्ञ—unconscious. चन्द्रकान्त—moonstone. श्च्योतति—melts. चन्द्रोदय—rise of the moon.

टी०—सम्बन्धिन. बान्धवा. कयापि युक्त्या केनाप्यविदितेन प्रकारेण आपातमात्रेण सद्य एव चेत· मनः सन्नमयन्ति स्ववशं नयन्ति । अत्र दृष्टान्तमाह—दोषगुणानभिज्ञः दोषाश्च गुणाश्च दोषगुणास्तेषाम् अनभिज्ञोऽज्ञातगुणदोष इत्यर्थः ।

निर्वर्णयामि तावत्किमाकारावेताविति । कथं द्रष्टुमपि न प्रभवामि । यथा यथा कुमारावेतौ निर्वर्णयामि तथा तथा हृदयमप्यननुभूतपूर्वेण साध्वसप्रहर्षशोकानुक्रोशसम्भेदचित्रेणावस्थाविशेषेणाक्रम्यमाणं मूर्च्छयेव तिरोधीयते । (मूर्च्छामभिनीय) बाष्पपातश्च कथम् ! प्रशान्त इव मे हृदयस्तम्भो बाष्पपातेन, स्वस्थीभूतोऽस्मि संवृत्तः । एतद्व्यपनीतबाष्पव्यवधानेन चक्षुषा पुनरवलोकयामि । (निर्वर्ण्य) गम्भीरोदारः सन्निवेशः, प्रशान्तमनोहरा वेषरचना, विनयोदयोदात्तमभिक्रान्तम्, सुव्यक्तमनेन युगलेन कुलीनेन भवितव्यम् ।

चन्द्रकान्तश्चन्द्रमणिः चन्द्रोदये चन्द्रस्य शशिनः उदये अभ्युदये विमृश्य विचार्य किं श्च्योतति द्रवति । अत्राजानतोपि बन्धुभावं रामस्य कुशलवयोस्सान्निध्यमात्रेण हृदयस्य द्रवीभावश्चन्द्रोदये चन्द्रकान्तस्य स्वाभाविकेन द्रवीभावेन समर्थितः । कयापि युक्त्येत्यनेन वाक्येन द्रवीभावे कारणविशेषो नाभिहित । एतदनुरूप एवार्थो यथोत्तररामचरिते—

> व्यतिषजति पदार्थानान्तरः कोपि हेतु-
> र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
> विकसति हि पतङ्गस्योदये पुण्डरीकं
> द्रवति हि हिमरश्मावुद्गते चन्द्रकान्तः ॥

टी०—निर्वर्णयामि निरूपयामि । किमाकारौ किमनुरूपौ । एतौ कुशलवौ । न प्रभवामि न शक्नोमि । अननुभूतपूर्वेण पूर्वमनुभूतः अनुभूतपूर्वः न अनुभूतपूर्वः अननुभूतपूर्वस्तेन । साध्वसप्रहर्षशोकानुक्रोशसम्भेदचित्रेण साध्वसं भयं, प्रहर्षः हर्षातिशयः, शोकश्चिन्ता, अनुक्रोशः कारुण्यं तेषां सम्भेदो मिश्रणं तेन चित्रेण विविधरूपेण, अवस्थाविशेषेण अवस्था दशा तस्या विशेषस्तेन, आक्रम्यमाणं व्याकुलीक्रियमाणं मूर्च्छयेव मोहेनैव तिरोधीयते आच्छाद्यते मूर्च्छितं भवतीत्यर्थः । बाष्पपात अश्रुविमोचनं च कथम् । बाष्पपातेन नेत्रवारिधाराप्रपातेन मे मम हृदयस्तम्भः हृदयस्य चेतसः स्तम्भो जडता प्रशान्तः शममुपगत अश्रुविमोचनेन मे हृदयं निर्वृत्तम् इति भावः । व्यपनीतबाष्पव्यवधानेन व्यपनीतं दूरीकृतं बाष्पमश्रु तदेव व्यवधानमन्तरायो यस्य तेन चक्षुषा नेत्रयुगेनेत्युन्नेयम् अवलोकयामि पश्यामि । गम्भीरोदारः गम्भीरश्चासावुदारश्चेति स । सन्निवेशः अङ्गानां संस्थानविशेषः । वेषरचना वसनादिपरिधानं प्रशान्तमनोहरा प्रशान्ता चासौ मनोहरा चेति सा । विनयोदयोदात्तम् विनयस्य नम्रताया उदयेन उद्गमेन उदात्तं चारु । अभिक्रान्तं गतिविशेषः । सुव्यक्तं सुस्पष्टम् । कुलीनेन सत्कुलजेन ।

वि—एषोऽत्रभवान् राजा, उपसर्पतामार्यौ यथाभिप्रायम् ।
एसो अत्तभवं राआ, उपसप्पदु अंआ जहाहिप्पाअं ।

कु—वत्स लव ! अपि जानासि त्वं सम्प्रत्येव प्रणामसम्बन्धेन यथा मया कथितम् ?

ल—अथ सम्प्रति किम् ?

कु—यथा यथैनं पार्थिवं प्रत्यासीदामि तथा तथा हृदयोत्कम्पकारिणा साध्वसेन न प्रभवामि स्वाङ्गानाम्, परित्यक्तोऽस्मि कस्मात्तुल्यावलेपेन ? न शक्नोमि चास्य पुरस्तादनवनतमुत्तमाङ्गमुद्वोढुम्, किं बहुना एष प्रणतोऽस्मि ।

ल—कथमार्योऽप्यहमिव परमवशत्वमापादितः । (उभौ प्रणमत)

रा—न खलु भवद्भ्यां मर्यादालङ्घनमनुष्ठेयम् । कथं प्रणतावेव ? कष्टं ब्रह्मशिरसा नतोऽस्मि । (विषादं नाटयति)

वि—भो त्वं किं विषण्णः ? एताभ्यां प्रयुक्तः प्रणामो न प्रतिगृहीतः,
भो तुवं कि विसण्णो ? एदेहिं पउत्तो पणामो ण पडिगहीदो,
अत्र न त्वं परिहीयसे ।
एत्थ ण तुमं परिहीयसि ।

रा—सम्यगुपलक्षितं कौशिकेन । आर्यावतिदाक्षिण्यपेशलौ, श्रूयताम्—

टी०—उपसर्पताम् समीपं गच्छताम् । आर्यौ भवन्तौ यथाभिप्रायं स्वच्छन्दम् । प्रणामसम्बन्धेन रामविषयकं प्रणाममुद्दिश्य । यन्मया कथितम् 'अप्रणन्तार किलास्मद्वंश्या' इत्यादिकम् । अथ सम्प्रति किम् , को विवेकोऽधुना । यथा यथा येन येन प्रकारेण एनं पार्थिवं राजानं राम प्रत्यासीदामि समुपसर्पामि तथा तथा तया तया रीत्या हृदयोत्कम्पकारिणा हृदयस्य चेतस उत्कम्पं वेपथुं करोति जनयतीति तेन साध्वसेन भयेन, स्वाङ्गाना स्वशरीरस्य न प्रभवामि अवशोस्मि संवृत्तः । परित्यक्तोऽस्मि तुल्यावलेपेन तुल्यः समानोऽवलेपो गर्वस्तेन रामसदृशेनाहङ्कारेणेत्यर्थः। रामस्य राजत्वनिमित्तो गर्व, कुशस्य विद्याहेतुकोऽवलेप इत्युभयोर्गर्वसादृश्यम् । कस्मादिति कुशस्य विस्मयः । अनवनतम् न अवनतम् अनम्रम् उत्तमाङ्गं शिर उद्वोढुं धारयितुं न शक्नोमि न पारयामि । रामतेजस सर्वातिशायित्वादलौकिकत्वाच्चानवनतेन शिरसा कुशलवयोस्तत्रावस्थानमशक्यमिति । कथमिति । कथम् आर्योपि भवानपि अहमिव परम् अत्यन्तम् अवशत्वं स्वाङ्गानामप्रभुत्वम् आपादितः कारितः नीत इति यावत् , कुशलवाभ्यामिति शेष. । न खल्विति । मर्यादालङ्घनं मर्यादाया 'न तपोधनेन क्षत्रियः प्रणन्तव्य' इत्येवंरूपाया लङ्घनं परित्यागः नानुष्ठेयं न कर्त्तव्यम् । कथं प्रणतौ एवेति वाक्येन रामस्य विस्मय-

अयं भवद्भ्यामतिसम्भ्रमेण
मयि प्रयुक्तः शिरसा प्रणामः ।
भवत्विदानीं मदनुज्ञयैव
युष्मद्गुरूणां चरणोपहारः ॥ ११ ॥

विं—अप्रतिहतशासनः प्रियवयस्यः—एष प्रणामस्य परिणामः–इति ।
अप्पडिहदसासणो पिअवअस्सो । एस पणामस्स परिणामोत्ति ।

कुशलवौ—(उत्थाय) अपि कुशलं महाराजस्य ?

रा—युष्मद्दर्शनात्कुशलमिव । भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम्, न पुनरतिथिभाजनस्य समुचितस्य कण्ठग्रहस्य ? (परिष्वज्य) अहो हृदयग्राही स्पर्शः । (विचिन्त्य) अनभिज्ञोऽहं तनयपरिष्वङ्गसौख्यस्य, यद्यपि तां तुलामारोहे । स्थाने खलु परिक्रामन्ति तपोवनपराङ्मुखा गृहमेधिनः ।

विषादयोर्युगपदुत्पत्तिः सूचिता । विषण्णो विषादं गतः । एताभ्यां कुशलवाभ्यां प्रयुक्तः कृतः प्रणामो नतिः न प्रतिगृहीतः न स्वीकृतः । अत्र प्रणामग्रहणविषये त्वं न परिहीयसे न कापि तव क्षतिरिति तत्त्वम् ।

अ०—अयम् अतिसम्भ्रमेण भवद्भ्यां मयि शिरसा प्रयुक्तः प्रणामः मदनुज्ञया एव इदानीं युष्मद्गुरूणां चरणोपहारः भवतु ॥ ११ ॥

अतिसम्भ्रम—mistake or hurry. **प्रणाम**—salutation. **अनुज्ञा**—permission. **उपहार**—present

टी०—अयम् अतिसम्भ्रमेण अतिशैघ्र्येण कर्त्तव्याकर्त्तव्यविचारमकृत्वैव भवद्भ्यां युवाभ्यां मयि रामभद्रे शिरसा उत्तमाङ्गेन प्रणामो नतिः प्रयुक्तः कृतः । इदानीं साम्प्रतं विहिते प्रणामे मदनुज्ञयैव मम अनुज्ञा अनुमतिस्तयैव ममादेशेनैव युष्मद्गुरूणां युवयोराचार्य्याणां चरणोपहारः चरणयोः पादयोः उपहारः उपायनं भवतु । क्षत्रिया वयं न ब्राह्मणानां नमस्कारार्हास्तस्मादतिसम्भ्रमेण युवाभ्यां कृतमेतदभिवादनं युष्मद्गुरुचरणयोरेव स्यादिति रामस्याशयः ॥ ११ ॥

टी०—अप्रतिहतशासनः—न प्रतिहतं न स्खलितं शासनमाज्ञा यस्य सः । परिणामः अवसानम् । उपहासगर्भमिदं विदूषकवचः । युष्मद्दर्शनाद् भवदवलोकनात् कुशलं मङ्गलम् । तपोधनानां दर्शनादेव कुशलप्राप्तिर्जायते; अन्यथा तु पत्नीविरहखिन्नचेतसो रामस्य कुशलं कुतः । कुशलवयोः रामस्य सीतावियोगजन्यशोकार्त्तिज्ञानाभावाद्दाक्षिण्येनैव कुशलप्रश्न इति तात्पर्यम् । भाजनं पात्रम् । किं वयम् अतिथिभाजनस्य अतिथिगोचरस्य समुचितस्य योग्यस्य कण्ठग्रहस्य आश्लेषस्य भाजनं न नार्हाः । अर्हा एव भवतोरालिङ्गनस्येति काकुः । अनभिज्ञः न अभिज्ञः । तनयपरिष्वङ्गसौख्यस्य तनयस्य पुत्रस्य यः परिष्वङ्ग उपगूहनं तेन यत्

(आसनार्धमुपवेशयति)

उभौ—राजासनं खल्वेतत् न युक्तमध्यासितुम्।

रा—सव्यवधानं न चारित्रलोपाय, तस्मादङ्कव्यवहितमध्यास्यतां सिंहासनम्। (अङ्कमुपवेशयति)

उभौ—(अनिच्छां नाटयतः) राजन्, अलमतिदाक्षिण्येन।

रा—अलमतिशालीनतया।

भवति शिशुजनो वयोऽनुरोधा-
द्गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावा-
त्पशुपतिमस्तककेतकच्छदत्वम् ॥ १२ ॥

सौख्यं तस्य तुला समता पुत्रस्पर्शसमसौख्यमित्यर्थः आरोहे अनुभवामि। अत्र कुशलवयोरालिङ्गनसुखमननुभूतपूर्वेण तनयपरिष्वङ्गसुखेन सहोपमितम्। स्थाने युक्तमेव तपोवनपराङ्मुखाः तपोवनात् पराङ्मुखा विमुखाः गृहमेधिनः गृहस्था परिक्रामन्ति परिभ्रमन्ति। गृहमेधिनां तपोवनपराङ्मुखत्वमपत्यस्नेहसंश्रयादेवेति भावः। राजासनं सिंहासनम्। अध्यासितुम् उपवेष्टुम्। सव्यवधानं व्यवधानेन सहितं, व्यवहितम्। चारित्रलोपाय चरित्रविनाशाय न भवति। यदि हि राजासनं वस्त्वन्तरेण व्यवहितम् अधिरुह्येत, तदा दोषाय न भवति। तस्मादतः अङ्कव्यवहितम् अङ्केन क्रोडेन व्यवहितं सिंहासनम् अध्यास्यताम् उपविश्यताम्। अतिदाक्षिण्येन अत्यन्तम् उदारतया। अतिशालीनतया, शालीनता अधृष्टता सङ्कोच इति यावत् तया।

अ०—शिशुजनः वयोऽनुरोधात् गुणमहताम् अपि लालनीयः एव भवति। हिमकरः अपि बालभावात् पशुपतिमस्तककेतकच्छदत्वं व्रजति ॥ १२ ॥

स०—शिशुजनः—शिशुरेव जनः। वयोऽनुरोधात्—वयसः अनुरोधस्तस्मात्। गुणमहताम्—गुणैः महान्तः तेषाम्। हिमकरः—हिमाः कराः यस्य सः। पशुपतिमस्तककेतकच्छदत्वम्—पशुपतेर्यन्मस्तकं तत्र यः केतकच्छदस्तस्य भावस्तत्त्वम्।

शिशुजन—children. **वयस्**—age. **अनुरोध**—regard. **लालनीय**—one deserving to be fondled. **हिमकर**—cool-rayed one *i.e.*, the moon. **बालभाव**—infancy **पशुपति**—lit. lord of creatures *i.e.*, Siva. **मस्तक**—forehead. **छद**—leaf.

टी०—शिशुजनः बालवर्गः वयोऽनुरोधात् वयस आयुषः अनुरोधात् कारणात् गुणमहता गुणैर्दाक्षिण्यादिभिर्महता समृद्धानामपि जनानां लालनीय एव भवति। अत्र दृष्टान्तमाह—हिमकरः हिमाः शिशिराः करा रश्मयो यस्य स इन्दुः बालभावात्, बाल्यात् पशुपतिमस्तककेतकच्छदत्वम् पशुपतिः शिवस्तस्य यन्मस्तकं तत्र केतकच्छदत्वं केतकीपत्रसमता व्रजति। इन्दुर्हि बालोऽपि शिवेन शिरसि

(साश्रुरवलोकयन् पुनः परिष्वजते । विदूषकमवलोक्य)

अपि स्मरति भवान् निर्वासितायाः सीतायाः कियन्तः संवत्सरा अतिक्रान्ता इति ?

वि—(विचिन्त्य) **स्मरामि मन्दभाग्यः** (हस्ताङ्गुलिप्रमाणसङ्ख्या
*सुमरामि मंदभाओ

विगणय्योपरिष्ठात्पदाङ्गुलित्रयमपि निर्दिश्य) **किं बहुना गणितेन,**
किं बहुणा गणिदेण,

सर्वथाद्य दशमः संवत्सरो देव्याः सीतायाः स्वहस्तेन परि-
सव्वहा अज्ज दसमो संवच्छरो देवीए सीदाए सहत्थेण परि-

प्रेषितायाः
प्पेसिदाए ।

रा—(कुमारौ निर्वर्ण्य) **यदि स्वस्तिना गर्भमपि निर्वर्तयेत्, यदि कश्चिद-वगाहेत तदपत्यमियता कालेनेदृशीमवस्थाम् ।**

वि—**हन्त ! स्तम्भितोऽस्मि मन्दभाग्य एतया अज्ञातविप्रयुक्तनय-**
हन्त ! तंभिदो म्हि मन्दभाओ एदाए अण्णादविप्पउत्ततणअ-

सङ्कथया ।
संकहाए । (रोदिति)

धार्यते, नात्र कश्चन चन्द्रमौलेरपराध, प्रत्युत गुण एव, इत्थं भवतोर्मदङ्कावस्थानं न दोषावहम् ॥ १२ ॥

निर्वासितायाः गृहान्निष्कासितायाः । संवत्सरा अब्दाः । अतिक्रान्ता व्यतीता.। सर्वथेति । निर्वासितायास्सीताया दशमः संवत्सरः । उत्तररामचरिते तु विवासिताया जानक्या रामकर्तृककुशलवदर्शनात्प्रागेव द्वादशवत्सरपरिसमाप्तिः । तत्रेयं वासन्तीरामसंवादे रामस्योक्तिः । रामः—सखि किमुच्यते धैर्यमिति

देव्या शून्यस्य जगतो द्वादश· परिवत्सरः ।
प्रनष्टमिव नामापि न च रामो न जीवति ॥

यदि स्वस्तिना सुखेन निर्विघ्नमिति यावत् गर्भमपि निर्वर्त्तयेत् सम्पादयेत्, यदि कश्चिद् अवगाहेत लभेत, तदपत्यं सीतायाः सन्तति· इयता कालेन एतावता समयेन ईदृशीम् अवस्थाम् आयुषम् अवगाहेत प्राप्नुयात् । अत्रावगाहेत तदपत्यमित्यस्य पूर्वापराभ्या सम्बन्ध उक्तप्रकारेण.—'यदि कश्चित् तदपत्यम् अवगाहेत, तदपत्यम् इयता कालेन ईदृशीम् अवस्थाम् अवगाहेत' इति । स्तम्भित· जडीभूतः । अज्ञातविप्रयुक्ततनयसङ्कथया अज्ञातः न ज्ञात एव विप्रयुक्तो वियोगं प्राप्तो यस्तनयस्तस्य सङ्कथा वार्त्ता तया । अहमिति । तापसकुमारौ तपोधनौ अवलोकयन् पश्यन् असह्यवेदनाम् असह्या सोढुमशक्या वेदना व्यथा यस्या ताम् अवस्थां दशाम् अवतीर्णोऽस्मि प्राप्तोऽस्मि ।

रा—अहमप्येतौ तापसकुमाराववलोकयन्नसह्यवेदनामवस्थामवतीर्णोऽस्मि।

यां यामवस्थामवगाहमान-
मुत्प्रेक्षते स्वं तनयं प्रवासी।
विलोक्य तां ताञ्च गतं कुमारं
जातानुकम्पो द्रवतामुपैति ॥१३॥

(परिष्वज्य रोदिति)

वि—(ससम्भ्रमम्) अविधा मुञ्च, सर्पः, मुञ्च, जीवतु तपस्वितनयः,
अविह मुंच, सप्पं, मुंच, जीवदु तवस्सितणओ,

अवतरतु सिंहासनतः।
ओदरदु सिंहासणादो।

रा—(ससम्भ्रमं कुमारौ मुञ्चन्) वयस्य, किमेतत्?

वि—श्रुतं मया साकेतनिवासिनां चिरजीवितानां मुखतः—यः
सुदं मए साकेदणिवासिणं चिरजीविआणं मुहादो—जो

किलाराघव इमं सिंहासनमधिरोहति तस्य मूर्धा शतधा शतधा
किल अराहवो इमं सिंहासणं अदिरोहदि तस्स मुद्धा सदहा सदहा

विद्लेदिति।
विदलदित्ति।

अ०—प्रवासी स्वं तनयं यां याम् अवस्थाम् अवगाहमानम् उत्प्रेक्षते तां तां च गतं कुमारं विलोक्य जातानुकम्पः द्रवताम् उपैति ॥ १३ ॥

स०—जातानुकम्पः—जाता अनुकम्पा यस्य स.।

प्रवासिन्—a sojourner. or one in exile. तनय-son. अवस्था—age. अवगाहमान experiencing (lit. plunging). उत्प्रेक्षते—imagines. विलोक्य—seeing. अनुकम्पा—compassion, here feeling. द्रवता—melting.

टी०—प्रवासी देशान्तरं गतः पुरुषः स्वं तनयं पुत्रं गृहावस्थितं या याम् अवस्था दशाम् अवगाहमानं सेवमानम् उत्प्रेक्षते भावयते ता ताम् अवस्था शैशवरूपां दशा गतम् अन्यं कुमारं बालकं विलोक्य निरीक्ष्य जातानुकम्पः जाता उत्पन्ना अनुकम्पा दया स्नेहो वा यस्य स द्रवता द्रवीभावम् उपैति प्राप्नोति।

परदेशस्थो यथा कश्चित् स्वगृहावस्थितस्य पुत्रस्यायुषा तुल्यमन्यं शिशुं पश्यति जातानुकम्पश्च द्रवतामुपैति तथैव रामस्य कुशलवौ समीक्ष्यादृष्टयोरपि तनययोः स्मृतिरभ्युपेता हृदयञ्च द्रवीभूतम् ॥ १३ ॥

टी०—श्रुतम् आकर्णितम्। साकेतनिवासिनाम् अयोध्यानिवासिनां चिरजीविताना नगरवृद्धानां मुखतः। अराघव. रघुवंशेऽसंजातोय इमं सिंहासनम् अधि-

रा—(सावेगम्) अवतीर्यतां शीघ्रम् ।

(उभाववतीर्य भूमावुपविशतः)

रा—अपि स्वस्थौ भवन्तौ, मूर्ध्नो वा न किञ्चिद्विकारः ?

उभौ—भोः ! स्वस्थावेवावाम्, न किञ्चिन्मूर्ध्नो विकारः ।

वि—अहो आश्चर्यमाश्चर्यम् ! एवं नामापरिक्षतप्रकृतिस्थशरीरौ तिष्ठतः ।

अहो अचरिअं ! अचरिअं ! एवं णाम अवरिक्खदपइदित्थसरीरा चिट्ठंति ।

रा—किमत्राश्चर्यम् (कुमारौ निर्दिश्य) स्वस्त्ययनपरिगृहीतानि तपश्शरीराणि । पश्य—

अपि नाम शरा मोघास्तपस्सन्नद्धमूर्तिषु ।
वासवस्यापि सुव्यक्तं कुण्ठाः कुलिशकोटयः ॥ १४ ॥

रोहति तस्य मूर्द्धा शिर शतधा खण्डश इत्यर्थ विदलेत् भिद्येत । स्वस्थौ प्रकृतिस्थौ । मूर्ध्नो विकार शिरसः क्षतादिकम् । अपरिक्षतप्रकृतिस्थशरीरौ अपरिक्षतं न परिक्षतं प्रकृतिस्थम् असंवृत्तविकारं शरीरं ययोस्तौ । स्वस्त्ययनपरिगृहीतानि स्वस्त्ययनेन स्वस्तिवाचनेन ' स्वस्ति नः इन्द्रो वृद्धश्रवाः ' इत्यादिना शुभाशीर्वादाशंसिना मन्त्रकलापेन परिगृहीतानि परिरक्षितानि तपश्शरीराणि तपस्विना शरीराणि, अत एतयोर्मन्त्रपरिरक्षितत्वान्न काचिच्छरीरस्य हानिरुपजायत इति रामस्याभिप्राय. ।

शकुन्तलायामप्येतदनुरूप एव सन्दर्भ उपनिवेशितः कविना कालिदासेन । तथाहि सप्तमाङ्के सर्वदमनरक्षाकरण्डकग्रहणेनाप्यप्रतिहतशरीरस्य दुष्यन्तस्य तापस्योर्विस्मयजनकत्वम् । तत्रायं सन्दर्भः—"प्रथमा—शृणोतु महाराज. । एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एता किल मातापितरावात्मानं च वर्जयित्वा परो भूमिपतिता न गृह्णाति । राजा—अथ गृह्णाति । प्रथमा—ततस्तं सर्पो भूत्वा दशति' । अनुमितश्चैतेन दुष्यन्तस्य सर्वदमनपितृत्वम्, अत्रापि सिंहासनारोहणादपरिक्षतप्रकृतिस्थशरीरयो· कुशलवयो राघवत्वमवगम्यते ।

अ०—तपःसन्नद्धमूर्त्तिषु शराः अपि नाम मोघाः, वासवस्य अपि कुलिशकोटयः कुण्ठाः (इति) सुव्यक्तम् ॥ १४ ॥

स०—तपःसन्नद्धमूर्तिषु—तपसा सन्नद्धा मूर्तिः येषा तेषु । कुलिशकोटयः—कुलिशस्य कोटयः ।

सन्नद्ध—mailed. **तपस्**—penance. **मूर्ति**—body. **मोघ**—ineffective. **वासव**—Indra. **कुलिश**—thunderbolt. **कोटि**—edge. **कुण्ठ**—blunt..

टी०—तपःसन्नद्धमूर्त्तिषु तपसा व्रतेन सन्नद्धा वर्मिता मूर्तिश्शरीरं येषां तेषु

(कुमारावुद्दिश्य)

किं भवद्भ्यामव्यवहिता भूमिरध्यास्यते ?

उभौ—महाराज! प्रथमपरिणीतोऽयमर्थः ।

रा—तथा नाम ।

वि—भो राजन्, अतिथी खल्वेतौ, तत्करोतु सङ्कथाभिरातिथेयम् ।
भो राअ, अदिही खु एदे, ता करिदु संकहाहि आहिहेअं ।

रा—एष भवतोः सौन्दर्यावलोकनजनितेन कौतूहलेन प्रतार्यमाणः पृच्छामि,—कतमो वर्ण आश्रमो वा भवतोर्जन्मदीक्षाभ्यामलङ्क्रियते ?

कु—(सञ्ज्ञया लवमादिशति)

ल—द्वितीयो वर्णः प्रथम आश्रमः ।

रा—नैतावग्रजन्मानौ, तदल्पापराधः प्रणामप्रयोगो न्यूनासनपरिग्रहश्च । अथ क्षत्रियकुलपितामहयोः सूर्याचन्द्रमसोः को वा भवतोर्वंशस्य कर्त्ता ?

ल—भगवान् सहस्रदीधितिः ।

रा—कथमस्मत्समानाभिजनौ संवृत्तौ ।

शरा बाणाः अपि मोघा निष्फला व्यर्था इति यावत् । तपस्विनां शरीरं हि तपसा वर्मितं शरैर्न विध्यते । वासवस्य इन्द्रस्य कुलिशस्य वज्रस्य कोटयः धारा अपि कुण्ठाः प्रतिहताः भवन्तीति सुव्यक्तं सुस्पष्टम् । नामेति निश्चये ॥ १४ ॥

टी०—अव्यवहिता व्यवधानशून्या । भूमिः निवासस्थानम् । अध्यास्यते सेव्यते । किं युवयोरेकत्रैव वासस्थानमुत पृथक् पृथगिति रामस्य प्रश्नः । प्रथमपरिणीतः प्रथमं पूर्वं परिणीतः प्राप्तः, परिणत इति केचित्, अयमर्थ एकत्र निवासरूपोऽर्थः । अतिथी आगन्तुकौ । सङ्कथाभिः सप्रणयैरालापैः । सौन्दर्यावलोकनजनितेन सुन्दरस्य भावः सौन्दर्यं तस्य यदवलोकनं दर्शनं तज्जनितेन तदुत्पन्नेन कौतूहलेनाश्चर्येण प्रतार्यमाणः वञ्चितः वशीकृत इति यावत् । वर्णः ब्राह्मणादिः । आश्रमो ब्रह्मचर्यादिः । जन्मदीक्षाभ्यां जन्म च दीक्षा च जन्मदीक्षे ताभ्याम् । द्वितीयो वर्णः क्षत्रियः । प्रथम आश्रमो ब्रह्मचर्यम् । आवां क्षत्रियौ ब्रह्मचारिणौ च स्व इत्यर्थः । अग्रजन्मानौ ब्राह्मणौ अग्रे आदौ अग्रान्मुखाद्वा जन्म यस्य स अग्रजन्मा तौ । ब्राह्मणस्य मुखाज्जन्मनि श्रुतिरेव प्रमाणम्—ब्राह्मणोऽस्य मुखमासीदित्युक्तेः । अल्पापराधः अल्पोऽपराधो दोषो यस्मिन् सः । प्रणामप्रयोगः वन्दनव्यवहारः । न्यूनासनपरिग्रहश्च न्यूनमधोवर्ति यदासनं तस्य परिग्रहः स्वीकारः । क्षत्रियकुलपितामहयोः क्षत्रियकुलस्य क्षत्रियवंशस्य पितामहयोः पूर्वपुरुषयोः । सूर्याचन्द्रमसोः सूर्यश्च चन्द्रमाश्च तयोः । वंशस्य कुलस्य कर्त्ता प्रवर्त्तकः ।

वि—किं द्वयोरप्येकमेव प्रतिवचनम् ?
किं दोरणं वि एक्कं एव पडिवअणं ?

रा—कच्चिदस्ति युवयोर्मिथो यौनः सम्बन्धः ?

ल—भ्रातरावावां सोदर्यौ।

रा—संवादी सन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

ल—आवां यमलौ।

रा—सम्प्रति युज्यते, को भवतोर्ज्यायान्, किं नामधेयम् ?

ल—(अञ्जलिना निर्दिश्य) आर्यस्य पादपूजनायां लव इत्यात्मानं श्रावयामि, आर्योऽपि गुरुचरणवन्दनायां—(अप्रतिपत्तिं नाटयति)

कु—अहमपि कुश इत्यात्मानं श्रावयामि।

रा—अहो उदात्तरम्यः समुदाचारः।

वि—ज्ञातं नामधेयम्, को ज्येष्ठ इति न दत्तं प्रतिवचनम्।
जाणिदं णामहेअं, को जेट्ठोत्ति ण दिरणं पडिवअणं।

रा—नन्वञ्जलिनिर्देशादनामग्रहणाच्च दत्तमेव प्रतिवचनं कुशो ज्यायानिति।

वि—साधु ज्ञातं साम्प्रतम्।
साहु जाणिदं संपदं।

रा—किन्नामधेयो भवतोर्गुरुः ?

ल—ननु भगवान् वाल्मीकिः।

रा—केन सम्बन्धेन ?

ल—उपनयनोपदेशेन।

रा—अहमत्रभवतोः शरीरस्य धातारं पितरं वेदितुमिच्छामि।

ल—नहि जानाम्यस्य नामधेयम्। न कश्चिदस्मिंस्तपोवने तस्य नाम व्यवहरति।

सहस्रदीधिति सहस्रं दीधितीना यस्य स सूर्य । अस्मत्समानाभिजनौ अस्माकं समानस्तुल्योऽभिजनो वंशो ययोस्तौ। प्रतिवचनमुत्तरम्। मिथः अन्योन्यम्। यौनः योनेरागतः मातृसम्बन्धादुत्पन्नः। सोदर्यौ समाने उदरे शयितौ। सन्निवेशः अङ्गानां समवस्थिति.। संवादी सम·। वयस आयुष. अन्तर भेद.। यमलौ यमजौ सहोत्पन्नौ भ्रातरौ। ज्यायान् ज्येष्ठ। आर्यस्य कुशस्य पादपूजनाया चरणशुश्रूषायाम्। गुरुचरणवन्दनायां गुरोर्वाल्मीकेश्चरणयोः पादयोर्या वन्दना प्रणतिस्तस्या निरतमिति शेष.। अप्रतिपत्तिम् अस्वीकृतिम्। ज्येष्ठस्य भ्रातुर्नामग्रहणे दोषादनादरं दर्शयति। समुदाचार· सद्व्यवहारः। उदात्तरम्य· उदात्तश्चासौ रम्यश्चेति सः अत्यन्तं प्रशस्त। अयं ज्येष्ठस्य भ्रातुर्नामाग्रहणरूपो लवस्य व्यवहारोऽत्यन्तमादरणीय इति भाव.। अञ्जलिनिर्देशात अञ्जलिना निर्देशात् ज्ञापनात् अनामग्रहणाच्च ज्यायसः

रा—अहो माहात्म्यम् ।

कु—जानाम्यस्य नामधेयम् ।

रा—कथ्यताम् ।

कु—निरनुक्रोशो नाम ।

रा—(विदूषकमवलोक्य) अपूर्वं खलु नामधेयम् ।

वि—(विचिन्त्य) एवं तावत् पृच्छामि । निरनुक्रोश इति क एवं
एव्वं दाव पुच्छिस्सं । णिरणुक्कोसोत्ति को एव्वं

भणति ?
भणादि ?

कु—अम्बा ।

वि—किं कुपितैवं भणत्युत प्रकृतिस्था ?
किं कुविदा एव्वं भणादि आदु पइदित्था ?

कु—यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदैवमधिक्षिपति—निरनुक्रोशस्य पुत्रौ मा चापलम्—इति ।

वि—एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम्, एतयोर्जननी
एदाणं जदि पिदुणो णिरणुक्कोसोत्ति णामहेअं, एदाणं जणणी

तेनावमानिता निर्वासिता, तस्याप्रभवन्त्येतेन वचनेन दारकं
तेण अवमाणिदा णिव्वासिदा, तस्स अप्पवहंती एदिणा वअणेण दारएं

निर्भर्त्सयति ।
णिब्भच्छदि ।

रा—सम्यगुपलक्षितं कौशिकेन । (निश्वस्य) धिङ् मामेवंभूतम् । सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति ! (सबाष्पमवलोकयति) अपि सन्निहितस्तत्र भवान् निरनुक्रोशो युष्मदाश्रमे ?

सहोदरस्य नामानुच्चारणात् । किन्नामधेय किं नामधेयं यस्य स, किमभिधानः । उपन्यनोपदेशेन उपनयनं यज्ञोपवीतधारणं तत्पूर्वक उपदेशः शिक्षा तेन । शरीरस्य धातारं जनयितारमित्यर्थः । निरनुक्रोश निर्घृण. । कुपिता कोपवशङ्गता । प्रकृतिस्था कोपरहिता । बालभावजनितम् शिशुजनस्वभावहेतुकम् । अविनयं दुःशीलताम् । अधिक्षिपति तिरस्करोति । चापलं चपलस्य भावस्तत् । एतयोः दारकयोः । जननी माता । तेन एतयोर्जनयित्रा । अवमानिता अधिक्षिप्ता । निर्वासिता निष्कासिता । तस्य स्वभर्तुः । अप्रभवन्ती अशक्ता सती एतेन वचनेन 'निरनुक्रोशस्य पुत्रौ' इत्यात्मकेन वाक्येन दारकं पुत्रं निर्भर्त्सयति अधिक्षिपति । सम्यगुपलक्षितं सुष्ठु ज्ञातम् । तपस्विनी दयनीया मत्कृतेनापराधेन विवासनरूपेण निर्घृणेन कर्मणा

ल—न सन्निहित ।
रा—(ससम्भ्रमम्) अपि श्रूयते ?
ल—(कुशमवलोकयति)
कु—न तस्य पादावस्माकं नमस्कृतपूर्वौ । अम्बायाः पुनरेकवेणीसंसूचितानि तस्योच्छ्वसितानि ।
रा—किं वा भवन्तौ तेनाघ्रातपूर्वौ ?
कु—तदपि नास्त्येव ।
रा—अतिदीर्घप्रवासोऽयं दारुणश्च, यदियता कालेन नाम परस्परलोचनगोचरमपि नावतीर्णा यूयम् । (विदूषकमवलोक्य जनान्तिकम् कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि । न युक्तं च मम स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने । तत्कोऽत्राभ्युपायः ?
वि—(जनान्तिकम्) अप्रतिहतवचनमहत्त्वा हि ब्राह्मणजातिः, अहं पुनः
अप्पडिहदवअणमहत्तणा हि बह्मणजादी, अहं उण
पृच्छामि (प्रकाशम्) भो किन्नामधेया युवयोर्जननी ?
पुच्छिस्सं भो किण्णामहेआ तुह्माणं जणणी ?
ल—तस्या द्वे नामनी ।
वि—कथमिव ?
कहं विअ ?

स्वापत्यं स्वसन्ततिम् एवम् इत्थम् मन्युगर्भैं मन्यु. कोपो गर्भे येषा तै अक्षरैर्वर्णैर्निर्भर्त्सयति तिरस्करोति । नमस्कृतपूर्वौ पूर्वं नमस्कृतौ प्रणतौ । अम्बाया मातु. । एकवेणीसंसूचितानि एकया वेण्या प्रोषितभर्तृकाया. केशबन्धो वेणी तया संसूचितानि ज्ञापितानि तस्य निरनुक्रोशस्य कृते उच्छ्वसितानि दीर्घा उच्छ्वासाः । आघ्रातपूर्वौ पूर्वम् आघ्रातौ चुम्बितौ । अतिदीर्घप्रवास. अतिदीर्घश्चासौ प्रवास इति सः । दारुण· कठोरः । परस्परलोचनगोचरम् अन्योन्यनयनविषयम् । जनान्तिकम् तल्लक्षणं यथा दर्पणे—

त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ॥

कुतूहलेनाविष्ट. कौतुकेनान्वितः अनयो. कुशलवयोः मातरं जननीं नामतो वेदितुं ज्ञातुम् इच्छामि अभिलषामि । स्त्रीगतं स्त्रीसम्बद्धम् अनुयोक्तुं प्रष्टुं न युक्तम् असाम्प्रतम् । विशेषतस्तपोवने नैमिषारण्ये तु विशेषत एव स्त्रीगता वार्ता न युज्यते । अप्रतिहतेति । अप्रतिहतवचनमहत्त्वा न प्रतिहतं कुण्ठितं यद्वचनं वाक्यं तेन महत्त्वं महिमा यस्या. सा तथाभूता, ब्राह्मणानां वचस्सर्वदैवाप्रतिहतत्वात्स्वतन्त्र

ल—तपोवनवासिनो देवीति नामाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति ।

रा—कतमं क्षत्रियकुलं वाल्मीकिमुनिमुखनिर्गतेन वधूशब्देन वर्धते ?

वि—विस्तीर्णं क्षत्रियकुलमिति न ज्ञायते कतमं क्षत्रियकुलमिति ।
वित्थिएणं खत्तिअकुलं ति ण जाणीअदि कदमं खत्तिअकुलं ति ।

रा—अपि चेतस्तावद्वयस्य मुहूर्तमात्रम् ।

वि—(उपसृत्य) आज्ञापयतु भवान् ।
आणवेदु भवं ।

रा—अपि कुमारयोरनयोरस्माकं च सर्वाकारसंवादी कुटुम्बवृत्तान्तः ?

वि—कथमिव ?
कहं विअ ?

रा—पश्य, एतयोः सीतागर्भस्य च तुल्यः कालातिपातः, एतावपि क्षत्रियौ सूर्यान्वयौ, अजातप्रोषितौ च निर्विकारौ राजासनारोहणे, पितरि चानयोर्दारुणत्वसूचनो निरनुक्रोशशब्दः, मातुश्च माहात्म्यविभावनो देवीशब्दः । सर्वथाहमनेन सादृश्यबाहुल्येन पर्याकुलोऽस्मि मन्दभाग्यः ।

(वैक्लव्यं नाटयति)

वि—किं तवेदृशोऽभिप्रायः, सीतागर्भगतावितौ दारकाविति ?
किं तव ईरिसो अहिप्पाओ सीदागब्भगदा एदे दारआ त्ति ?

सन्महत्त्वं बिभर्ति, अतो मत्कर्तृका पृच्छाऽव्याहृतेति भावः । किन्नामधेया युवयोर्जननीति विदूषकेन पृष्टे तस्या द्वे नामनीति लवस्य प्रतिवचः । तपोवनवासिनस्तपोधना देवीति संज्ञया तामाकारयन्ति, भगवान् वाल्मीकिस्तु वधूशब्देन तामाह्वयति । वाल्मीकिमुखनिर्गतेन वाल्मीकिमुनेर्मुखाद् वदनात् निर्गतेन निष्क्रान्तेन वधूशब्देन कतमं क्षत्रियकुलं वर्धत इति रामेण पृष्टो विदूषक आह—विस्तीर्णं क्षत्रियकुलं क्षात्रवंशस्यानन्त्याद्दुर्लक्ष्यमेतत् यत्कतमं क्षत्रियकुलं वधूशब्देनाभिनन्दति वाल्मीकिः । सर्वाकारसंवादी सर्वाकारेण सर्वरूपेण संवदितुं शीलमस्येति सः सर्वव्यवहारसम इत्यर्थः । एतयोः कुशलवयोः सीतागर्भस्य तुल्यः समः कालातिपातः समयातिक्रमणम् । निर्वासिताया गर्भिण्यास्सीताया एतयोश्च दशमो वर्षः । एतावपि बालकौ क्षत्रियौ क्षत्रियकुलोत्पन्नौ । सूर्यान्वयौ सूर्यवंशीयौ । अजातप्रोषितौ—न जातः अजातः तौ, अजातावेव प्रोषितौ इति तौ । राजासनारोहणे निर्विकारौ, अराघवस्य सिंहासनारोहणसमकालमेव मूर्ध्नः शतधा विदलनादेतयोश्च निर्विकारत्वात् रामस्य तयोः स्वपुत्राशङ्का । •अनयोः पितरि जनयितरि दारुणत्वसूचनः कठिनहृदयत्वसूचकः

रा—मा मैवम्। कथं हन्त! तपोवनवासिनि जने सम्बन्धमीदृश-
मध्यारोपयामि। किन्तु—

एतत्कुमारयुगलं वयसान्वयेन
श्यामोन्नतेन वपुषा विपदानया च।
तां मैथिली तनयसम्भविनीमवस्था-
मादाय मामतितरां तरलीकरोति ॥ १५ ॥

(चिन्ताशोकं नाटयति)

(नेपथ्ये)

भो भोः कोऽत्र सन्निहितस्तत्रभवतोरिक्ष्वाकुकुलकुमारयोः कुश-लवयोः?

उभौ—(आकर्ण्य) द्वावप्यावां सन्निहितौ।

निरनुक्रोशशब्दः मातृप्रयुक्त इति शेषः। माहात्म्यविभावनः माहात्म्यस्य गौरवस्य विभावनः द्योतकः देवीशब्दः। सर्वथा सर्वैरेभिर्हेतुभिः सादृश्यबाहुल्येन समतातिशयेन मन्दभाग्यः प्रियापुत्रविच्छेदाद् पर्याकुलो विह्वलः संवृत्तोस्मि।

अ०—एतत् कुमारयुगलं वयसा अन्वयेन, श्यामोन्नतेन वपुषा, अनया विपदा च ता मैथिलीं तनयसम्भविनीम् अवस्थाम् आदाय अतितरां मां तरलीकरोति ॥ १५ ॥

स०—कुमारयुगलम्—कुमारयो युगलम्। श्यामोन्नतेन—श्यामं च तदुन्नतमिति श्यामोन्नतं तेन। तनयसम्भविनीम्—तनयस्य सम्भवोऽस्यामस्तीति तनयसम्भविनी ताम्।

युगल—couple. **वयस्**—age. **अन्वय**—descent. **श्याम**—dark-brown. **उन्नत**—tall-statured. **विपद्**—misfortune. **तनय**—child. **अवस्था**—condition. **अतितराम्**—exceedingly. **तरलीकरोति**—makes restless.

टी०—एतत् कुमारयुगलं कुमारद्वयं कुशलवाख्यं वयसा आयुषा, अन्वयेन वंशेन सूर्यवंशेनेत्यर्थः, श्यामोन्नतेन श्यामं तप्तकाञ्चनवर्णाभम् उन्नतञ्च तेन वपुषा शरीरेण अनया विपदा मातृप्रवासवशाज्जनकादर्शनरूपयाऽऽपदा, ता मैथिलीं सीतां तनयसम्भविनी तनययोः पुत्रयोः सम्भव उत्पत्तिरस्यामस्तीति तनयसम्भविनी ताम् अवस्था दशाम् आदाय आनीय, गर्भिणीदशायां तां जानकीं मम स्मृतिपथं प्रापय्य माम् अतितराम् अत्यन्तं तरलीकरोति चपलयति मदीयं धैर्यं ग्लपयतीत्यर्थः। एतयोः कुमारयोर्दर्शनेनादृष्टपूर्वयोः सुतयोस्सीतायाश्च स्मारितोस्मीति तत्त्वम् ॥ १५ ॥

कोऽत्र सन्निहितः कः सन्निधौ स्थितः। तत्रभवतोः पूज्ययोः इक्ष्वाकुकुलकुमारयोः ऐक्ष्वाकवयोः। कुशलवौ तु स्वात्मानमामन्त्र्यमाणं मत्वा वदतः—

(पुनर्नेपथ्ये)

किमितीयतीं वेलां नियोगः प्रत्युदास्यत ?

वाल्मीकिना मुनिवरेण महारथस्य
याऽसौ पुराणपुरुषस्य कथा निबद्धा ।
सा राघवश्रुतिपथातिथितां च नेया
कालश्च मध्यसवनस्य न लङ्घनीयः ॥ १६ ॥

उभौ—राजन्, उपाध्यायदूतोऽस्मान् त्वरयति ।

रा—मयापि सम्भावनीय एव महार्थसंविधायी मुनिनियोगः ।

'द्वावप्यावा सन्निहितौ' इति, आवयोर्नैकतमोऽत्रोपस्थित , परं/ द्वावप्यावामत्र स्व. । किमिति । इयतीम् एतावतीं वेला समयं यावत् नियोगो रामायणकथागानरूपो वाल्मीकेरादेश· प्रत्युदास्यते उपेक्ष्यते ।

अ०—वाल्मीकिना मुनिवरेण महारथस्य पुराणपुरुषस्य या असौ कथा निबद्धा सा राघवश्रुतिपथातिथितां च नेया, मध्यसवनस्य काल. च न लङ्घनीयः ।

स०—महारथस्य—महान् रथो यस्य तस्य । पुराणपुरुषस्य—पुराणश्चासौ पुरुष पुराणपुरुषस्तस्य । राघवश्रुतिपथातिथिताम्—श्रुतिपथ· श्रुतेः पन्था., राघवस्य य. श्रुतिपथस्तस्यातिथिता ताम् ।

मुनिवर—the best among the sages. **महारथ**—the great warrior. **पुराणपुरुष**—the primeval Purusa. **निबद्ध**—composed. **श्रुतिपथ**—hearing. **अतिथिता**—lit. hospitality, here used only metaphorically. **मध्यसवन**—mid-day bath. **लङ्घनीय**—that which is to be transgressed.

टी०—वाल्मीकिना मुनिवरेण मुनिधौरेयेण महारथस्य महान् रथो यस्य तस्य वीरप्रवरस्य पुराणपुरुषस्य पुराणश्चासौ पुरुष. पुराणपुरुष आदिपूरुषो हरिस्तदवतारभूतो रामस्तस्य या असौ प्रसिद्धा रामायणाख्या कथा निबद्धा रचिता सा कथा राघवश्रुतिपथातिथिताम् राघवस्य रामस्य श्रुतिपथस्य कर्णविवरस्य अतिथिताम् अतिथिभावं विषयं नेया नेतव्या, दाशरथे· श्रावणीया इत्यर्थ । मध्यसवनस्य मध्याह्निकस्नानस्य काल समय न लङ्घनीयः नातिक्रमणीय ॥ १६ ॥

उपाध्यायदूत उपाध्यायस्य गुरोर्वाल्मीकेर्दूत आज्ञावहः अस्मान् आवामित्यर्थः त्वरयति त्वरितं गमनायाचष्टे । सम्भावनीय आदरणीयः । महार्थसंविधायी महाश्चासावर्थश्चेति महार्थस्तस्य संविधायी संविधानशील , महार्थस्य पुत्रप्राप्तिस्त्रीसमागमरूपस्य विधायक इति कवेरर्थ । मुनिनियोग मुनेर्वाल्मीकेर्नियोग आदेशः ।

अ०—भवन्तौ गायन्तौ, कविः अपि पुराण· व्रतनिधि., अयं गिरां सन्दर्भः वसुमतीं प्रथमम् अवतीर्णः, सरसिरुहनाभस्य इयं कथा च नियत श्लाघ्या, अयं·परिकरः श्रोतारं पुनाति रमयति च ॥ १७ ॥

तथा हि—

भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधि-
गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम् ।
कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं
पुनाति श्रोतारं रमयति च सोऽयं परिकरः ॥१७॥

वयस्य ! अपूर्वोऽयं मानवानां सरस्वत्यवतारः. तदहं सुहृज्जन-साधारणं श्रोतुमिच्छामि । सन्निधीयन्तां सभासदः, प्रेष्यतामस्म-दन्तिकं सौमित्रिः, अहमप्येतयोश्चिरासनपरिखेदं पादविहरणेनाप-हरामि ।

(इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः ।

स०—व्रतनिधिः—व्रताना निधिः । सरसिरुहनाभस्य—सरसि रोहतीति सरसिरुहं तन्नाभौ यस्य तस्य ।

पुराण—ancient. **व्रत**—penance. **निधि**—repositary. **सन्दर्भ**—composition. **वसुमती**—earth. **अवतीर्ण**—descended. **सरसिरुहनाभ**—lotus-navelled *i. e.* Viṣṇu. **श्लाघ्य**—praiseworthy. **परिकर**—combination. **पुनाति**—purifies. **रमयति**—delights.

टी०—भवन्तौ मधुरालापौ गायन्तौ गायकौ स्तः । कविः महाकविरपि पुराणः पुरातनः काव्यनिर्माणे दृढाभ्यास इत्यर्थः, व्रतनिधिः व्रताना स्वाध्याया-दीना निधिः निवासस्थानम्, अनेन कवेस्तपोधनत्वमुक्तम्, अयञ्च गिरा वाचा सन्दर्भो रचना रामायणात्मको रचनाविशेषः, रामस्य तु काव्यविषयज्ञानाभावात्सा-मान्येनोक्तिः, वसुमतीं पृथिवीं प्रथमम् अवतीर्णः नव एवागतः, पूर्वमेतद्विषयक-सन्दर्भाभावात् । सरसिरुहनाभस्य सरसि रोहतीति सरसिरुहं कमलं तन्नाभौ यस्य तस्य विष्णोरियं कथा नियतम् असंशयं श्लाघ्या प्रशंसनीया । सरसिरुहनाभ-स्येयं कथेत्युक्तेः विष्णुस्तुतिविषयत्वमस्य काव्यस्यावगतं रामेण, नतु स्वविषयत्वं, तत्र स्वात्मनो विष्ण्ववतारत्वेन क्वचिदप्यनिर्देशात् । सोऽयम् एवंरूपः परिकरो गुणविशेषाणा सम्भूयावस्थानरूपम् उपकरणं श्रोतारं शृण्वन्तं मानुषं पुनाति पवित्रयति रमयति आनन्दयति च ॥ १७ ॥

अपूर्वः अभिनवः सरस्वत्यवतारः सरस्वत्या वाग्देव्याः अवतारः काव्यरूपेणा-वतरणम् । सुहृज्जनसाधारणं सुहृज्जनेन मित्रवर्गेण साधारणं समानं यथा स्यात्तथा सुहृद्भिर्मिलित्वैव काव्यं श्रोतुमिच्छामि । सन्निधीयन्ताम् मत्सन्निधौ प्रेष्यन्ताम् । सभासदः श्रोतार इत्यर्थः । अन्तिकं समीपम् । सौमित्रिः लक्ष्मणः । चिरासनपरि-खेदं चिरं चिरकालमासनेन स्थित्या जनितः यः परिखेदः क्लमस्तं पादविहरणेन पादाभ्यां चरणाभ्यां यद्विहरणं भ्रमणं तेन । अपहरामि अपनयामि

अथ षष्ठोऽङ्कः

(तत प्रविशति कञ्चुकी)

क—सम्पादितकौशिकमुखसङ्क्रान्तपार्थिवाज्ञोऽहमत्रस्थितं स्वामिनमवलोकयामि (विलोक्य) एष प्राप्त एव स्वामी—

महाशीलैस्त्रिभिः साधमित एवाभिवर्तते ।
परिष्कृतस्त्रिभिर्वेदैरश्वमेध इवाध्वरः ॥ १ ॥

(तत प्रविशति कुशलवाभ्यामनुगम्यमानो रामभद्रो लक्ष्मणश्च)

सर्वे—(परिक्रामन्ति)

क—(उपसृत्य) जयत्वार्यः, एतत्सज्जमास्थानमण्टपम्, एतदासनं च । (सर्वे उपविशन्ति)

कं—इतस्तावदवलोकयतु देवः, एते राघवाः पौरजानपदाश्च देवं सम्भावयन्ति ।

अथ कञ्चुकिमुखेन रामादीनामागमनं सूचयति । कञ्चुकिलक्षणं यथा—

अन्त.पुरचरो वृद्धो विप्रो गुणगणान्वितः ।
सर्वकार्यार्थकुशल कञ्चुकीत्यभिधीयते ॥

सम्पादितकौशिकमुखसङ्क्रान्तपार्थिवाज्ञ सम्पादिता विहिता कौशिकस्य मुखे सङ्क्रान्ता प्रापिता गमितेति यावत् पार्थिवस्य रामस्य राज्ञ आज्ञा येन स तथाभूतोऽहम् । यो रामस्यादेशो कौशिकम्प्रति मया प्रापयितव्य आसीत् स च प्रापित इत्यर्थ. । स्वामिनं राजानम् ।

अ०—त्रिभिः वेदै. परिष्कृत· अश्वमेध. अध्वरः इव (एषः स्वामी) त्रिभि महाशीलैः सार्धम् इतः एव अभिवर्तते ॥ १ ॥

स०—महाशीलै.—महत् शीलं येषां ते महाशीलाः तैः ।

महाशील—virtuous person. अभिवर्तते—comes. परिष्कृत—adorned. अध्वर—sacrifice

टी० – एष रामः त्रिभिः लक्ष्मणकुशलवैः महाशीलैः महत् उत्तमं शीलं वृत्तं येषा तै. सार्धं सह इत एव अत्रैव अभिवर्त्तते आयाति । त्रिभि. वेदैः ऋग्यजुस्सामभि. परिष्कृतः यथाविधि विहित, अश्वमेध. अध्वरः यज्ञ इव । अत्र रामस्याश्वमेधेन लक्ष्मणकुशलवयोश्च स्त्रिभिर्वेदैस्सह साम्यं दर्शितं, तत्र परिष्कृतत्वं सामान्यो धर्मः उपमानसहयोगेनोपमेयस्य पावनत्वं प्रकटितम् । प्रकृतस्याश्वमेधस्य तत्कर्त्रा रामेण सह सादृश्यसम्बन्धनिरूपणं बहूपयुक्तम् ॥ १ ॥

आस्थानमण्टपम्—आस्थानमण्डपं सभास्थानमिति यावत् । एतत् पुरो

रा—(दृष्ट्वा) किमिदमपरमस्मदन्तिकाद्यवनिकया तिरोधीयते ?

क—एतास्तिस्रो महादेव्यः कौसल्याद्या महीपतेः ।
एतद्भरतशत्रुघ्नलक्ष्मणानां वधूत्रयम् ॥ २ ॥

ल—(कञ्चुकिनमुद्दिश्य) आर्य ! वैदेही च न देवीषु सङ्ख्यायते, न वधूषु च ।

रा—(निश्वस्य) कञ्चुकिन् ! गच्छ त्वं स्वभूमिमध्यास्व ।

क—यदाह (इति निष्क्रान्तः)

रा—आर्यौ ! प्रस्तूयताम् ।

कुशलवौ—

उपयेमे ततस्तिस्रो धर्मपत्नीर्महीपतिः ।
कौसल्यामथ कैकेयीं सुमित्रां च सुमध्यमाम् ॥ ३ ॥

रामलक्ष्मणौ—(सहर्षम्) तात एव कथानायकतामुपनीतः कविना ।
(उभौ नमस्कृत्यासनादवतरतः)

कुशलवौ—कौसल्या सुषुवे रामं—

विलोक्यमानम् । राघवाः रामलक्ष्मणादयः । पौरजानपदाश्च पौराश्च ते जानपदाश्च ते । पौरा पुरवासिनो जनाः जानपदा जनपदवासिनो जना । देवं सम्भावयन्ति भवन्तं सत्कर्तुं प्रतिपालयन्ति । अस्मदन्तिकात् अस्मत्सान्निध्यात् अस्मद्दृष्टिविषयादित्यर्थः यवनिकया तिरस्करिण्या तिरोधीयते निह्नूयते ।

अ०—एता. तिस्रः कौसल्याद्या. महीपतेः महादेव्यः । एतद् भरतशत्रुघ्नलक्ष्मणानां वधूत्रयम् ॥ २ ॥

स०—कौसल्याद्याः—कौसल्या आद्या यासां ता. । भरतशत्रुघ्नलक्ष्मणानाम्—भरतश्च शत्रुघ्नश्च लक्ष्मणश्चेति भरतशत्रुघ्नलक्ष्मणास्तेषाम् । वधूत्रयम्—वधूनां त्रयम् ।

महीपति—king, lit. the lord of the earth.

टी०—एता· तिस्रः कौसल्याद्या. कौसल्या आद्या यासा ताः कौसल्यासुमित्राकैकेयीसञ्ज्ञका महीपते. पृथिवीपते· दशरथस्य महादेव्यो महिष्य. सन्ति । एतद् भरतशत्रुघ्नलक्ष्मणाना भ्रातॄणा वधूत्रयं पत्नीत्रयम् अस्ति । अत्र भरतशत्रुघ्नलक्ष्मणानामित्यस्य स्थाने वय·क्रमवशाद् भरतलक्ष्मणशत्रुघ्नानामिति वक्तव्ये अकृतपाठे वृत्तभङ्गपरिहरणमेव मुख्यं कारणम् इति के चित् ।

अ०—ततः महीपतिः तिस्रः धर्मपत्नीः उपयेमे—कौसल्याम् अथ कैकेयीम्, सुमध्यमां सुमित्रां च ॥ ३ ॥

उपयेमे—married.

टी०—ततः महीपतिः दशरथ. तिस्रः धर्मपत्नीः उपयेमे· परिणीतवान् ।

ल—(प्रणमति)

कुशलवौ—कैकेयी भरतं ततः ।
सुमित्रा जनयामास यमौ शत्रुघ्नलक्ष्मणौ ॥ ४ ॥

रा—(लक्ष्मणमालिङ्गति)

कुशलवौ—उपयेमे ततः सीतां रामः सौमित्रिरूर्मिलाम् ।
तथा भरतशत्रुघ्नौ कुशध्वजसुते उभे ॥ ५ ॥
बाल्ययौवनयोर्मध्ये वर्तमाना नृपात्मजाः ।
नवयोत्कण्ठया चैव कलत्रे दुःस्थितिं ययुः ॥ ६ ॥

तदेव विशदयति—कौसल्याम्, कैकेयीम् सुमध्यमा सुमित्रा च । सुमध्यमाम्—शोभनो मध्ये भवोऽवयवो यस्याः सा सुमध्यमा ताम् ॥ ३ ॥

तात पिता दशरथः । कथानायकताम् कथायाः नायकः कथानायकः तस्य भावस्तत्ता ताम् । उपनीत प्रापितः ।

अ०—कौसल्या रामं सुषुवे, ततः कैकेयी भरतं (सुषुवे), सुमित्रा यमौ शत्रुघ्नलक्ष्मणौ जनयामास ॥ ४ ॥

सुषुवे—gave birth to. **यमौ**—twins.

टी०—कौसल्या कोसलानामधिपस्य राज्ञो दुहिता रामं सुषुवे प्रसूतवती । ततः रामोत्पत्त्यनन्तरम् कैकेयी भरतं सुषुवे । सुमित्रा यमौ यमजौ भरतशत्रुघ्नौ जनयामास उत्पादयामास ॥ ४ ॥

अ०—ततः रामः सीताम् उपयेमे । सौमित्रिः ऊर्मिलाम् (उपयेमे) । तथा भरतशत्रुघ्नौ उभे कुशध्वजसुते उपयेमाते ॥ ५ ॥

टी—ततः यथावसरं राम सीतां जनकस्य राज्ञो दुहितरम् परिणीतवान् । सौमित्रिः सुमित्राया अपत्यं पुमान् लक्ष्मणः ऊर्मिलाम् उपयेमे । तथा भरतशत्रुघ्नौ उभे द्वे कुशध्वजसुते कुशध्वजस्य जनकस्य भ्रातुः सुते पुत्र्यौ माण्डवीश्रुतकीर्त्यौ उपयेमाते । अत्रोत्तरार्धे उपयेमे इति पदस्य वचनपरिणामेनान्वयः ॥ ५ ॥

अ०—बाल्ययौवनयोः मध्ये वर्त्तमानाः नृपात्मजाः कलत्रे नवया उत्कण्ठया चैव दुःस्थितिं ययुः ॥ ६ ॥

स०—बाल्यं च यौवनं च ते बाल्ययौवने तयोः । नृपात्मजाः—नृपस्य आत्मजाः ।

बाल्य—infancy. **यौवन**—youth. **नृप**—king. **आत्मज**—son. **उत्कण्ठा**—longing. **कलत्र**—wife. **दुःस्थिति**—mental disturbance.

टी०—बाल्यं शैशवं यौवनं तारुण्यं तयोरुभयोर्मध्ये वर्तमाना स्थिताः नृपात्मजाः नृपस्य राज्ञ आत्मजाः पुत्राः रामभरतलक्ष्मणशत्रुघ्नाः कलत्रे स्वस्वपत्नीविषये नवया नूतनया उत्कण्ठया रणरणकेन औत्सुक्येनेति यावत् दुःस्थितिं मनो-

ल—रमणीयः ।

रा—अलं कालातिपातेन, गीयताम् ।

जरसा पलितस्तातः काकपक्षधरा वयम् ।
जानुदघ्नास्तदा तेऽपि साकेतोद्यानपादपाः ॥ ७ ॥

कुशलवौ—अथाभिषेकसम्भारे रामस्य समुपस्थिते ।
भरते मातुलं द्रष्टुं मातामहपुरं गते ॥ ८ ॥

रा—(आत्मगतम्) नियतं मध्यमाम्बा निन्द्यते । (प्रकाशम्)
तमुद्देशमुल्लङ्घ्य सीतापहरणात्प्रभृति गीयताम् ।

विकारं मदनोन्माथदशा ययुर्जग्मुः ॥ ६ ॥

टी०—रमणीयः अयं श्लोक इति शेषः । अन्यथा तु रमणीयमित्येव पाठो युक्त, सामान्यत्वात् कालातिपातेनालम्, समयपरिहारेणालम्, नोल्लङ्घनीया वेलेति ।

अ०—तातः जरसा पलित, वयं काकपक्षधराः, ते अपि साकेतोद्यानपादपाः तदा जानुदघ्नाः आसन् ॥ ७ ॥

जरस्—age. पलित—white-haired. काकपक्ष—side-locks of hair. साकेत—Ayodhya. उद्यान—garden. पादप—tree. जानुदघ्न—knee-high.

टी०—तातः पिता जरसा वार्द्धक्येन पलितः श्वेतकेशः आसीत् । वयञ्च चत्वारो भ्रातरः काकपक्षधरा. शिखण्डकधारिणो बाल्य एव स्थिता अभूम । तेऽपि परिचिताश्चिरसहवासादिति भावः, साकेतोद्यानपादपा. साकेतस्यायोध्याया उद्यानेषु उपवनेषु स्थिताः पादपा वृक्षाः तदा तस्मिन् काले जानुदघ्ना जानुपरिमाणा आसन् । यथेदानीमत्युन्नता वृक्षास्तदानीं क्षुद्रा एवासन् तथैव वयमप्युन्नतारोहपरिणाहास्तदानीमल्पकाया अभूम ॥ ७ ॥

अ०—अथ रामस्य अभिषेकसम्भारे समुपस्थिते मातुलं द्रष्टुं भरते मातामहपुरं गते—॥ ८ ॥

स०—अभिषेकसम्भारे—अभिषेकस्य सम्भारस्तस्मिन् । मातामहपुरम्—मातामहस्य पुरम् तत् ।

अभिषेक—installation. सम्भार—preparation. मातुल—maternal uncle. मातामह—maternal grandfather.

टी०—अथ विवाहानन्तरम् रामस्य अभिषेकसम्भारे अभिषेकस्य यौवराज्योचिताभिषवस्य सम्भार उपकरणे तस्मिन् समुपस्थिते प्राप्ते, मातुलं द्रष्टुं सम्मिलितुं भरते मातामहस्याश्वपतेः पुरं नगरं गते याते सति—॥ ८ ॥

अत्र कैकेयीवृत्तान्तमन्तरितुकामेन रामेण 'नियतं मध्यमाम्बा निन्द्यते' इति मनस्याधाय 'सीतापहरणात्प्रभृति गीयता' मित्युक्तम् । एवमेवोत्तररामचरितेपि

कुशलवौ—कालेन रूपसौन्दर्यं श्रुत्वा शूर्पणखामुखात्।
जहार देहं सीताया न चारित्रं दशाननः ॥ ६ ॥

ल—(राममवलोकयति)

कुशलवौ—ततो बध्वार्णवे सेतुं निहत्य युधि रावणम्।
सीतामादाय रामोऽपि साकेतं पुनरागतः ॥ १० ॥

रा—अहो संक्षेपः।

कुशलवौ—प्राप्तराज्यस्ततो रामो जनवादेन नोदितः।

प्रथमाङ्के चित्रदर्शनप्रसङ्गे मध्यमाम्बावृत्तान्तं दर्शयितुमनाः लक्ष्मणं निवार्य ज्येष्ठो राघवः शूर्पणखोदन्तप्रेक्षणाय प्रेरयति। एतेन रामचारित्र्यं सुदर्शितम्भवति।

अ०—कालेन शूर्पणखामुखात् रूपसौन्दर्यं श्रुत्वा दशाननः सीताया देहं जहार, चारित्रं न ॥ ६ ॥

स०—शूर्पणखामुखात्—शूर्पाणीव नखानि यस्याः सा शूर्पणखा तस्या मुखं तस्मात्।

कालेन—in course of time. **रूप**—form. **सौन्दर्य**—comeliness, **देह**—body. **जहार**—took away. **चारित्र**—character.

टी०—कालेन समयेन शूर्पणखामुखात् शूर्पणखा रावणस्य स्वसा तस्या मुखात् रूपसौन्दर्यं रूपस्याकृतिविशेषस्य सौन्दर्यं लावण्यं श्रुत्वाऽऽकर्ण्य दशाननो रावणः सीताया जानक्या देहं शरीरं जहार अपहृतवान् परं चारित्रं शीलं न जहार हर्तुं न शशाक। कृतेपि महति प्रयत्ने ता सतीत्वात्पातयितुं नाशक्नोत् ॥ ६ ॥

अत्र सीतायाः शुद्धिविषये वाल्मीकेरपि साक्ष्यमवगम्यातिहृष्टमना लक्ष्मणो राममवलोकयति।

अ०—ततः अर्णवे सेतुं बध्वा युधि रावणं निहत्य रामः अपि सीताम् आदाय पुनः साकेतम् आगतः ॥ १० ॥

अर्णव—sea. **सेतु**—bridge. **बध्वा**—having constructed. **निहत्य**—having killed. **साकेत**—Ayodhya.

टी०—ततः सीतापहरणानन्तरम् अर्णवे समुद्रे सेतुं पुलिनं बद्ध्वा निर्माय युधि सङ्ग्रामे रावणं दशाननं सबान्धवं ससैन्यं निहत्य व्यापाद्य रामोपि सीतां जानकीम् आदाय गृहीत्वा पुनः साकेतम् अयोध्याम् आगतः संप्राप्तः ॥ १० ॥

अहो सङ्क्षेपः! भूयसोप्युदन्तस्य समासेन वर्णनमतिविस्मयकरमिति भावः।

अ०—ततः प्राप्तराज्यः रामः जनवादेन नोदितः लक्ष्मणम् आहूय प्रोवाच 'सीता निर्वास्यताम्' इति ॥ ११ ॥

स०—प्राप्तराज्यः—प्राप्तं राज्यं येन सः।

आहूय लक्ष्मणं प्राह सीता निर्वास्यतामिति ॥ ११ ॥
बाष्पपर्याकुलमुखीमनाथां शोकविक्लवाम् ।
उद्वहन्तीं च गर्भेण पुण्यां राघवसन्ततिम् ॥ १२ ॥
सीतां निर्जनसम्पाते चण्डश्वापदसङ्कुले ।
परित्यज्य महारण्ये लक्ष्मणोऽपि न्यवर्तत ॥ १३ ॥

ल०—अहो ! अयशोभागी लक्ष्मणः ।

रा—कस्तवात्रापराधः, रामपराक्रमाः खल्वेते गृह्यन्ते । ततः ।

प्राप्तराज्य–one who had assumed sovereignty. **जनवाद**–public scandal. **नोदित**—incited. **आहूय**—having called. **निर्वास्यताम्**—should be exiled.

टी०—ततः साकेतागमनानन्तरं प्राप्तराज्य. प्राप्तमधिगतं राज्यं येन स रामः जनवादेन लोकापवादेन नोदितः प्रेरित सन् लक्ष्मणम् आहूय आकार्य प्राह उवाच—सीता निर्वास्यतां गृहाद् बहिर्वनम्प्रति नीयतामिति ।

अ०—बाष्पपर्याकुलमुखीम् अनाथाम्, शोकविक्लवाम् गर्भेण च पुण्यां राघवसन्ततिं च उद्वहन्तीं सीतां निर्जनसम्पाते चण्डश्वापदसङ्कुले महारण्ये परित्यज्य लक्ष्मणः अपि न्यवर्तत ॥ १२—१३ ॥

स०—बाष्पपर्याकुलमुखीम्—बाष्पेण बाष्पैर्वा पर्याकुलं मुखं यस्यास्ताम् । अनाथाम्—नास्ति नाथो यस्याः ताम् । शोकविक्लवाम्—शोकेन विक्लवा ताम् । निर्जनसम्पाते—निर्जनः सम्पातो यत्र तस्मिन् । चण्डश्वापदसङ्कुले—चण्डाश्च ते श्वापदास्तै· सङ्कुले ।

बाष्प—tear. **पर्याकुल**—bewildered. **अनाथ**—without a protector. **विक्लव**—bewildered. **गर्भ**—womb. **पुण्य**—virtuous. **सन्तति**—offspring. **निर्जन**—desolate. **सम्पात**—course. **चण्ड**—fierce. **श्वापद**—beast. **सङ्कुल**—infested with. **महारण्य**–the great forest.

टी०—बाष्पैरश्रुभि· पर्याकुलं परित आकुलं व्याप्तं मुखं वदनं यस्यास्ताम् । अनाथा नास्ति नाथः शरणं यस्यास्ताम्, शोकविक्लवा शोकेन शुचा विक्लवां व्याकुलाम्, गर्भेण च पुण्यां पवित्राम्, राघवसन्ततिं रामस्यापत्यम् उद्वहन्ती, सीतां निर्जनसम्पाते निर्जनो जनशून्य· सम्पात· सञ्चारो यत्र तस्मिन्, चण्डश्वापदसङ्कुले चण्डाः क्रूराश्च ते श्वापदा हिंस्रजन्तवस्तैः सङ्कुले व्याप्ते महारण्ये महाकान्तारे परित्यज्य विसृज्य लक्ष्मणोऽपि न्यवर्तत प्रतिनिवृत्त· ॥ १२—१३ ॥

अयशोभागी अयशोऽपयशो भजत इति तच्छीलः । अत्र सीतानिर्वासनविषये तव अपराधो दोषः कः, न कोपि तव दोषोऽत्रास्तीत्यर्थः । रामपराक्रमाः

कुशलवौ—एतावती गीतिः। —
रा—(सोद्वेगम्) सौमित्रे, कष्टमापतितम्—
उभौ—ततः प्राणैः परित्यक्ता निराशा जनकात्मजा।
अप्रियाख्यानभीतेन कविना संहृता कथा॥ १४॥
कुशः—(अपवार्य) महाभागावेतौ सीतासङ्कथायामत्यन्तविषादिनौ तस्मादनुयोक्ष्ये। (लक्ष्मणमुद्दिश्य) अपि भवन्तौ रामायणकथानायकौ रामलक्ष्मणौ ?
ल—तौ क्लेशभागिनौ।
कुशः—किं नीता त्वया सीता ?
ल—(सलज्जम्) मया मन्दभाग्येन।

रामस्य पराक्रमा बलसूचकानि कृत्यानि गृह्यन्ते गीयन्त इत्यर्थ। अस्मिन्काव्ये रामस्य वीरचरितं कविनोपनिबद्धं न च लक्ष्मणस्यापयश। एतावती गीति', एतावदन्तः सन्दर्भः। कष्टमापतितमिति। जीवन्त्या जानक्या कथोपसंहारोऽत्र न स्यात्, गाथावसानाच्चात्रानुमीयते सीतोपरतेत्यभिप्रायेणोक्तं कष्टमिति।

अ०—तत· निराशा जनकात्मजा प्राणैः परित्यक्ता। अप्रियाख्यानभीतेन कविना कथा संहृता॥ १४॥

स०—जनकात्मजा—जनकस्य आत्मजा। अप्रियाख्यानभीतेन—अप्रियस्य (संदर्भस्य) आख्यानम् यद्वा अप्रियं च तदाख्यानं अप्रियाख्यानं तस्माद् भीतस्तेन।

निराशा—full of despair. **जनकात्मजा**—daughter of Janaka. **अप्रिय**—unpleasant. **आख्यान**—narration. **भीत**—afraid. **कथा**—story. **संहृत**—concluded.

टी०—तत. निराशा जीविताशारहिता जनकात्मजा सीता प्राणै परित्यक्ता अभूत्। अयमर्थो रामेणावधारितः। वस्तुतस्तु ततः परित्यक्ता लक्ष्मणेन वने विसृष्टा जनकात्मजा जानकी प्राणैरसुभिः निर्गताशा अभवत्' इति कर्त्रैर्योजना ज्ञेया। श्वापदसङ्कीर्णत्वादरण्यस्य सीता स्वजीविते निराशा बभूव। अप्रियाख्यानभीतेन न प्रियमप्रियमनिष्टं तस्य यदाख्यानं कथनं तस्माद् भीतेन त्रस्तेन कविना वाल्मीकिना कथा गाथा संहृता समापिता। अत्राप्रियाख्यानभीतेनेति पदेन सीतामरणं सम्भाव्यते रामेण। प्रकृते तु प्रियाननुकूलोदन्तपरिहाराय वाल्मीकिना कथाऽवसानं नीतेति कुशलवयोर्मतम्। वस्तुतस्तु त्यागोत्तरं वृत्तं मुनिना कण्वायावेदितं न तु कुशलवाभ्याम्, तथा च तयो सम्बन्धज्ञानं न स्यादित्यभिप्रायेण॥ १४॥

महाभागौ रामलक्ष्मणावित्यर्थः अत्यन्तविषादिनौ अत्यन्तमतिमात्रं विषादवन्तौ खिन्नमानसौ तस्मात् अनुयोक्ष्ये प्रक्ष्यामि। रामायणकथानायकौ रामायणस्य कथा रामायणकथा-रामायणे वर्णितमितिवृत्तमिति यावत् तस्या नायकौ प्रधानपुरुषौ। अपीति

कुशः—किं सीता रामस्य धर्मपत्नी ?

ल—अथ किम ?

कुशः—अथ सीतायास्तद्गर्भस्य वा विदितः कश्चिद् वृत्तान्तः ?

ल—विदितो युष्मत्सङ्कीर्तन ।

रा—किमितः पुनः कल्याणमावेदयति ? (विचिन्त्य) एवं तावदनुयोक्ष्ये । आर्यौ, किमेष युवयोरागमावधिः, आहोस्वित्सन्दर्भावधिः ?

कुशः—न वयं जानीमः ।

रा—कण्वोऽनुयोक्तव्यः । सौमित्रे, कण्वमाह्वय ।

ल—(निष्क्रम्य कण्वेन सह पुनः प्रविष्टः)

कण्वः—(विलोक्य)

स एष रामो नयनाभिरामः सीतासुताभ्यां समुपास्यमानः ।
यदृच्छया तिष्यपुनर्वसुभ्यां पार्श्वस्थिताभ्यामिव शीतरश्मिः ॥१५॥

प्रश्ने । विदित इति । युष्मद्गीतेन युवयोर्गीत्या सीतायास्तद्गर्भस्य वा वृत्तान्तो विदित इति पूर्वेणान्वय । आपन्नसत्त्वा सीता निराशा प्राणैः परित्यक्तेत्येवंविधो वृत्तान्तो युष्मद्गीतेन विदित इति लक्ष्मणस्याशय. । किं कल्याणोदर्क. सीतोदन्त इति ज्ञातुकामो रामस्तौ पृच्छति किमेष इति । युवयो. कुशलवयोः आगमस्य शिक्षायाः अवधि· मर्यादा किमेष·, किं भवद्भ्यामेतावन्मात्रं शिक्षितम् । उत सन्दर्भस्य ग्रन्थस्यायम् अवधिः सीमा । आगमावधौ सन्दर्भशेषत्वात्सीताजीवनसम्भावना, सन्दर्भावधौ तु सीतासमाप्तिरिति भावः ।

अ०—सः एषः रामः सीतासुताभ्यां समुपास्यमानः यदृच्छया पार्श्वस्थिताभ्यां तिष्यपुनर्वसुभ्यां (समुपास्यमानः) शीतरश्मिः इव नयनाभिरामः (दृश्यते) ॥ १५ ॥

स०—सीतासुताभ्याम्–सीतायाः सुतौ सीतासुतौ ताभ्याम्। तिष्यपुनर्वसुभ्याम्–तिष्यश्च पुनर्वसुश्च तौ तिष्यपुनर्वसू ताभ्याम्–पार्श्वस्थिताभ्याम् पार्श्वे स्थितौ ताभ्याम्। शीतरश्मि.—शीता रश्मयो यस्य सः । नयनाभिरामः—नयनयोः अभिरामः ।

समुपास्यमान—attended by. **यदृच्छया**—incidentally. **पार्श्व**—side. **शीतरश्मि**—moon (lit. cool-rayed). **अभिराम्**-delightful.

टी०—स एषः पुरतो दृश्यमान. रामः सीतासुताभ्यां कुशलवाभ्या समुपास्यमानः सेव्यमानः यदृच्छयाऽकस्मात् पार्श्वस्थिताभ्या पार्श्वे सन्निधौ स्थिताभ्या वर्त्तमानाभ्यां तिष्यपुनर्वसुभ्यां तदाख्यनक्षत्राभ्या समुपास्यमानः शीतरश्मिश्चन्द्र इव नयनाभिरामः नयनयोर्नेत्रयोरभिरामः प्रियः दृश्यत इति शेषः । अत्र पुनर्वस्वोरेकीभाव आश्रितः, स च छन्दस्येव विकल्पत आश्रीयते न तु लोके, इह तु वैदिकवत्प्रवृत्तिरिति ज्ञेयम् । कुशलवयोस्तिष्यपुनर्वसुभ्यां रामस्य शशिना

ल—कण्वोऽयमार्य सम्प्राप्तः ।

रा—(प्रणम्य) इदमासनमास्यताम् ।

कण्वः—(उपविश्य) यदि रामायणश्रवणकौतुकं कथ्यतां कुत्रावधिरभिहितः कुशलवाभ्यामिति ।

ल—"सीतां निर्जनसम्पाते" (इति पठित्वा) एष कुशलवयोर्गीतसीमा ।

कण्वः—श्रूयतां ततः परम् ।

रा—का गतिः ?

कुशलवौ—रामदाराणां भद्रं गायति ।

कण्वः—ततः श्रुत्वा स शिष्येभ्यो वाल्मीकिर्मुनिरुत्तमः ।
स्वयं सीतां समाश्वास्य निनाय स्वं तपोवनम् ॥ १६ ॥

रा—अनुगृहीतं भगवता रघुकुलम्, अभ्युद्धृतोऽस्मि भगवता ।

कुशलवौ—दिष्ट्या कुशलिनो रामदाराः (सर्वे हर्षं नाटयन्ति)

सह सादृश्यन्तु सङ्गतमेव ॥ १५ ॥

रामायणश्रवणकौतुकं रामायणस्य रामचरितसम्बद्धग्रन्थविशेषस्य यच्छ्रवणमाकर्णनं तस्य तदर्थं वा यत्कौतुकं कौतूहलं यदि वर्तते तर्ह्युच्यतामिति शेषः । कुत्रावधिः कुत्र पर्यन्तम् अभिहित उक्तः रामायणकथासन्दर्भ इत्युन्नेयम् । गीतसीमा गीतावधिः । का गतिः नान्योऽस्ति कश्चिन्मार्गः, सर्वमपि शुभाशुभं श्रोतव्यमेव ।

अ०—ततः शिष्येभ्यः श्रुत्वा सः उत्तमः मुनिः वाल्मीकिः सीतां स्वयं समाश्वास्य स्वं तपोवनं निनाय ॥ १६ ॥

उत्तम—the best. **समाश्वास्य**—having consoled. **निनाय**—led, escorted

टी०—ततः सीतां वने त्यक्त्वा गृहान् प्रतिनिवृत्ते लक्ष्मणे शिष्येभ्यः स्नानादिकं निर्वर्त्य पुनर्निवृत्तेभ्य स्वान्तेवासिभ्य. सीताप्रवृत्तिं श्रुत्वा निशम्य स उत्तमः श्रेष्ठो मुनिर्वाल्मीकिः सीता स्वयं समाश्वास्य स्वं तपोवनम् आश्रमं निनाय प्रापयामास ॥ १६ ॥

भगवता वाल्मीकिना रघुकुलं रघुवंशः अनुगृहीतम् अनुकम्पितं सीतागर्भस्थरघुसन्ततित्राणादिति भावः । अभ्युद्धृतोऽस्मि उद्गमितोस्मि पापकूपादिति शेषः । सीताविनाशे तदपत्यविनाशः सममेवाभविष्यत्ततश्च महत्पातकं मामस्प्रक्ष्यत्, सीतारक्षया तदपत्यत्राणेन च वाल्मीकिना महतः पातकात् रक्षितोस्मीति निष्कर्षः । गीतिनिबन्धनानि गीत्याश्रितानि ननु वास्तविकानि । परमार्थतस्तु सीतानाम्नी काचिदपि नारी नात्र वर्त्तते । एतेन कुशलवयो. स्वजननीनामाभिज्ञानशून्यत्वं दर्शितम् ।

कुशः—अयि वत्स लव, कासौ वाल्मीकितपोवने सीता नाम ?
लवः—न काचित्, केवलं गीतिनिबन्धनान्येतानि सीता सीतेत्यक्षराणि।
रा—ततस्ततः।
कण्वः—परिपूर्णे ततः काले द्यौरिवेन्दुदिवाकरौ।
सीतापि जनयामास सा यमौ तनयावुभौ ॥ १७ ॥
ल—जयत्वार्यः, दिष्ट्या वर्धतां राघवकुलम्।
कुशलवौ—जयतु महाराजः पुत्रजन्मना।
रा—(स्वगतम्) अपि नाम कुशलवौ स्याताम्।
कण्वः—जातावस्थोचितं कर्म विदधानो यथाक्रमम्।
स चकार तयोर्नाम मुनिः कुशलवाविति ॥ १८ ॥
रा—कथमेताविव सीतातनयौ ? हा पुत्र कुश ! हा पुत्र लव !
ल—इयं सा देवीसम्भवाऽऽर्यस्यात्मसङ्क्रान्तिः।
कुशलवौ—कथमयं सः। हा तात, त्रायस्व। (सर्वे परस्परमालिङ्गय मोहं गच्छन्ति)

अ०—ततः काले परिपूर्णे सा उभौ यमौ तनयौ द्यौः इन्दुदिवाकरौ इव जनयामास ॥ १७ ॥

स०—इन्दुदिवाकरौ—इन्दुश्च दिवाकरश्च तौ।

परिपूर्ण—completed. यमौ—twins. तनय—son. इन्दु—moon. दिवाकर—sun. जनयामास—gave birth to.

टी०—ततः तदनन्तरं काले प्रसवसमये परिपूर्णे पूर्त्तिं गते सा सीतापि उभौ द्वौ यमौ यमलौ तनयौ सुतौ द्यौः इन्दुदिवाकरौ इव चन्द्रसूर्याविव जनयामास प्रसूतवती ॥ १७ ॥

अ०—जातावस्थोचितं कर्म यथाक्रमं विदधानः सः मुनिः तयोः कुशलवौ इति नाम चकार ॥ १८ ॥

स०—जातावस्थोचितम्—जातावस्थायाम् उचितम्।

जातावस्था—state of birth. उचित—proper. कर्म—ceremony. विदधानः—performing. यथाक्रमम्—in due order.

टी०—जातावस्थोचितं जातावस्थायाम् उत्पत्तिकाले उचितं युक्तं जातकर्मादिकं संस्कारकलापं यथाक्रमं क्रमेण विदधानः कुर्वन् स मुनिर्वाल्मीकिस्तयोः सीतापुत्रयोः कुशलवाविति नाम सञ्ज्ञा चकार विदधौ।

देवीसम्भवा देवी जानकी सम्भवः उत्पत्तिमूलं यस्याः सा। यद्वा देव्याः सीतायाः सम्भव उत्पत्तिर्यस्याः सा। आत्मसङ्क्रान्तिः आत्मनः स्वरूपस्य सङ्क्रान्तिः

कण्वः—(सविषादम्) किमेतत्कष्टमापतितम्।

मया तु मन्दभाग्येन भद्रं तु किल गायता।
रघुप्रवीराश्चत्वारो हितेनैकेन पातिताः ॥ १६ ॥

(निर्वर्ण्य) दिष्ट्या श्वासोद्गम इव। अहमेतं वृत्तान्तं भगवते देव्यै च निवेदयामि। (इति निष्क्रान्त)

(ततः प्रविशति वाल्मीकिः, ससम्भ्रमं सीता च)

वा—वत्से, त्वरस्व, मा परिलम्बिष्ठाः; अप्रतिक्रियमाणा मूर्च्छा निष्क्रान्तमापद्यते।

सीता—कथय कथय परमार्थम्, अपि भ्रियन्ते राघवाः?
कहेहि कहेहि परमत्थं, अवि धरन्ति राहवा?

वा—समाश्वसिहि, भ्रियन्ते राघवाः। किमेतान्न पश्यति भवत्युच्छ्वसितान्?

सीता—दृढं प्रत्यायितास्मि तातेन।
दिढं पच्चाइदह्मि तादेण।

वा—(अन्वेषणमभिनीय)

सङ्क्रमणम्, तथा चोक्तम्—अङ्गादङ्गात्प्रभवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि,' इति। एवमेव—'आत्मा वै जायते पुत्र.' 'तज्जाया जाया भवति यदस्या जायते पुनः' इत्यादिभिः श्रुतिस्मृतिवचनैरपत्यन्नामात्मन. प्रतिबिम्बनमेवेति ज्ञेयम्।

अ०—मन्दभाग्येन मया भद्रं गायता एकेन हितेन चत्वारः रघुप्रवीरा पातिताः ॥ १६ ॥

स०—मन्दभाग्येन मन्दं भाग्यं यस्य तेन। रघुप्रवीराः—प्रकृष्टा वीराः प्रवीराः, रघवश्च ते प्रवीराः रघुप्रवीराः।

मन्दभाग्य—ill-starred one. भद्र—auspicious. हित—well-wisher.

टी०—मन्दभाग्येन मन्दं हतं भाग्यं दैवं यस्य तेन मया, हर्षस्थाने दुःखप्रदेनेत्यर्थः। भद्रं मङ्गलं सीतापुत्रोत्पत्त्यादिकमभीष्टमपि गायता एकेन हितेन प्रियकारिणा प्रियेण वचसा वेति शेषः। चत्वार. रघुप्रवीराः रघुमुख्या· रामलक्ष्मणकुशलवाः विनिपातिताः मूर्च्छां प्रापिता इत्यर्थ. ॥ १६ ॥

श्वासोद्गम. श्वासगतागते। त्वरस्व त्वरा विधेहि। मा परिलम्बिष्ठा., विलम्बो न कार्यः। अप्रतिक्रियमाणा प्रतीकारं विना मूर्च्छा मोहः निष्क्रान्तं प्राणशून्यताम् आपद्यते प्राप्नोति। मूर्च्छा प्रतिरोधं विना मृत्युं नयतीति भावः। परमार्थं तत्त्वम्। भ्रियन्ते जीवन्ति। उच्छ्वसितान् श्वासान्। प्रत्यायितास्मि प्रत्ययं गमितास्मि विश्वासितास्मि। राघवा जीवन्तीत्यत्र श्वासगतागते प्रमाणं, जीवतामेव श्वासगतागतयोः सम्भवात्,

मैथिलि प्रहिणु लोचने ततः साधु धैर्यमवलम्ब्य यत्नतः ।
त्वत्कथाप्रलयमातरिश्वना पश्य राघवकुलं निपातितम् ॥ २० ॥

सीता—(सलज्जम्) भगवन्, अननुज्ञातदर्शनाहमार्यपुत्रेण ।
भअवं, अणणुण्णाददंसणा अहं अज्जउत्तेण ।

वा—(सावष्टम्भम्) मयि स्थिते को वा अभ्यनुज्ञायाः प्रतिषेधस्य वा । गच्छ, अभ्यनुज्ञातासि वाल्मीकिना मयैतद्दर्शने, उपसर्प निश्शङ्कमुपयन्तारम् ।

सी—(विलोक्य) किमेवं वर्तते, सर्वथा हतास्मि मन्दभाग्या ।
किं एव्वं वट्टदि, सव्वहा हदह्मि मन्दभाआ ।

(पतित्वा रोदिति)

वा—उत्तिष्ठ समाश्वासय, अहमपि रामलक्ष्मणावभ्युपपत्स्ये । वत्स राम, वत्स लक्ष्मण, समाश्वसिहि ।

सी—जात कुश, जात लव, समाश्वसिहि समाश्वसिहि । (एवं सलिलसेकं नाटयति)
जाद कुस, जाद लव, समस्सस समस्सस ।

अतस्तेषा श्वाससञ्चारं दर्शयता वाल्मीकिना तज्जीवितम्प्रति विश्वासं नीतास्मीत्यर्थः ।

अ०—मैथिलि ! यत्नतः धैर्यम् अवलम्ब्य ततः लोचने साधु प्रहिणु । त्वत्कथाप्रलयमातरिश्वना साधु निपातितं राघवकुलं पश्य ॥ २० ॥

स०—त्वत्कथाप्रलयमातरिश्वना—त्वत्कथा एव प्रलयमातरिश्वा (प्रलये मातरिश्वा) तेन ।

यत्नतः—with effort. **धैर्य**—courage. **अवलम्ब्य**—resorting to. **लोचन**—eye. **प्रहिणु**—direct, cast. **प्रलय**—dissolution of the universe. **मातरिश्वन्**—wind. **कुल**—family. **साधु**—completely. **निपातितम्**—fallen down.

टी०—हे मैथिलि ! जानकि ! यत्नतः धैर्यं धीरताम् अवलम्ब्य आस्थाय लोचने नयने साधु सम्यक् तत. तस्मिन् राघवाधिष्ठिते प्रदेशे प्रहिणु प्रक्षिप । त्वत्कथाप्रलयमातरिश्वना तव कथा त्वत्कथा सैव प्रलयमातरिश्वा प्रलयकालीनो वायुस्तेन साधु अत्यन्तं निपातितं भूतले क्षिप्तं मूर्च्छितमित्यर्थः राघवकुलं राघवाणा कुलं रामलक्ष्मणकुशलवान् पश्य विलोकय । अत्र सीताकथायां शाब्दः प्रलयपवनत्वारोपो राघवकुले द्रुमत्वारोपे आर्थे निमित्तम् ॥ २० ॥

अननुज्ञातदर्शना नानुज्ञातं नाज्ञप्तं दर्शनं यस्याः सा तथाभूताहमस्मि । आर्यानुज्ञयैवार्यदर्शनं मे प्रतिषिद्धमिति भावः । सावष्टम्भं सगर्वम् । मयि स्थिते मयि वर्तमाने अभ्यनुज्ञायाः प्रतिषेधस्य वा विधिनिषेधयोः कः प्रभवतीति शेषः । महर्षित्वान्मम वचसो राजाज्ञाया अपि प्राधान्यमिति वक्तुर्हृदयम् । उपयन्तारं

रामः—(प्रत्यागम्य) आर्य कण्व ! अपि ध्रियते वैदेही ?
वा—पुरत एव वर्तते ।
रा—(विलोक्य) कथं भगवान् सम्प्राप्तः । (लज्जां नाटयति)
वा—अलं लज्जया, कलत्रविषया खल्वनुकम्पा ।
ल—(आश्वस्य) अपि प्रत्यागतसञ्ज्ञ आर्यः स्यात् ?
रा—प्रत्यागतोऽस्मि मन्दभाग्यः ।
कुशलवौ—(समाश्वस्य) हा तात ! परित्रायस्व ।
(इति पादयोः पतित्वा रुदतः)
रामलक्ष्मणौ—(परिष्वज्य समाश्वासयतः) वत्सौ ! अलमावेगेन ।
वा—हा तातदर्शनदुर्ललितौ ! कस्य क्व रुद्यते, प्रमृज्यतामश्रु ।
कुशलवौ—(बाष्पं प्रमृज्य राममवलोकयन्तौ स्थितौ)
सी—(अपवार्य) क एषः, यो युवाभ्यामेवं प्रेक्षितः ?
को एसो, जो तुह्मेहिं एव्व पेक्खिदो ?

स्वामिनम् । एतेन ब्रह्मर्षेराज्ञा भर्तुरादेशादपि गरीयसीत्यवगम्यते। किमेवं वर्तत इति । मूर्च्छितान् राघवान् विलोक्य सीताया विषादगर्भितमिदं वाक्यम् । अत्रेदं बोध्यम्—रामलक्ष्मणयोः समाश्वासनाय वाल्मीकेः प्रयासः, कुशलवयोस्तु जानक्या इति शिष्टाचारानुगुणं चारित्रपद्धतिर्व्यवस्थापिता कविना । एवमेवार्यपुत्रेणाननुज्ञातदर्शनायास्सीताया रामोपसर्पणदोषपरिहारविषये वाल्मीकिवचसो हेतुत्वमुपात्तम् । कलत्रविषया स्त्रीविषया । अनुकम्पा दया । स्त्रीविषये क्रियमाणायामनुकम्पाया लज्जा परिहर्तव्या । गुरुसमक्षम् 'अपि ध्रियते वैदेही' इति प्रश्नेन लज्जितं रामं लज्जात्यागाय वाल्मीकिराह—अलमिति । प्रत्यागतसञ्ज्ञः प्रत्यागता पुनः प्राप्ता संज्ञा चैतन्यं यस्य स तथाभूतः । प्रत्यागतोऽस्मि संज्ञा प्राप्तोऽस्मि ।

• अदृष्टपूर्वबन्धुजनदर्शनेन कदाचिदतीतदुःखदशास्मरणात् कदाचिदनुपनतस्नेहस्मृत्याश्रुपातो जायते, अत्रोपगततातयोः कुशलवयोरननुभूतपूर्वस्य तातस्नेहस्यानुमित्या स्मरणाद्विषादोऽश्रुपातश्चेति। रामं तातमजानद्भ्यां कुशलवाभ्यां यन्नामाङ्कलालनसुखमुपलब्धं तत्स्मृत्वा दुःखवशङ्गताविति केचित् । तातदर्शनदुर्ललितौ तातस्य जनकस्य दर्शनेन दुर्ललितौ दुःखावस्था प्राप्तौ। कस्य क्व रुद्यते, कस्य युवां कस्य वा रामः, गर्भस्थावेव युवां त्यक्तौ निर्घृणेन रामेणेति तस्य कृते रोदनं व्यर्थमेव । अथ सीता विमनस्कतां द्योतयन्ती कुशलवावाह—क एष इति । क एषः, नास्त्यस्माकमनेन सह कश्चन सम्बन्धः, यो युवाभ्यामेवं प्रेक्षितो यो युवयोर्दृष्टिगोचरमापतितः । एतेन रामं प्रति सीताया औदासीन्यं प्रकटितम्भवति, तदेव ज्ञात्वा राम आह—औदासीन्यमिति । चिरकालोपनतं चिरकालेन चिरसमयेन उपनतं प्राप्तम् अस्मत्कुटुम्बिनाम्

रामः—अहो ! औदासीन्यं वैदेह्या यदियं चिरकालोपनतमस्मत्सन्निधानं मुखविकासेनापि न सम्भावयति ।

वा—(सकोपम्) हे राजन् ! धृतसौहार्द ! महाकुलीन ! समीक्ष्यकारिन् ! किं युक्तं तव प्रतिपादितां जनकेन, गृहीतां दशरथेन, कृतमङ्गलामरुन्धत्या, विशुद्धचारित्रां वाल्मीकिना, भावितशुद्धिं विभावसुना, मातरं कुशलवयोः, दुहितरं भगवत्या विश्वम्भरायाः, देवीं सीतां जनापवादमात्रश्रवणेन निराकर्त्तुम् ?

रामः—(वैक्लव्यं नाटयति)

वा—सौमित्रे युक्तमिदम् ? अथ वा कस्तवोपालम्भः, नियोज्यस्त्वं कनीयान् । (राममुद्दिश्य) अथ दशग्रीववीरवधावसाने सीताप्रतिग्रहं प्रति कः प्रमाणीकृतो देवः प्रमाणेन ?

रा—भगवान् वैश्वानरः ।

वा—भोः प्रत्ययनिवृत्तेः किं कारणम् ?

सी—हा धिक्, हा धिक्, ममाधन्यायाः कृत एवमाधिक्षिप्यत
हद्धि, हद्धि, मम अधरणाए किदे एव्वं अदिक्खिअदि
आर्यपुत्रः ।
अंअउत्तो ।

ममोपस्थितिं मुखविकासेन मुखस्य वदनस्य विकासः प्रफुल्लनं तेन, सस्मितेन वदनेनेत्यर्थः, न सम्भावयति नाद्रियते । चिरादुपस्थिते भर्तरि मुखप्रसादेनावलोकनं कुलीनानामभिमतम् । अत्रौदासीन्यं स्वत्यागप्रभवमिति ज्ञेयम् । अथ सीताया हृदयगतं भावं वाल्मीकिराह—हे राजन्निति । धृतसौहार्द धृतं मनसि धारितं सौहार्दं सुहृद्भावो येन तत्सम्बुद्धौ । महाकुलीन महच्च तत्कुलं महाकुलं तत्र भवस्तत्सम्बुद्धौ । समीक्ष्यकारिन् कार्य्याकार्य्यविचारकुशल । जनकेन राज्ञा तव प्रतिपादिता तुभ्यं पत्नीत्वेन दत्ताम् । दशरथेन त्वत्पित्रा गृहीताम् । अरुन्धत्या वसिष्ठपत्न्या कृतमङ्गला कृतं मङ्गलं यस्याः ताम् । विशुद्धचारित्रा विशुद्धं विशुद्धत्वेन निर्णीतं चारित्रं यस्यास्ताम् । विभावसुना वह्निना भावितशुद्धिम् भाविता प्रत्यक्षीकृता शुद्धिर्यस्यास्ताम् । विश्वम्भरायाः पृथिव्याः दुहितरं पुत्रीम् । जनापवादमात्रश्रवणेन केवलं मूढलोकनिन्दाकर्णनेन निराकर्तुं विवासयितुं न युक्तम् । वैक्लव्यं व्याकुलताम् । अथ रामोपालम्भानन्तरं वाल्मीकिर्लक्ष्मणमुपालभते—युक्तमिति । न युक्तमित्यर्थः । अथ सौमित्रिं समर्थयन्नाह—कस्तवोपालम्भः, न कश्चिदपीति तात्पर्यम् । अत्र हेतुमाह—नियोज्य इति । कनीयस्त्वात्तव ज्येष्ठाज्ञापरिपालनं न दोषायेति भावः । दशग्रीववीरवधावसाने दशग्रीवो रावणः स एव वीरस्तस्य यो वधो विनाशस्तस्यावसानेऽन्ते सीताप्रतिग्रहं

(कर्णौ पिदधाति)

वा—कुशलवजननीविशुद्धिसाक्ष्ये
पवनसखा यदि देवता नियुक्ता।
कथमिव भवतो निरङ्कुशोऽयं
हृदि निहितो नु पृथग्जनापवादः॥ २१॥

रामः—(आयुज्यमानमिव)

वा—कथं वीरहस्तेन मामतिवाहयति।

प्रति सीताया यः प्रतिग्रहोऽङ्गीकरणं तं प्रति प्रमाणेन साक्षिभावेन को देवः प्रमाणीकृत. प्रमाणत्वेनाश्रितः। वैश्वानरोऽस्मि.। प्रत्ययनिवृत्ते. प्रत्ययो विश्वासस्तस्य या निवृत्तिर्विलोपस्तस्या· किं कारणं को हेतुरिति भावः। अधन्याया मन्दभाग्याया मम कृते आर्यपुत्रो राम एवम् अधिक्षिप्यते कठोरवचनै· पराभूयते।

अ०—कुशलवजननीविशुद्धिसाक्ष्ये पवनसखा देवता यदि नियुक्ता, अयं निरङ्कुशः पृथग्जनापवादः भवतः हृदि कथम् इव निहितः नु॥ २१॥

स०—कुशलवजननीविशुद्धिसाक्ष्ये—कुशलवयोर्जननी तस्या विशुद्धिस्तस्यास्साक्ष्यं तस्मिन्। पवनसखा—पवनः सखा यस्य सः। पृथग्जनापवादः—पृथग्जनानाम् अपवादः।

जननी—mother. **विशुद्धि**—purity. **साक्ष्य**—witness. **पवनसखा**—the fire-god, the friend of the wind. **नियुक्त**—appointed. **निरङ्कुश**—uncontrolled. **अपवाद**—scandal. **पृथग्जन**—unenlightened people.

टी०—कुशलवयोर्जननी माता सीता तस्या विशुद्धिर्विशेषेण शुद्धिः परीक्षा तस्याः साक्ष्यं साक्षिभावस्तस्मिन् यदि पवनसखा अग्निः देवता नियुक्ता प्रमाणत्वेनाङ्गीकृता, तदा अयं निरङ्कुशो निरर्गलः पृथग्जनापवादः पृथग्जनानां सामान्यपुरुषाणाम् अपवादो निन्दा रावणगृहवासरूप इति यावत्, कथमिव केन हेतुना भवतस्तव हृदि नु निश्चयेन निहितः स्थित.। अत्राग्निशुद्धायां सीतायां सामान्यपुरुषापवादेन तव हृदि निहितः संशयो न युक्त इति तात्पर्यम्॥ २१॥

टी०—आयुज्यमानम् किञ्चित् स्पृश्यमानम् इव यथा स्यात्तथा। आयुज्यमानमिति क्रियाविशेषणम्। आ ईषदर्थे। अस्पष्टोऽर्थः। अत्र स्पर्शो मुनेर्वारणायाभिमत इति वाल्मीकिवचसा प्रतीयते—'कथं वीरहस्तेन मामतिवाहयति,' वीरश्चासौ हस्तो वीरहस्तो बलवान् करस्तेन माम् अतिवाहयति अपसारयति। अत्र रामकर्तृकं मुनेरपसारणं न वचनीयताबीजं, राजपरिषदि रामं दूषयतो मुनेरपसारणस्य निर्दोषत्वात्।

अनुकृतिसरले पृथग्जनानां
निवसति चेतसि संश्रितोऽनुरागः ।
नरपतिहृदये न जातमाल्यं (?)
न हि पुलिनेषु तिलस्य सम्भवोऽस्ति ॥ २२ ॥

वत्स ! किमनेन कण्डूयनेन, गृहाण कुशलवौ, गच्छामः स्वमाश्रमपदम् । (इति परिक्रामति)

रामलक्ष्मणौ—प्रसीदतु, गच्छतु भगवान् ।

वा—(प्रतिनिवृत्य) वैदेहि, तपोवनगतानामपि दण्डं समाज्ञापयति, तत्परिशोध्यतामात्मा ।

अ०—अनुकृतिसरले पृथग्जनानां चेतसि संश्रित अनुरागः निवसति । नरपतिहृदये जातमाल्यं न, पुलिनेषु तिलस्य सम्भव. नास्ति हि ॥ २२ ॥

स०—अनुकृतिसरले—अनुकृतौ सरलं तस्मिन् । नरपतिहृदये—नरपतेर्हृदयं तस्मिन् ।

अनुकृति—imitation. सरल—sincere. पृथग्जन—common people. संश्रित—sheltered. अनुराग—love. निवसति—abides. नरपति—king. माल्य—state of a garland. पुलिन—sandy soil. तिल—sesamum plant.

टी०—अनुकृतिसरले अनुकृत्या अनुकरणेन सरलं छलरहितं तस्मिन् । प्राकृतपुरुषो गतानुगतिकोऽत एव सरलप्रकृतिरित्यर्थः । पृथग्जनानां प्राकृतपुरुषाणां सरलचेतसामिति यावत्, चेतसि हृदये संश्रितः सम्यक् परिपाकं प्राप्त अनुराग प्रेम निवसति चिरकालं तिष्ठति, अनुकरणशीलानां सरलमनसां जनानां चेतस्यनुरागश्चिराय स्थरिमाणमावहतीति कवेराशय. । नरपतिहृदये राज्ञश्चेतसि जातमाल्यं सुरभिभरितं यथा स्यात्तथा अनुराग. प्रेम संश्रितो न भवति । यथा सौरभ्यानुसम्पृक्तं पुष्पं क्षणाय कल्पते, अनन्तरञ्च ह्रासमुपैति तद्वत् राज्ञां मनोऽवस्था । यद्वा यथा माल्यं नरपतिहृदये न तिष्ठति, अपि तु हृदयोपर्य्येव, तथैवानुरागो नृपस्य वाच्येव न तु चेतसि । अथ वा नरपतिहृदये जातमाल्यं मलस्य भावो माल्यं जातं माल्यं मलभावो यस्य तद् यथा स्यात्तथा संश्रितोऽनुरागो न निवसति किम्, अपि तु मालिन्यं गतः सन्नेव निवसति राज्ञो ह्यनुरागस्य नैकरसत्वादिति पक्षान्तरम् । दृष्टान्तरेण द्रढयति—पुलिनेषु सिकताप्रदेशेषु तिलस्य तिलोत्पत्तिपदार्थस्य हि निश्चयेन सम्भव उत्पत्तिर्नास्ति । प्राकृतजनास्स्वभावतस्सरला., रामस्तु प्राकृतेतरत्वात्कठिनमना इति वैशिष्ट्यम् ।

कण्डूयनेन गात्रविघर्षणेन किं प्रयोजनं, परिहरणीयः कालातिक्षेप इत्यर्थः । प्रसीदतु गच्छतु भगवानित्युक्ती रामलक्ष्मणयोर्मुनावुपेक्षां राजपदावलेपञ्च व्यनक्ति । तपोवनगतानां तपस्विनामपि दण्डं समाज्ञापयति दण्डं ददाति अयं राम इति

सीता—अहं किं परिशोधयामि।
अहं किं परिसोधेमि।

वा—अपापा भवसि।

सी—(सलज्जम्) जनमध्यगतैवं भणामि—मन्दभागिनी विदेह-
जणमज्झगदा एव्वं, भणामि— मन्दभाइणी विदेह-
राजतनयाऽभिन्नचारित्रेति।
राअतनआ अहिण्णचारित्तेत्ति।

वा—समुद्घुष्यतां विकारानुरूपः प्रतिकार इति।

सी—प्रभवति गुरुनियोगः। (अञ्जलिं बध्वा दिशो विलोक्य) शृण्वन्तु
पहवदि गुरुणिओओ। सुणंतु
भवन्तो लोकपाला गगनमध्यचारिणो देवता गन्धर्वसिद्धविद्या-
भवन्तो लोअपाला गअणमज्झचारिणो देवदाओ गन्धव्वसिद्धविज्झा-
धरा ये च प्रभावप्रत्यक्षीकृतसर्वलोकरहस्या वाल्मीकिविश्वा-
धरा जो अ प्पवाहपच्चक्खीकिदसव्वलोअरहस्सा वम्मीइविस्स-
मित्रवसिष्ठप्रमुखा महर्षयः, एष सकललोकशुभाशुभकर्मसाक्षी
मित्तवसिट्ठप्पमुहा महेसिणो, एसो सअललोअसुहासुहकम्मसक्खी

शेष.। वाल्मीकेर्वीरहस्तेनातिवाहनं दण्डाद्यातिरिच्यते। यद्वा तपोवनगता अपि वयं राज्ञा दण्डयितुं शक्या. किमुत त्वं सहधर्मचारिणीति। तत्परिशोध्यतामात्मा, आत्मा शोधनीयः, शुद्धत्वेन प्रमाणीकर्तव्य इति भाव.।

अहं किं परिशोधयामि, पुरापि मयाऽऽत्माऽग्नौ परिशोधितः, अधुना किं पुन. स्वात्मानं परिशोधयामीत्यर्थः। अपापा भवसि, एवं स्थिते त्वं निष्पापा भविष्यसि। मौनमाश्रितायां त्वयि लोकोऽन्यथा सम्भावयिष्यति,तदेवं स्वात्मनः परिशोधनेनापापात्वसिद्धिरेव तव श्रेयसे भवतु। जनमध्यगता सभामध्यस्थिता एवं भणामि कथयामि। मन्दभागिनी मन्दभाग्या विदेहराजतनया विदेहराजस्य जनकस्य तनया पुत्री सीताहमिति शेषः। अभिन्नचारित्रा न भिन्नं न क्षतं चारित्रं पातिव्रत्यं यस्याः सा। समुद्घुष्यताम् उच्चैः कथ्यताम्। विकारानुरूपः विकारस्य त्यागरूपस्य अनुरूपोऽनुकूलः प्रतिकार उपायः। प्रभवति सर्वसिद्ध गुरुनियोग. गुरोर्वाल्मीकेर्नियोग आज्ञा, यद्वाल्मीकिराज्ञापयति तन्मयाऽवश्यं विधेयम् इत्यर्थ.। लोकपाला इन्द्राद्या अष्टौ। गगनमध्यचारिण अन्तरिक्षचरा. देवताः गन्धर्वसिद्धविद्याधराः, गन्धर्वाश्च सिद्धाश्च विद्याधराश्च ते। प्रभावप्रत्यक्षीकृतसर्वलोकरहस्याः प्रभावेण सिद्धया प्रत्यक्षीकृतं दृष्टं सर्वलोकाना सर्वेषा जनाना रहस्यं मन्त्रणं यैस्ते। वाल्मीकिविश्वामित्रवसिष्ठप्रमुखा. वाल्मीकिः कुशलवयोः सीतायाश्च पालयिता, विश्वामित्रो रामलक्ष्मणयोश्शस्त्रास्त्रगुरुः, वसिष्ठः कुलगुरुः,

भगवान् राघवकुलपितामहः सहस्ररश्मिश्च सीताचारित्रशुद्धि-
भअवं राहवउलपिदामहो सहस्सरस्सि अ सीदा चारित्तसुद्धिं-
मन्तरेणैवं सत्यापयति ।
अन्तरेण एव्वं सच्चावएदि ।

वा—पश्यन्तु भवन्तः महाप्रभावाकृष्टमपि सीतामाहात्म्यसम्भृत-माश्चर्यम् ।

सर्वे—(सविस्मयम्) आश्चर्यमाश्चर्यम् । एष हि देवीवचनस्य समनन्तरं दत्तावधान इव निःशब्दप्रशान्तो निवृत्तसर्वारम्भः कृत्स्न एव स्थावरजङ्गमो लोकः संप्रवृत्तः । तथा हि—

उदन्वन्तः शान्ताः स्तिमिततरकल्लोलवलया
निरारम्भो व्योम्नि प्रकृतिचपलोऽप्येष पवनः ।
प्रवृत्ता चैतस्मिन्निभृततरकर्णा गजघटा
जगत् कृत्स्नं जातं जनकतनयोक्तावविहितम् ॥ २३ ॥

ते प्रमुखा येषा ते तथाभूता महर्षय· महान्त ऋषयः, एष· सकललोकशुभाशुभ-कर्मसाक्षी सकलाना सर्वेषा लोकाना यानि शुभाशुभानि पुण्यापुण्यानि तेषा साक्षी साक्षाद् द्रष्टा, राघवकुलपितामहः राघवकुलस्य पितामहः प्रचालक इत्यर्थ·, सहस्र-रश्मि· सूर्यः, इक्ष्वाकुकुलस्य प्रवर्त्तकत्वात्सूर्यस्य पितामहत्वम् । चारित्रशुद्धिम् अन्तरेण विना सत्यापयति सत्यतां प्रतिपादयति । महाप्रभावाकृष्टम् महाप्रभावाणा महाप्रभाववता देवादीनामाकृष्टमाकर्षणं यस्मात्तत्, सीतामाहात्म्यसम्भृतं सीताया माहात्म्येन गौर-वेण सम्भृतमुपानीतम् आश्चर्यं साद्भुतं कर्म भवन्तः पश्यन्तु विलोकयन्तु ।

एष इति । देवीवचनस्य देव्यास्सीताया वचनं वाक्यं तस्य समनन्तरं पश्चात् दत्तावधानः दत्तम् अवधानं मनस एकाग्र्यं येन स· । निःशब्दप्रशान्तः निश्शब्दः शब्दरहितः अत एव प्रशान्तश्च । निवृत्तसर्वारम्भ· निवृत्तः शान्तः सर्वारम्भः सर्व-व्यापारो यस्य स· । कृत्स्न· सर्वः । स्थावरजङ्गमश्चराचरात्मक· । लोको भूतग्राम· । सम्प्रवृत्त· सञ्जातः । तदेव दर्शयति तथा हीति ।

अ०—उदन्वन्त· स्तिमिततरकल्लोलवलयाः शान्ताः, प्रकृतिचपलः अपि एषः पवनः व्योम्नि निरारम्भ, गजघटा च एतस्मिन् निभृततरकर्णा प्रवृत्ता, जनकतनयोक्तौ कृत्स्नं जगत् अवहितं जातम् ॥ २३ ॥

स०—स्तिमिततरकल्लोलवलयाः—स्तिमिततराः कल्लोलानां वलया येषां ते । प्रकृतिचपलः—प्रकृत्या चपलः । निरारम्भः—निर्गत आरम्भो यस्मात्सः । गजघटा—गजानां घटा । निभृततरकर्णा—निभृततराः कर्णा यस्याः सा । जनक-तनयोक्तौ—जनकस्य तनया जनकतनया तस्या उक्तिस्तत्र ।

उदन्वत्—ocean. स्तिमित—stationary. कल्लोल—billow. वलय—circle. शान्त—unruffled. प्रकृति—nature. चपल—

सी—यदि मया सकललोकमहार्थप्रत्ययापूरितगुरुशासनमुन्मूलित-
जदि मए सअललोअमहत्थप्पच्चआपूरिदगुरुसासणं उम्मूलिअ-
महामहीधरसहस्रविरचितसेतुबन्धविभक्तमहासमुद्रं सुरासुर-
महामहीहरसहस्सविरइदसेदुबन्धविभत्तमहासमुद्दं सुरासुर-
भुवनैकधनुर्धरं राघवकुलनन्दनं त्वामुज्झित्वा पतिव्रताविरुद्धेन
भुवणेक्कधणुद्धरं राहवकुलणंदणं तुमं उज्झिअ पइव्वदाविरुद्धेण
भावेनान्यः कोपि नयनाभ्यां निर्वर्णितः, वचनेनालपितः, हृदयेन
भावेण अण्णो को वि णअणेहिं णिव्वण्णिदो, वअणेण आलविदो, हिअएण

restless. पवन—wind. व्योमन्—sky. निरारम्भ—still without activity. गजघटा—herds of elephants. निभृततर—absolutely motionless. तनया—daughter उक्ति—speech. कृत्स्न—entire. जगत्—world. अवहित—attentive.

टी०—उदन्वन्तः समुद्राः स्तिमिततरकल्लोलवलया· स्तिमिततरा विशेषेण निश्चलाः कल्लोलानामूर्मीणा वलयास्समूहा येषां ते तथाभूता· शान्ता जाता· । प्रकृतिचपलः प्रकृत्या स्वभावेन चपलश्चञ्चलः अपि एष पवनो वायुः व्योम्नि गगने निरारम्भ· निर्गत आरम्भः प्रसरणात्मकं कर्म यस्मात्स तथाभूतः संवृत्त इति शेषः । गजघटा गजाना दन्तावलाना घटा पङ्क्तिः एतस्मिन् सीतायाः शुद्धिनिर्णये निभृततरकर्णा निभृततराऽत्यन्तं स्तिमिताः कर्णा यस्याः सा तथाभूता प्रवृत्ता । जनकतनयोक्तौ जनकस्य तनया जानकी तस्या उक्तिर्वचनं तत्र कृत्स्नं सर्वं जगत् अवहितं दत्तकर्णं जातम् । एतेन लोकाना श्रवणकुतूहलं प्रकटितम् ॥२३॥

सकललोकमहार्थप्रत्ययापूरितगुरुशासनं सकले सर्वस्मिन् लोके भुवने महार्थप्रत्ययेन महाश्वासावर्थप्रत्ययो महार्थप्रत्ययस्तेनापूरितमनुष्ठितं गुरोः पितुर्दशरथस्य शासनं येन तम् । पितुराज्ञाया अलङ्घनीयत्वाल्लोके गौरवं विदितम्, अत एवास्याः पालनं रामेणाचरितमिति भावः । उन्मूलितमहामहीधरसहस्रविरचितसेतुबन्धविभक्तमहासमुद्रम् उन्मूलिता उत्खानिता ये महान्तो महीधराः पर्वतास्तेषां सहस्रेण प्रभूतसङ्ख्यया विरचितो निर्मितो यः सेतुबन्धस्तेन विभक्तो द्विधाकृतो महान् समुद्रो येन तम् । सुरासुरभुवनैकधनुर्धरम् सुराश्च असुराश्च ते सुरासुराः देवदानवाः तेषां भुवने लोके स्वर्गे पाताले च एकं मुख्यं धनुर्धरम्, त्रिलोक्यामद्वितीयं धानुष्कमिति भावः । राघवकुलनन्दनं रघुवंशनन्दयितारं त्वाम् उज्झित्वा विहाय पतिव्रताविरुद्धेन साध्वीभावप्रतिकूलेन भावेन मनसा अन्यः कोपि पुरुषः नयनाभ्यां चक्षुर्भ्यां निर्वर्णितो विलोकितः, वचनेन वाक्येन आलपित आकारितः, हृदयेन मनसा चिन्तितो ध्यातः, एतेन सत्यवचनेन तथ्यवाक्येन सकललोकप्रत्यक्षदृश्यमानदिव्यरूपधारिणी सकलैस्सर्वैर्लोकैर्जनैः प्रत्यक्षं समक्षं दृश्यमानं चक्षुर्विषयीक्रिय-

वा चिन्तितः, एतेन सत्यवचनेन सकललोकप्रत्यक्षदृश्यमान-
वा चिंतिदो एदिणा सच्चवअणेण सअललोअपच्चक्खदीसमाण-
दिव्यरूपधारिणी भगवती महाप्रभावा चित्तशुद्धिं मे लोकस्य
दिव्वरूपधारिणी भअवदी महप्पहावा चित्तशुद्धिं मे लोअस्स
प्रकाशीकरोतु (प्रकटीकरोतु)।
पआसीकरोदु (पअडीकरोदु)।

(सर्वे सम्भ्रम नाटयन्ति)

वा—किमेतदव्यक्तभीषणं लोकस्य रसान्तरमाविर्भूतम्।
नादः पातालमूलात्प्रभवति तुमुलं पूरयन् व्योमरन्ध्रं
पातक्लिष्टा इवैते दिशि दिशि गिरयो मन्दमन्दाश्चरन्ति।

माण दिव्यमलौकिक यद्रूपं तस्य धारिणी भगवती देवी महाप्रभावा मे मम चित्त-शुद्धिं मनसः परिपूर्तिं लोकस्य प्रकाशीकरोतु प्रकटयतु। किमेतदिति। अव्यक्त-भीषणम् अव्यक्तञ्च तद् भीषणमित्यव्यक्तभीषणम्—स्पष्टतयाऽवलोकयितुमशक्य-त्वादव्यक्तम्, अदृष्टपूर्वत्वाद्भीषणम्। रसान्तरं रसा भूमिः, अन्या रसा रसा-न्तरम्, विलोक्यमानात्पृथिव्याकाराद्भिन्नः कश्चिदाकारविशेषो धराया इत्यर्थः। यद्वा अन्यः शृङ्गारादिव्यतिरिक्तो रसो रसान्तरं तत्।

अ०—व्योमरन्ध्रं तुमुलं पूरयन् पातालमूलात् नादः प्रभवति। एते गिरयः पातक्लिष्टाः इव दिशि दिशि मन्दमन्दाः चरन्ति। बद्धानन्दाः लवण-जलधयः वेगात् सीमाम् उल्लङ्घ्य उदनिधिसलिलैः स्वानि वेलावनानि मथ्य-मानाः इव आसन्॥ २४॥

स०—व्योमरन्ध्रम्—व्योम एव रन्ध्रम्। पातालमूलात्—पातालस्य मूलं तस्मात्। पातक्लिष्टा—पातेन क्लिष्टा। बद्धानन्दा—बद्ध आनन्दो यैस्ते। लवण-जलधयः—लवणसहिता जलधयः। उदनिधिसलिलैः—उदनिधेः सलिलम् उदनिधि-सलिलं तैः। वेलावनानि—वेलाया वनं तानि।

व्योमन्—sky. रन्ध्र—vacuum. तुमुलम्—tumultuously. पूरयन्—filling up. पाताल—nether region. नाद noise. गिरि—hill. पात—fall. क्लिष्ट—discomfitted. चरन्ति—move about. बद्धानन्द—over-joyed. लवणजलधि—ocean. & lit. saline waters. वेग—impetuosity. सीमा—boundary line. उल्लङ्घ्य—having transgressed. उदनिधि—ocean. वेला—shore. मथ्यमान–churning.

टी०—व्योमरन्ध्रं व्योम गगनमेव रन्ध्रं छिद्रं तत् तुमुलं गाढं पूरयन् व्याप्नु-वन् पातालमूलात् पातालस्य मूलात्तलात् नादो ध्वनिः प्रभवति जायते। एते समीपवर्त्तिनः पुरतो दृश्यमाना वा गिरयः पर्वताः पातक्लिष्टा इव पातेन पतनेन क्लिष्टाः

बद्धानन्दाः समन्ताल्लवणजलधयो मथ्यमाना इवासन्
सीमामुल्लङ्घ्य वेगादुदनिधिसलिलैः स्वानि वेलावनानि ॥२४॥

सीते ! त्वामुद्दिश्य प्रादुर्भूतानि सर्वलक्षणानि, पुनरप्यावर्ततां सत्यम् ।

सी—("जइ मए सअललोअ" इत्यादि पठति)

(नेपथ्ये)

स्वस्ति गोभ्यः, स्वस्ति ब्राह्मणेभ्यः, स्वस्ति राघवकुलाय ।
आकृष्टा मिथिलाधिराजतनयासत्येन पातालत-
स्तोयान्मज्जनलीलया तनुमिमां हित्वात्मनः स्थावराम्
साक्षाल्लक्षितदिव्यमूर्तिमहिमायोगेन विश्वम्भरा
लोकं मध्यममम्बुराशिरशना देवी समारोहति ॥ २५ ॥

खिन्ना इव दिशि दिशि प्रतिदिशं मन्दमन्दा शनैः शनैश्चरन्ति । गिरीणा पातस्तु भूकम्पजनित एवेति ज्ञेयम् । बद्धानन्दाः बद्धः प्राप्त आनन्दो हर्षो यैस्ते हर्षभरिता इत्यर्थः । लवणजलधयः लवणसमुद्रा वेगात् सीमा मर्यादाम् उल्लङ्घ्यातिक्रम्य उदनिधिसलिलैः समुद्रजलैः निजैरेवेति केचित्, अपरेभ्यः समुद्रेभ्य आगतैरित्यन्ये, स्वानि निजानि वेलावनानि वेलाया तटे यानि वनानि उद्यानानि तानि मथ्यमाना आलोड्यमाना इव आसन् अभूवन् । सीतां सत्यापयितुं प्रादुर्भवन्त्यां धराया महानादः प्रादुरासीत्, गिरयश्चकम्पुः, जलधयस्सीमामुल्लङ्घ्य लवणोदधितीरवर्त्तिभूभागानालोडयामासुः । एतेन भविष्यतोऽद्भुतस्य प्राग्लक्षणानि सूचितानि ॥ २४ ॥

त्वामुद्दिश्य त्वत्कृते तव सतीत्वप्रतिपादनाय सर्वलक्षणानि सर्वाणि चिह्नानि प्रादुर्भूतानि प्रकाशं गतानि। पुनरपि भूयोऽपि सत्यं पथ्यं वच इति शेष, आवर्तताम् पठतु भवतीति शेषः ।

अ०—अम्बुराशिरशना विश्वम्भरा देवी मिथिलाधिराजतनयासत्येन पातालतः आकृष्टा तोयात् मज्जनलीलया इमां स्थावराम् आत्मनः तनुं हित्वा साक्षाल्लक्षितदिव्यमूर्तिमहिमायोगेन मध्यमं लोकं समारोहति ॥ २५ ॥

स०—अम्बुराशिरशना—अम्बुराशिः एव रशना यस्याः सा । मिथिलाधिराजतनयासत्येन—मिथिलाया अधिराजः मिथिलाधिराजः तस्य या तनया तस्याः सत्येन । मज्जनलीलया—मज्जने लीला तया । साक्षाल्लक्षितदिव्यमूर्तिमहिमायोगेन—साक्षात् लक्षिता या दिव्या मूर्त्तिस्तस्या यो महिमा तस्य योगेन ।

अम्बुराशि—ocean, lit. the reservoir of water. **रशना**—girdle. **विश्वम्भरा**—earth. **पाताल**—nether region. **आकृष्ट**—pulled up. **तोय**—water, **मज्जनलीला**—sportive duckings in

सर्वे—(आकर्ण्य विस्मयं नाटयन्ति)

वा—कथमदृष्टपूर्वोऽश्रुतपूर्वेयमाश्चर्यपरम्परावृत्तिः ।

एतज्ज्योतिरुदेति नागभवनात्संवासयन्तश्चिरा-
न्माल्यैः शीतलपद्मगन्धिसुभगाः पातालवाता दिशः ।
एषाविर्भवति क्रमेण वसुधा राजन्! दधानाञ्जलिं
सौमित्रे! प्रणमादरात् कुशलवौ! पुष्पाञ्जलिः कीर्यताम् ॥२६॥

water. स्थावर—immovable. तनु—body. हित्वा—having cast off. साक्षात्—obviously. लक्षित—revealed. दिव्यमूर्ति—divine form. महिमा—magnanimity. समारोहति—ascends.

टी०—अम्बुराशिरशना अम्बुराशिः समुद्र एव रशना काञ्ची यस्याः सा विश्वम्भरा पृथिवी देवी मिथिलाधिराजतनयासत्येन मिथिलाया अधिराजोऽधीश्वरस्तस्य या तनया पुत्री तस्याः सत्येन सत्यवाक्येन पातालतो रसातलात् आकृष्टा बलादानीता तोयात् सलिलात् मज्जनलीलया स्नानव्याजेन इमाम् आत्मनः स्वस्य स्थावरां जडां नदीनदवृक्षाद्यनेकपदार्थकलापोपेतामिति यावत्, तनुं शरीरं हित्वा विसृज्य साक्षाल्लक्षितदिव्यमूर्तिमहिमायोगेन साक्षात् प्रत्यक्षं लक्षिता नयनविषयीकृता जनैरिति भावः या दिव्या मूर्तिस्तनुस्तस्या यो महिमा महत्वं तस्य योगेन मध्यमं लोकं भूलोकं समारोहति। आधिभौतिकीं तनुं विहायाधिदैविकीं मूर्तिमाश्रित्य वसुन्धराऽधोलोकादिमं भूलोकमुपैतीति निष्कर्षः ॥ २५ ॥

अ०—नागभवनात् एतत् ज्योतिः उदेति, माल्यैः शीतलपद्मगन्धिसुभगाः पातालवाताः चिरात् दिशः संवासयन्तः (वान्ति), राजन्! अञ्जलिं दधाना एषा वसुधा क्रमेण आविर्भवति, सौमित्रे! आदरात् प्रणम, कुशलवौ! पुष्पाञ्जलिः कीर्यताम् ॥ २६ ॥

स०—नागभवनात् - नागानां भवनं तस्मात्। शीतलपद्मगन्धिसुभगाः—शीतलानां पद्मानां गन्धो येषु ते च सुभगाः च ते। पातालवाताः—पातालस्य वाताः। कुशलवौ—कुशश्च लवश्च तौ। पुष्पाञ्जलिः—पुष्पाणाम् अञ्जलिः।

नागभवन—abode of the Nagas. ज्योतिष्—light. उदेति—emanates. माल्य—garland. शीतल—cool. पद्म—lotus. सुभग—pleasant. पाताल—nether region. वात—wind. चिरात्—since long. संवासयत्—perfuming. अञ्जलि—folded hands. वसुधा—earth. क्रमेण—gradually. आविर्भवति—appears. आदर—reverence. पुष्पाञ्जलि—handful of flowers.

टी०—नागभवनात् नागानां सर्पाणां भवनं वसतिस्तस्मात् पातालादिति यावत्। एतत् पुरतो विलोक्यमानं ज्योतिस्तेजः उदेति उद्गच्छति। अधोलोका-

सर्वे—(यथोक्तं नाटयन्ति)

(ततः प्रविशति पातालोद्भेदं नाटयन्ती पुष्पवर्षाभिर्नारीभि सह समानोदात्तोज्ज्वलवेषाभिश्च पृथ्वी)

सर्वे—(कृताञ्जलय)

त्वं बिभर्षि जगत् कृत्स्नं शेषमूर्ध्ना त्वमुह्यसे ।
काम्यानभिमतान् देवास्त्वामेव दुदुहुः पुरा ॥ २७ ॥
उन्नतौ विन्ध्यकैलासौ तव देवि ! पयोधरौ ।
जाह्नवी हारयष्टिस्ते समुद्रा रत्नमेखलाः ॥ २८

दुद्गच्छन्ती रसा तेजोरूपेण लक्ष्यते। माल्यै. स्रग्भि. शीतलपद्मगन्धिसुभगाः शीतलाना शिशिराणा जलसम्पर्कात्, स्वभावतो वा, पद्माना कमलाना गन्धो विद्यते येषु ते च सुभगाश्च प्रियाश्च ते तथाभूता पातालवाताः पातालस्य रसातलस्य वाता पवना· चिरात् चिरकालाय दिश· काष्ठा· संवासयन्तो गन्धयुक्ता· कुर्वन्त· प्रसरन्तीति शेष । राजन् नृप ! अञ्जलिं दधाना साञ्जलि· एषा वसुधा पृथिवी क्रमेण आविर्भवति प्रकटीभवति । सौमित्रे लक्ष्मण ! आदरात् सम्मानपूर्वकं प्रणम नमस्कुरु एना पृथिवीमिति शेष· । कुशलवाविति सम्बोधनम् । पुष्पाणा कुसुमानाम् अञ्जलिः करपुटयुगपरिमितकुसुमचय कार्यता प्रक्षिप्यताम्, वसुधा प्रति पुष्पवर्षा विधेयेति भाव· ॥ २६ ॥

पातालोद्भेदम् पातालस्य नागलोकस्य उद्भेदं प्रस्फोटम् । समानोदात्तोज्ज्वल वेषाभिः समानः सदृश उदात्त उज्ज्वल शुद्धश्च वेषो यासा ताभि ।

अ०—त्वं कृत्स्नं जगत् बिभर्षि, त्वं शेषमूर्ध्ना उह्यसे, पुरा देवाः अभिमतान् काम्यान् त्वाम् एव दुदुहुः ॥ २७ ॥

स०—शेषमूर्ध्ना—शेषस्य मूर्धा तेन ।

कृत्स्न—entire. **जगत्**—world. **बिभर्षि**—sustain. **मूर्धन्**—forehead. **पुरा**—formerly. **अभिमत**—desired. **काम्य**—desired object or necessity.

टी०—हे देवि वसुन्धरे त्वं कृत्स्नम् अखिलं जगत् लोकं बिभर्षि धारयसि । त्वं शेषमूर्ध्ना शेषस्य भोगिराजः मूर्ध्ना शिरसा उह्यसे धार्यसे । पुरा देवा इन्द्राद्याः अभिमतान् अभीष्टान् काम्यान् भोगान् भोग्यवस्तूनीत्यर्थ·, त्वाम् एव दुदुहुः दुग्धवन्तः, दुहेर्द्विकर्मत्वम् ॥ २७ ॥

अ०—देवि ! उन्नतौ विन्ध्यकैलासौ तव पयोधरौ (स्तः) । जाह्नवी ते हारयष्टिः (अस्ति) । समुद्राः रत्नमेखलाः (सन्ति) ॥ २८ ॥

स०—विन्ध्यकैलासौ—विन्ध्यश्च कैलासश्च तौ । रत्नमेखला·—रत्नैर्निबद्धा मेखलाः ।

यज्ञाङ्गानां समुत्पत्त्यै वासवस्त्वां प्रवर्षति ।
रत्नानामोषधीनां च त्वां प्रसूतिं प्रचक्षते ॥ २६ ॥

नमो भगवत्यै विश्वम्भरायै । (प्रणमन्ति)

पृथ्वी—[दिशो विलोक्य] अहो ! अनतिक्रमणीयं शासनं प्रतिनिवृत्तानां पतिव्रतानाम् ।

व्याप्य द्यावापृथिव्यौ प्रतिहतगतयो यत्र भानोर्मयूखाः
गाम्भीर्यात्क्षीणवेगो नियमयति गतिं यच्च वोढुं गरुत्मान् ।
यत् स्थानं विप्रकर्षात् परिमिततपसां योगिनामप्यगम्यं
तस्मादाकृष्य साहं जनकतनयया दूरमारोपितास्मि ॥ ३० ॥

देवि—goddess. पयोधर—breast हारयष्टि—necklace. रत्नमेखला—girdle studded with gems.

टी०—देवि ! उन्नतौ तुङ्गौ उच्छ्रिताविति यावत्, विन्ध्यकैलासौ विन्ध्यश्च कैलासश्च तौ तव पयोधरौ स्तनौ स्तः । जाह्नवी जह्नो राजर्षेरपत्यं गङ्गा ते हारयष्टिः माला अस्ति। समुद्रा जलधयः रत्नमेखला. रत्नैर्निबद्धा मेखलाः काञ्च्यः सन्ति॥२८॥

अ०—वासवः यज्ञाङ्गानां समुत्पत्त्यै त्वां प्रवर्षति। रत्नानाम् ओषधीनां च त्वाम् प्रसूतिं प्रचक्षते ॥ २६ ॥

स०—यज्ञाङ्गानाम्—यज्ञस्य अङ्गानि तेषाम् ।

वासव—Indra. समुत्पत्ति—production. यज्ञाङ्ग—materials of sacrifice. प्रवर्षति—rains over. रत्न—gem. ओषधि—the medicinal herb. प्रसूति—source.

टी०—वासव इन्द्रः यज्ञाङ्गाना यज्ञस्येष्टेर्यान्यङ्गानि साधनानि उपकरणजातमिति यावत् तेषा समुतपत्त्यै जननाय त्वां प्रवर्षति सिञ्चति । रत्नानां मणीनाम् ओषधीना च त्वा वसुन्धरा प्रसूतिं प्रभवक्षेत्रं प्रचक्षते कथयन्ति ऋषय इति शेषः॥२६॥

अहो इति । अनतिक्रमणीयम् अनुल्लङ्घनीयम् । शासनम् आज्ञा । प्रतिनिवृत्तानां भर्तृगृहमायातानाम् ।

अ०—द्यावापृथिव्यौ व्याप्य भानोः मयूखाः यत्र प्रतिहतगतयः, गाम्भीर्यात्क्षीणवेगः गरुत्मान् यत् च वोढुं गतिं नियमयति, परिमिततपसां योगिनाम् अपि यत् स्थानं विप्रकर्षात् अगम्यम्, तस्मात् आकृष्य जनकतनयया सा अहं दूरम् आरोपिता अस्मि ॥ ३० ॥

स०—द्यावापृथिव्यौ—द्यौः च पृथिवी च तौ । प्रतिहतगतयः प्रतिहता गतिर्येषां ते । गाम्भीर्यात्क्षीणवेग.—गाम्भीर्येण न क्षीणः वेग· यस्य सः । परिमिततपसाम्—परिमितं तपो येषां तेषाम् । जनकतनयया जनकस्य तनया तया ।

तत्तामेवाभिभाषिष्ये । वत्से मैथिलि ! कर्त्तव्यतां केनार्थयसि ?

सीता—(सविस्मयं विलोक्य) भगवति ! का त्वम् ?

भअवदि ! का तुमं ?

पृथ्वी—किं न मां वेत्ति भवती ?

मामामनन्ति मुनयः प्रणवद्वितीयां
मत्तः प्रसूतिरखिलस्य चराचरस्य ।
मय्येव सिद्ध्यति तपोऽवनिदेवतां त्वं
जानीहि जानकि ! तवान्तिकमागतां माम् ॥ ३१ ॥

द्यावापृथिव्यौ—heaven and earth. व्याप्य—pervading भानु—sun. मयूख—ray. प्रतिहत—obstructed. गति—passage. गाम्भीर्य—depth. अक्षीण—unchecked. वेग—impetuosity. वोढुम्—to carry. गति—gait. नियमयति—slackens. परिमित—limited. तपस—austerity. विप्रकर्ष—remoteness. अगम्य—inaccessible. आकृष्य—pulling, having pulled.

टी०—द्यौश्च पृथिवी च द्यावापृथिव्यौ रोदसी व्याप्य वेष्टयित्वा भानोः रवेः मयूखा अंशव· यत्र यस्मिन् प्रदेशे प्रतिहतगतय प्रतिहता संरुद्धा गतिर्गमनं येषां ते निरुद्धसञ्चारा भवन्ति, यत्र लोके भगवान् सहस्ररश्मिरपि संरुद्धगतिरस्ति, गाम्भीर्याक्षीणवेग· गाम्भीर्येण अक्षीणो न क्षीण· न नष्ट वेगो यस्य स·गरुत्मान् गरुडः यत् स्थानं वोढुं नेतुं हरिमिति शेष· गतिं वेगं नियमयति । परिमिततपसा परिमितं लघु तपो येषा तथाभूताना योगिनाम् अपि यत् स्थानं विप्रकर्षात् असान्निध्यात् अगम्यम् गन्तुम् अशक्यम्, तस्मात् स्थानात् आकृष्य रभसा गृहीत्वा सा अहं जनकतनयया सीतया दूरम् आरोपिता आनीता अस्मि । एतेन सीतायाः सतीत्वप्रभावो दर्शितः ॥ ३० ॥

मैथिलि जानकि ! कर्त्तव्यता केनार्थयसि किं ते कार्यमस्ति यदर्थमहमत्राहूतेति वसुन्धराया अभिप्रायः ।

अ०—मुनयः मां प्रणवद्वितीयाम् आमनन्ति, अखिलस्य चराचरस्य मत्तः प्रसूतिः, मयि एव तपः सिद्ध्यति, जानकि ! तव अन्तिकम् आगतां माम् अवनिदेवतां त्वं जानीहि ॥ ३१ ॥

स०—प्रणवद्वितीयाम्—प्रणवः द्वितीयो यस्यास्ताम् ।

प्रणव—the sacred syllable om. आमनन्ति—regard. अखिल—entire. चराचर—animate or inanimate creation. प्रसूति—generation, birth. सिद्ध्यति—fructifies. अन्तिकम्—near. अवनि—earth. देवता—the presiding deity. जानीहि—know.

अपि च वत्से ! ज्ञायतामिदमपि—

अभ्युद्धृतिश्च सहसा ममैवेयमनुष्ठिता ।
पुरा महावराहेण त्वत्प्रभावेन साम्प्रतम् ॥ ३२ ॥

सीता—(अञ्जलिं बध्वा) भगवति ! अनुकम्पामध्यास्य यथा त्वयैवं
भअवदि ! अणुकम्पं अज्झासिअ जह तुए एव्वं
चारित्राविकलत्वेनाभिलक्षिता तथा लोकस्य प्रकाश्यताम् ।
चारित्तविकलत्तणेण अहिलक्खिदा तह लोअस्स पआसीअदु ।

पृथ्वी—तथास्तु । (समन्तादवलोक्य)

ऋषयो दानवाः सिद्धा यक्षगन्धर्वकिन्नराः ।
मानवा लोकपालाश्च भवन्त्ववहिताः क्षणम् ॥ ३३ ॥

टी०—मुनय महर्षय. मा प्रणवद्वितीया प्रणव ओङ्कारो द्वितीयो यस्या ताम् आमनन्ति कथयन्ति; पृथिव्याश्शक्तिरूपत्वादोङ्कारस्य शिवरूपत्वाच्च शिवशक्त्यो-रभेदान्वयेन साहचर्य्यमुक्तम् इति केचित् । अखिलस्य सर्वस्य चराचरस्य स्थावरजङ्गमरूपस्य जगतो मत्तो मत्सकाशादेव प्रसूतिरुत्पत्ति., तपो योगादिकं मय्येव सिद्ध्यति फलति, पृथिव्या आश्रयत्वादिति भाव.। हे जानकि सीते तव अन्तिकं समीपम् आगताम् आयाताम् अवनिदेवता भगवतीं पृथिवीं त्वं जानीहि मन्यस्व ॥ ३१ ॥

अ०—इयं मम अभ्युद्धृतिः पुरा महावराहेण साम्प्रतं त्वत्प्रभावेन च सहसा अनुष्ठिता ॥ ३२ ॥

अभ्युद्धृति—deliverance महावराह—the Great Boar. (Viṣnu) साम्प्रतम्—now. प्रभाव—supernatural power. सहसा—suddenly. अनुष्ठिता—accomplished.

टी०—इयं मम अभ्युद्धृतिः अभ्युद्धरणं पुरा पुराणे कल्पे महावराहेण महांश्चासौ वराहो महावराहो वराहावतारो विष्णुस्तेन, साम्प्रतम् अधुना त्वत्प्रभावेन तव पुण्यचारित्र्येणेत्यर्थः, सहसा अविलम्बितम् अनुष्ठिता विहिता ॥ ३२ ॥

टी०—अनुकम्पां दयाम् । अध्यास्य आश्रित्य । चारित्राविकलत्वेन चारित्रस्य अविकलत्वम् अविपर्यासस्तेन । अभिलक्षिता विलोकिता ।

अ०—ऋषयः दानवाः सिद्धा. यक्षगन्धर्वकिन्नराः मानवाः लोकपालाः च क्षणात् अवहिताः भवन्तु ॥ ३३ ॥

स०—यक्षगन्धर्वकिन्नरा.—यक्षाश्च गन्धर्वाश्च किन्नराश्च ते ।

दानव—demon. लोकपाल—guardian of the quarter. क्षणात्—for a while. अवहित—attentive.

रामं दाशरथिं मुक्त्वा न जातु पुरुषान्तरम् ।
मनसापि गता सीतेत्येवं विदितमस्तु वः ॥ ३४ ॥

(आकाशात्पुष्पवृष्टि दुन्दुभिध्वनयश्च)

सर्वे—(सहर्षम्) अहो विस्मयः । वसुन्धरासम्पादितशुद्धिमनुवर्तयन्ति बहुविधान्येतानि प्रादुर्भवन्ति—

आशामुखे त्रिदशदुन्दुभयो ध्वनन्ति
व्योम्नः पतन्ति कुसुमानि निरन्तराणि ।
आकस्मिकोऽप्युपरि धार्यत एव देव्याः
केनाप्यवध्यवितते गगने वितानः ॥ ३५ ॥

टी०—ऋषयः वाल्मीकिप्रभृतयः, दानवा दैत्याः शुक्रादयः, सिद्धा यक्षगन्धर्वकिन्नरा देवयोनिविशेषाः, मानवा मनुष्याः, लोकपाला इन्द्रादयोऽष्टौ दिशा रक्षितारः क्षणं क्षणमात्रम् अवहिताः सावधाना भवन्तु ॥ ३३ ॥

अ०—सीता दाशरथिं रामं मुक्त्वा जातु मनसा अपि पुरुषान्तरं न गता इति एवं वः विदितम् अस्तु ॥ ३४ ॥

मुक्त्वा—leaving aside, with the exception of. अन्तर—other. विदित—known.

टी०—सीता जनकतनया दाशरथिं दशरथस्यापत्यं पुमान् दाशरथिस्तं रामं मुक्त्वा विहाय जातु कदाचित् मनसा अपि हृदयेनापि किमु शरीरेण पुरुषान्तरम् अन्यं पुरुषं न गता इति वः युष्माकं विदितं ज्ञातम् अस्तु ॥ ३४ ॥

वसुन्धरासम्पादितशुद्धिम्—वसुन्धरया पृथिव्या सम्पादिता अनुष्ठिता शुद्धिर्यस्यास्ता सीताम् एतानि प्रादुर्भवन्ति प्रकटीभवन्ति दिव्यानीति शेषः अनुवर्तयन्ति अनुमोदयन्ति । अत्र प्रादुर्भवन्तीति शत्रन्तं क्लीबे रूपम् ।

अ०—आशामुखे त्रिदशदुन्दुभयः ध्वनन्ति, व्योम्नः निरन्तराणि कुसुमानि, पतन्ति, आकस्मिकः अपि वितानः अवध्यवितते गगने देव्याः उपरि केनापि धार्यते एव ॥ ३५ ॥

स०—आशामुखे—आशाना मुखं तस्मिन् । त्रिदशदुन्दुभयः—त्रिदशाना दुन्दुभयः । अवध्यवितते—अवध्यश्च तद्वितत तस्मिन् ।

आशामुख—the intermediate region. त्रिदश—the gods. दुन्दुभि—drum. ध्वनन्ति—produce sounds. व्योमन्—sky. निरन्तर—continuous. कुसुम—flower. आकस्मिक—incidental. वितान—canopy. अवध्य—unchecked. वितत—spread. गगन—sky. धार्यते—is held.

टी०—आशानां दिशा मुखे सर्वासु काष्ठासु त्रिदशदुन्दुभयः त्रिदशाना देवा-

(नेपथ्ये)

जयति दशरथः स सत्यसन्धो
जयति तथैकधनुर्धरश्च रामः
जयति रघुकुलं कलङ्कमुक्तं
जयति चरित्रगुणोन्नता च देवी ॥३६॥

पृथ्वी—अपि शुद्धिमती वैदेही ?

सर्वे—(कृताञ्जलय)

या स्वयं प्रकृतिनिर्मला सती
छाद्यतेऽन्यजनवादवारिदैः ।

ना दुन्दुभयो वाद्यविशेषा ध्वनन्ति स्वनन्ति । व्योम्न आकाशात् निरन्तराणि सन्ततानि कुसुमानि पुष्पाणि पतन्ति । अवध्यम् अप्रतिहतं च तद् विततं विस्तृतं तस्मिन् गगने आकाशे आकस्मिक. अकस्मादकारणमेव सञ्जातः वितानः उल्लोचः देव्याः सीताया उपरि केनापि धार्यते । एतेन सीताया अलौकिकप्रभावशालित्वं दर्शितम्भवति ।। ३५ ॥

अ०—स. सत्यसन्धः दशरथः जयति, तथा एकधनुर्धरः रामः च जयति, कलङ्कमुक्तं रघुकुलं जयति, चरित्रगुणोन्नता देवी च जयति ॥ ३६ ॥

स०—सत्यसन्ध.—सत्या सन्धा यस्य सः । एकधनुर्धरः—एकस्य धनुषः धरः । रघुकुलम्—रघो. कुलम् । कलङ्कमुक्तम्—कलङ्कात् मुक्तम् । चरित्रगुणोन्नता—चरित्रगुणैः उन्नता ।

सन्धा—promise. **धनुर्धर**—archer. **कलङ्क**—ignomy. **मुक्त**-purged. **चरित्र**—character. **उन्नत**—elevated.

टी०—सः सत्यसन्धः सत्यप्रतिज्ञः दशरथः जयति वर्धते । एकधनुर्धरः एकस्य अद्वितीयस्य धनुष. धरो धारयिता रामश्च जयति । कलङ्कमुक्तं लोकापवाद-वर्जितं रघुकुलं रघुवंश. जयति, चरित्रगुणोन्नता चरित्रस्य सच्चरितस्य गुणैः उन्नता उत्कर्षं गता देवी सीता च जयति ॥ ३६ ॥

अ०—या स्वयं प्रकृतिनिर्मला सती अन्यजनवादवारिदै. छाद्यते, भगवति ! सा जानकी अद्य त्वया शरदा चन्द्रिका इव विशोधिता ॥ ३७ ॥

स०—प्रकृतिनिर्मला—प्रकृत्या निर्मला । अन्यजनवादवारिदैः—अन्ये च ते जना अन्यजनास्तेषां वादा एव वारिदास्तैः ।

प्रकृति—nature. **निर्मल**—pure. **जनवाद**—public scandal. **वारिद**—cloud. **छाद्यते(स्म)**—was muffled. **शरत्**—autumn. **चन्द्रिका**—moonlight. **विशोधित**—purified.

टी०—या जानकी स्वयं प्रकृतिनिर्मला प्रकृत्या स्वभावत. निर्मला शुद्धा

जानकी भगवति! त्वयाद्य सा
चन्द्रिकेव शरदा विशोधिता ॥ ३७ ॥ (प्रणमन्ति)
अपि नामाश्चर्यं मिथुनं भूयः संयुज्यत !

वा—भो भोः कौसल्यामातः! सम्भाव्यतां सीता परिशुद्धि परिग्रहेण।

रामः—यदाज्ञापयन्ति गुरवः। वत्स लक्ष्मण! क्रियतां पादप्रणामः।

सीता—[अञ्जलिं बध्वा सहर्षम्] जयत्वार्यपुत्रः।
जेदु अंअउत्तो।

वा—अहो! उदात्तशालीनः प्रतिग्रहप्रकारः।

लक्ष्म—[सहर्षं सलज्जं च] आर्ये! वध्यः पातकी लक्ष्मणः प्रणमति।

सीता—कुतस्त्वयाऽऽत्मा निन्द्यते, एवमात्मगुरुनियोगवर्ती
कीस तुए अप्पा णिदिअदि, एव्वं अप्पगुरुणिओअवट्टी
चिरं जीव।
चिरं जीव।

वा—वत्स राम, अनेन गृहीता वैदेही। स्वयमाभाष्य पाणिना पाणौ सङ्गृह्य नियुज्यतां यज्ञाधिकारे।

रामः—(लज्जा नाटयति)

वा—अलं लज्जया, यज्ञाङ्गं विना किं वाऽपूर्वं दाशरथेः सर्वसाक्षिकं पाणिग्रहणमिति?

अपीति शेषः, अन्त्यजनवादवारिदैः अन्त्यजनानां प्राकृतपुरुषाणां वादा अपवादा एव वारिदा मेघास्तैः छाद्यते निह्नूयते स्म, भगवति! पूज्ये वसुमति! सा जानकी अद्य त्वया शरदा शरदृतुना चन्द्रिका ज्योत्स्ना इव विशोधिता मलशून्यता प्रकटिता। यथा च चन्द्रिका निसर्गशुद्धापि मेघादिभिः प्राव्रियते शरदि च नभसः प्रसन्नतया नैर्मल्यं याति, तथैव प्रकृतिनिर्मलापि जनकतनया प्राकृतपुरुषापवाददोषकलुषिताभूत्, इदानीन्तु त्वया तद्दोषापनयनेन विशुद्धिं प्रकाशितेति तत्त्वम् ॥३७॥

टी०—कौसल्यामातः कौसल्या माता यस्य सः तत्सम्बुद्धौ, हे रामेत्यर्थः। प्रतिग्रहप्रकारः प्रतिग्रहस्य आदानस्य परित्यक्तायाः सीतायाः पुनर्ग्रहणस्य प्रकारो रीतिः उदात्तशालीनः लोकातिशायित्वेन वर्तते। वध्यो हन्तुं योग्यः। आत्मगुरुनियोगवर्ती आत्मनो यो गुरुस्तस्य नियोगवर्ती आज्ञोद्वहः। अथ लज्जात्यागाय रामं प्रेरयन् वाल्मीकिराह—अलं लज्जयेति। यज्ञाङ्गं विना अश्वमेधयज्ञमन्तरेण दाशरथेः रामस्य सर्वसाक्षिकं सर्वजनसमक्षं पाणिग्रहणं पाणिपीडनं किम् अपूर्वम् आश्चर्यजनकं, नैवेत्यर्थः। अत्रायमभिसन्धि—सीतापरित्यागानन्तरं यज्ञे हिरण्मय्याः सीताया एव रामसाहचर्य्यं प्रसिद्धं तद्धि रामस्यापूर्वं पाणिग्रहणमभूत्, यज्ञं विना

रामः—समाचारोऽयं गुरुनियोगश्च (सीतां पाणौ गृहीत्वा) भद्रे वैदेहि !

अपत्यमिष्टं च वदन्ति देवाः फलद्वयं दारपरिग्रहस्य ।
पूर्वं तयोस्त्वय्युदपादि हृद्यं वहस्व वासे भवने द्वितीयम् ॥ ३८ ॥

सीता—यदार्यपुत्र आज्ञापयति। उच्छ्वसितो मे आत्मा । प्रत्यागता
जं अज्जउत्तो आणवेदि । उच्छसिओ मे अप्पा । पच्छागदा
मे प्राणाः ।
मे पाणा ।

पृथ्वी—अविघ्नमस्तु यज्ञानां काले वर्षतु वासवः ।
निरातङ्का प्रजाः सन्तु सीतारामसमागमात् ॥ ३९ ॥

तु न क्वचिदपि रामस्य सीताया पाणिपीडनेऽपूर्वत्वम्, तदित्थमधुना सर्वसाक्षिकं सीताहस्तावलम्बनं नाश्चर्यायेति। समाचार सदाचारः, असति दोषे स्त्रीत्यागस्याप्रशस्तत्वात्। गुरुनियोगश्च गुरोर्वाल्मीकेर्नियोग आज्ञा च, आज्ञा गुरूणामविलङ्घनीयेत्युक्तेः।

अ०—देवाः अपत्यम् इष्टं च दारपरिग्रहस्य फलद्वयं वदन्ति । तयो पूर्वं त्वयि हृद्यम् उदपादि, भवने वासे द्वितीयं वहस्व ॥ ३८ ॥

स०—दारपरिग्रहस्य—दाराणा परिग्रहस्तस्य ।

अपत्य—progeny. **इष्ट**—sacrifice. **दारपरिग्रह**—marriage. **हृद्य**—the cherished one. **भवन**—palace.

टी०—देवा मनीषिण अपत्यं सन्ततिम् इष्टं यज्ञं च दारपरिग्रहस्य दाराणां स्त्रीणा परिग्रहस्य ग्रहणस्य फलद्वयं द्वे फले वदन्ति, गृहस्थाना कृते यज्ञयागादिकं कर्म विहितं तत्र स्त्रीरहितस्यानधिकाराद्दारपरिग्रहस्येज्याप्यन्यतमं फलम्। तत्रोभययो तयो फलयो. पूर्वम् अपत्यं कुशलवरूपं हृद्यं रमणीयम् उदपादि उत्पन्नम्, भवने गृहे वासे सति द्वितीयं फलं यागाख्यं वहस्व प्राप्नुहि ॥ ३८ ॥

अ०—यज्ञानाम् अविघ्नम् अस्तु, वासवः काले वर्षतु, सीतारामसमागमात् प्रजाः निरातङ्काः सन्तु ॥ ३९ ॥

स०—सीतारामसमागमात्—सीता च रामश्चेति सीतारामौ तयोः समागमस्तस्मात् ।

अविघ्न—absence of impediment. **वासव**—Indra. **वर्षतु**—shower rain. **काल**—opportune moment. **निरातङ्क**—without distress.

टी०—यज्ञानां यागानाम् अविघ्नं विघ्नाभावः अस्तु, निष्प्रत्यूहं यागादिक्रियाकलापोऽनुष्ठितः स्यात्, वासव इन्द्र काले ईप्सिते समये वर्षतु मेघैस्सलिलं क्षिपतु। एतत्समानार्थका श्रुतिर्यथा-'निकामे निकामे नः पर्जन्यो वर्षतु' तथा नागानन्देऽपि-

(अन्तर्धानं नाटयन्ती निष्क्रान्ता)

रामः—कथमन्तर्भूता वसुमती !

वा—अनतिदीर्घसन्निधाना हि देवताः।

रामः—भगवताहमप्यनुज्ञातो लक्ष्मणमभिषेक्तुमिच्छामि।

लक्ष्म—(अञ्जलिं बध्वा) यदि प्रसन्नमार्येण, तेन तनयसङ्क्रामिणा युवराजशब्देन विभज्यतां चिरकालानुचरः सौमित्रिः।

वा—इक्ष्वाकुकुलसदृशमभिहितम्।

रामः—का गतिः, अनतिक्रान्तैव रामेण लक्ष्मणप्रार्थना। अवश्यं चेदिदं कर्म वत्सस्य, तदहमेव तत्प्रतिपत्स्ये। सौमित्रे! आनीयतामभिषेकसम्भारः।

लक्ष्म—आर्य, सम्पादितं सर्वमभिषेकसमयोचितं व्यग्रहस्ताभिर्देवताभिः। पश्य—

एतच्छत्रं वहति भगवान् वासवश्चन्द्रगौरं
देवी वालव्यजनयुगलं जह्नुकन्या शची च।

'वृष्टिं हृष्टशिखण्डिताण्डवकृते मुञ्चन्तु काले घनाः'। सीतारामसमागमात् चिरविरहानन्तरं दम्पत्योर्मिथःसंश्लेषात् प्रजाः निरातङ्का निर्भयाः सन्तु, न च सीतादूषकैर्जनैरधुना सीतारामसमागमाद् भेतव्यम् इत्यर्थः ॥ ३६ ॥

टी०—अन्तर्भूता तिरोहिता। अनतिदीर्घसन्निधाना न अतिदीर्घं नातिचिराय सन्निधानं समीपावस्थितिर्येषां ते। देवता हि नातिदीर्घकालं पुरुषसन्निधौ तिष्ठन्ति, एतेन वसुमती सद्य एव तिरोहितेत्यत्र नाश्चर्यम्। तनयसङ्क्रामिणा तनये पुत्रे कुशे इत्यर्थः सङ्क्रामिणा सङ्क्रमणभाजा युवराजशब्देन युवराजपदेन चिरकालानुचरः चिराय अनुचरः सेवकः सौमित्रिः लक्ष्मण विभज्यतां पृथक्क्रियताम्। सीतातनयाज्ञानाद् योऽयं युवराजशब्दो मय्यारूढः सोऽधुना कुशस्योपस्थित्या तस्मिन् सङ्क्रामणीयः, कुशः साम्प्रतं यौवराज्येऽभिषेक्तव्य इत्यर्थः। इक्ष्वाकुकुलसदृशम् इक्ष्वाकुवंशानुरूपम् अभिहितम् उक्तम्। सति तनये नास्ति भ्रातुर्युवराजपदाधिकारः, नहि कुलीना अन्याधिकारमादातुमिच्छन्ति, तत्रापि विशेषत इक्ष्वाकुवंशोत्पन्ना इति वाल्मीकेरभिप्रायः। अनतिक्रान्ता नोल्लङ्घिता। अवश्यं चेदिदं कर्म वत्सस्य लक्ष्मणस्य कर्तव्यमिति शेषः, प्रतिपत्स्ये करिष्ये। रामेण तु कुशः साम्राज्ये नियुक्तो लवश्च यौवराज्येऽभिषिक्त इत्यग्रे स्फुटम्। आनीयताम् अत्र प्राप्यताम्। अभिषेकसम्भारः अभिषेकाय राज्योचिताभिषवाय सम्भार उपकरणानि। व्यग्रहस्ताभिः कार्यनिपुणाभिः।

अ०—भगवान् वासवः एतत् चन्द्रगौरं छत्रं वहति। देवी जह्नुकन्या शची च वालव्यजनयुगलं वहतः। प्रजौघाः अम्भोगर्भान् कनककलशान् धारयन्ति। तद्विधानां सम्पदः प्रणयसुलभाः एतत् चित्रं न ॥ ४० ॥

अम्भोगर्भान् कनककलशान् धारयन्ति प्रजौघा-
श्चित्रं नैतत् प्रणयसुलभाः सम्पदस्तद्विधानाम् ॥ ४० ॥

रामः—आवयोस्तर्हि वेत्राधिकारः।

लक्ष्म—अनुगृहीताभियोगः संविभागः।

रामः—लक्ष्मण, वेत्रं धारय। (वाल्मीकिमुद्दिश्य) भगवन्नभिषिच्यतां नप्ता।——

वा—(कलशमादायोपसर्पन्) भो भोः साकेतनिवासिनः पौराः! नानादिगन्तवासिनो राजानः! विभीषणसुग्रीवहनुमत्प्रभृतयो महारथाः! शृण्वन्तु भवन्तः—

मैथिलीतनयः श्रेष्ठः कुशो नाम महारथः।
अभिषिक्तोऽद्य साम्राज्ये मान्यतामस्य शासनम् ॥ ४१ ॥

स०—चन्द्रगौरम्—चन्द्र इव गौरम्। जह्नुकन्या—जह्नोः कन्या। वालव्यजनयुगलम्—वालव्यजनस्य युगलम्। प्रजौघा—प्रजानाम् ओघाः। अम्भोगर्भान्—अम्भो गर्भे येषां तान्। कनककलशान्—कनकस्य कलशान्। प्रणयसुलभाः—प्रणयेन सुलभाः।

भगवान्—the revered. **वासव**—Indra. **चन्द्रगौर**—white like the moon. **छत्र**—umbrella. **वालव्यजन**—chowry. **युगल**—pair. **ओघ**—multitude. **अम्भस्**—water. **गर्भ**—interior. **कनक**—gold. **कलश**—pitcher. **तद्विध**—such-like. **प्रणय**—love. **सुलभ**—easily obtainable.

टी०—भगवान् महामहिमशाली वासवः इन्द्रः एतत् पुरतो विराजत् चन्द्रगौरं शशिधवलं छत्रम् आतपत्रं वहति धारयति। एतेन सुरपतिसान्निध्येनाभिषेकस्य गौरवं दर्शितम्। देवी भगवती जह्नुकन्या जाह्नवी गङ्गेति यावत् शची इन्द्राणी च वालव्यजनयुगलं चामरद्वयं वहतः। प्रजौघाः प्रजानाम् ओघाः सङ्घाः अम्भोगर्भान् अम्भो जलं गर्भे मध्ये येषां तान्, कनककलशान् कनकस्य सुवर्णस्य कलशान् अत्र विभक्तिविपरिणामेनान्वयः। घटान् धारयन्ति उद्वहन्ति। तद्विधानां तथाभूतानां कुशलवसदृशानां सम्पदः श्रियः प्रणयसुलभाः प्रणयेन प्रेम्णा सुलभाः सुप्राप्याः, अत्र कुशलवयोर्महाभाग्यत्वाद्देवता अपि शुश्रूषायां स्वात्मानं व्यापारयन्तीत्येतच्चित्रम् आश्चर्यं न ॥ ४० ॥

आवयोः रामलक्ष्मणयोः। वेत्राधिकारः वेत्रे वेत्रग्रहणरूपे द्वारपालकर्मणि अधिकारः, आवां द्वारपालौ भवाव इत्यर्थः। अनुगृहीताभियोगः अनुगृहीतोऽनुकम्पितोऽभियोगः कर्म यत्र स तद्विधः संविभागः वेत्राधिकारे नियोगः। भवताऽऽत्मना सह वेत्राधिकारे यदहं नियुक्तस्तन्महदुपकृतमिति लक्ष्मणस्याशयः।

अ०—मैथिलीतनयः श्रेष्ठः महारथः कुशः नाम अद्य साम्राज्ये अभिषिक्तः, अस्य शासनं मान्यताम् ॥ ४१ ॥

पुरन्दरस्य यत् स्वर्गे पाताले यच्च वासुकेः।
पृथिव्यां यच्च मान्धातुस्तदस्तु तव मङ्गलम् ॥ ४२ ॥
(नेपथ्ये कलकल.)

जय जय महाराज।

सीता—प्रियं मे दिष्ट्या संवृत्तम्।
पिअं मे दिट्ठिआ संउत्तं।

रामः—पूर्णास्ते लक्ष्मणस्य मनोरथाः।

सर्वे—(हर्षं नाटयन्ति)

रामः—(कुशमुद्दिश्य) राजन्, त्वयाऽहमभ्यनुज्ञातो यौवराज्ये लवमभिषेक्तुमिच्छामि।

कुशः—यदाज्ञापयति देवस्तातः।

रामः—(प्रकामं कलशमानीय)

महाराजकुशस्यायं लवो नाम प्रियानुजः।
मया तद्वचनादेव यौवराज्येऽभिषिच्यते ॥ ४३ ॥

महारथ—the great warrior. साम्राज्य—sovereignty. अभिषिक्त—installed. शासन—command. मान्यताम्—should be obeyed.

टी०—मैथिल्या जानक्याः तनयः पुत्रः श्रेष्ठः वरः महारथः अतिरथः कुशो नाम अद्य साम्राज्ये चक्रवर्तिपदे अभिषिक्तः कृताभिषेक. सन् स्थापितः। अस्य कुशस्य शासनम् आज्ञा मान्यता स्वीक्रियताम् ॥ ४१ ॥

अ०—पुरन्दरस्य यत् स्वर्गे, यत् च वासुकेः पाताले, यत् च मान्धातुः पृथिव्यां, तत् मङ्गलं तव अस्तु ॥ ४२ ॥

पुरन्दर—Indra. स्वर्ग—heaven. वासुकि—the lord of snakes. पाताल—the nether world. मङ्गल—good fortune.

टी०—पुरन्दरस्य इन्द्रस्य यत् मङ्गलं स्वर्गे स्वर्गलोके, वासुकेः शेषस्य नागाधिराजस्य यत् पाताले रसातले, मान्धातुर्नृपस्य यत् मङ्गलं पृथिव्यां वर्तते, तत् कृत्स्नं मङ्गलं तव अस्तु ॥ ४२ ॥

अ०—महाराजकुशस्य अयं प्रियानुजः लवः नाम मया तद्वचनात् एव यौवराज्ये अभिषिच्यते ॥ ४३ ॥

अनुज—younger brother.

टी०—महाराजकुशस्य, अत्र कुशस्याभिषेकानन्तरं महाराजेति विशेषणं सङ्गतम्। अयं प्रियानुज. प्रियः सहोदर लवो नाम मया रामेण तद्वचनात् तदाज्ञयैव यौवराज्ये युवराजपदे अभिषिच्यते विधिना स्थाप्यते। अत्र रामस्य स्वाधिकारत्याग. कुशवचनपरिपालनञ्चेतदुभयं गम्यते ॥ ४३ ॥

सर्वे—(यथोचितं हर्षं नाटयन्ति)

वा—किं ते भूयः प्रियमुपहरामि ।

रामः—त्वद्दर्शनेन विधिना परिशुद्धवृत्ति-
जाता महाध्वरसखी मम सैव पत्नी ।
न्यस्तं च सूनुयुगलं भुवनाधिकारे
किं स्यादतः प्रियतमं गुरुणाभिधेयम् ॥ ४४ ॥

वा—तथापीदमस्तु—
स्थाणुर्वेधास्त्रिधामा मकरवसतयः पावको मातरिश्वा
पातालं भूर्भुवस्स्वश्चतुरुदधिसमाः साममन्त्राश्च वेदाः ।

अ०—विधिना त्वद्दर्शनेन परिशुद्धवृत्ति सा एव मम पत्नी महाध्वरसखी जाता । सूनुयुगलं भुवनाधिकारे न्यस्तम्, अतः प्रियतमं किं स्यात् (इति) गुरुणा अभिधेयम् ॥ ४४ ॥

स०—परिशुद्धवृत्ति.—परितः शुद्धा वृत्तिर्यस्याः सा । महाध्वरसखी–महाश्चासावध्वर. महाध्वरस्तस्य सखी । सूनुयुगलम्–सूनोः युगलम् । भुवनाधिकारे–भुवनस्य अधिकारस्तत्र ।

विधि—luck. दर्शन—visit. परिशुद्ध—chaste. वृत्ति—conduct. महाध्वर—the great sacrifice. सखी—companion. सूनु—son. युगल—couple. भुवन—world. अधिकार—administration. न्यस्तम्—has been entrusted. प्रियतम—dearest. गुरु—preceptor. अभिधेयम्—to be ordained.

टी०—विधिना दैवेन त्वद्दर्शनेन आकस्मिकमेवात्रागमनेनेत्यर्थ., परिशुद्धवृत्तिः परिशुद्धा वृत्तिर्यस्याः सा परिपूतचारित्रा, सा एव सीतैव साक्षात् न तु हिरण्मयी सीताप्रतिकृतिरित्यर्थः, मम पत्नी भार्यात्वेन मयाऽङ्गीकृता महाध्वरसखी महाश्चासावध्वरो यज्ञो महाध्वरः अश्वमेधाख्यः क्रतुस्तत्र सखी सहचारिणी जाता संवृत्ता । सूनुयुगलं पुत्रद्वयं कुशलवाख्यं भुवनाधिकारे प्रजाशासने न्यस्तं नियुक्तम् । अतः प्रियतमं हृद्यं किं स्यात् किं प्रार्थयितव्यम्भवेत् इति गुरुणा भवता वाल्मीकिनेत्यर्थ , अभिधेयं वाच्यम् ॥ ४४ ॥

अ०—स्थाणुः, वेधाः, त्रिधामा, मकरवसतय., पावकः, मातरिश्वा, पातालं, भूर्भुवःस्व , चतुरुदधिसमा. साममन्त्राः वेदाः च, सम्यक्संसिद्धिविद्यापरिणततपसः पीठिनः तापसाः च अस्मिन् नरेन्द्रे श्रेयांसि विदधतु, गोकुलं च वर्धताम् ॥ ४५ ॥

स०—त्रिधामा–त्रीणि धामानि यस्य सः । मकरवसतय·–मकराणां वसतयः । चतुरुदधिसमा·—चत्वार उदधयः चतुरुदधय·, तैः समाः । सम्यक्संसिद्धिविद्या-

सम्यक्संसिद्धिविद्यापरिणततपसः पीठिनस्तापसाश्च
श्रेयांस्यस्मिन्नरेन्द्रे विदधतु सकलं वर्धतां गोकुलं च ॥ ४५ ॥

(इति निष्क्रान्ताः सर्वे)

षष्ठोऽङ्कः।

समाप्तोऽयं ग्रन्थः।


परिणततपस —सम्यक् संसिद्ध्या विद्यया च परिणत तपो येषा ते, यद्वा, सम्यक्संसिद्धिविद्याश्च ते परिणततपसश्च ते।

स्थाणु—Śiva. **वेधस्**—Brahmā. **त्रिधामन्**—Visnu. **मकरवसति**-ocean. **पावक**—fire. **मातरिश्वन्**—wind. **पाताल**—the nether world. **उदधि**—ocean. **सम**—resembling. **संसिद्धि**—accomplishment. **विद्या**—knowledge. **परिणत**—perfected. **तपस्**—austerity. **पीठिन्**—patriarchal sage. **तापस**—ascetic. **नरेन्द्र**—ruler of men. **श्रेयस्**—good fortune. **सकल**—entire. **गोकुल**—stock of cattle.

टी०—स्थाणु शिव., वेधा ब्रह्मा, त्रिधामा विष्णुः, मकरवसतय· मकराणा नक्राणा वसतय निवासस्थानानि, समुद्रा इति यावत्, पावकः वह्निः, मातरिश्वा वायु., पातालं रसातलं, भूर्भुव स्व· भूर्लोक· भुवर्लोकः स्वर्लोक , चतुरुदधिसमाः चत्वार उदधयः समुद्रास्तै समास्तुल्या साममन्त्रा गीतिमुख्यमन्त्रोपेता वेदा; सम्यक्संसिद्धिविद्यापरिणततपस. सम्यक् संसिद्ध्या विद्यया च परिणतं परिपाकं गतं तपो येषा ते, पीठिन. पीठम् आसनमस्त्येषामिति ते कुलपतय इति भावः, तापसास्तपस्विनः, अस्मिन् नरेन्द्रे राजनि कुश इत्यर्थ., श्रेयासि भद्राणि विदधतु वितरन्तु, सकलं समग्रं गोकुलं गवा समूहः वर्धतां वृद्धिं यातु। अत्र नरेन्द्रे शुभाशंसया गोकुलवृद्ध्यभिलाषेण च मङ्गलान्तत्वमस्य नाटकस्य स्फुटम् ॥ ४५ ॥



श्लोकानुक्रमणिका



KUNDAMĀLĀ

ACT 1

May the dust from the feet of Heramba (Gaṇeśa), sipping (lit. kissing) the honey of the garland of Mandāra flowers on the crest of the enemy of Jambha (Indra), dry up the ocean of obstacles. (1)

कुन्दमाला—This is the title of the play. The formation of the epithet may be explained as कुन्दाना माला, ' a garland of the Kunda flowers'. The appellation signifies the play of that name by rhetorical transference of an epithet (अभेदोपचारात्). It is mentioned for the first time towards the end of Act 1. (See page 29). In Act third it plays an important part.

Śl. 1. **जम्भारि** etc. According to the writers on rhetoric every composition poetic or dramatic should begin with a benediction (आशी·), salutation (नमस्क्रिया) or hinting of the subject-matter (वस्तुनिर्देशः). In keeping with this convention, Diṅnāga opens the play with this benedictory verse in which the god Gaṇeśa is invoked for the removal of all obstacles.

जम्भ—Here it signifies a demon. Jambha was a demon-leader in the war against the gods who were marshalled by Indra. Indra slew him and was consequently known as Jambhāri, Jambha-dviṭ etc. The word has different meanings as enumerated below:—

जम्भः स्याद्दानवान्तरे ।
दन्तभोजनयोरंसे हनौ जम्बीरतूणयो· ॥

मौलिः (m.f.)=मुकुटः (०टम्) **मन्दारमालिका**–The garland of Mandāra flowers. मन्दार—मन्दयत इति, मन्दा आरा धारा अस्येति वा, √मदि (अञ्जिमदिमन्दिभ्य आरन्)+आरन्. It is one of the five trees belonging to the gods.

(After the benediction, enters the Stage-Manager.)

Cf. पञ्चैते देवतरवो **मन्दारः** पारिजातकः ।
संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्—अमरः

मधुचुम्बिनः—मधु चुम्बितुं शीलमेषामिति ते, √चुम्ब् (सुप्यजातौ णिनिस्ताच्छील्ये Pan 3. 2. 78)+णिनि (इन्).

हेरम्ब—हे रणे रम्बते(√रबि–to cry, thunder) गर्जतीति हेरम्बः—One who thunders in battle. Perhaps the battle of obstacles is here meant, since Ganeśa is called विघ्नराट्.

हेरम्बः शौर्यगर्विते ।
महिषे विघ्नराजे च ॥

ह is used in the following meanings —

हः शङ्करे हरौ हंसे रणरोमाञ्चवाजिषु—नानार्थरत्नमाला

हे उषसि रम्बत इति स्वामी It is an appellation of Ganeśa, the pot-bellied and elephant-headed god, the son of Śiva and Pārvatī and according to one legend of Pārvatī alone. He is the god of wisdom and is invariably invoked by the denizens of heaven and earth alike to remove all obstacles in the accomplishment of their desired undertakings.

अन्तरायाब्धिम्—अन्तराया. एव अब्धिः (कर्म०) तम्, the ocean of obstacles. अब्धि—आपो धीयन्तेऽत्र. अप्+√धा (कर्मण्यधिकरणे च Pan 3. 3. 93)+कि, ocean. For its various meanings read—

अब्धिर्ना सरसि वारिधौ.

Compare similar formations with कि affix —उदधि (उदकानि धीयन्तेऽत्र), पयोधि (पयांसि धीयन्तेऽत्र), जलधि (जलानि धीयन्तेऽत्र), Metre—अनुष्टुप्.

नान्द्यन्ते, etc.—The benedictory verse (नान्दी)is so called because the gods are supposed to delight in it (नन्दन्ति देवता अत्र It is recited as a sort of prologue at the opening of the play. and constitutes the *mangala* which is regarded as necessary for the removal of all impediments in the successful consummation of the play. Viśvanātha defines Nāndī as a 'composition recited in praise of a deity, Brāhmaṇa, king or the like, which also contains benedictory words':—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ S. D. 6. 24.

ततः प्रविशति सूत्रधारः—सूत्रधार is defined as

नाट्योपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ॥

Literally the word सूत्रधार means the thread-holder. It is a technical term applied to the stage-manager or chief actor who arranges the cast of characters, instructs them and takes a prominent part in the Prastāvanā or Sthāpanā (the prelude). It has been surmised on the basis of the literal sense of the word that the Sanskrit drama developed out of the exhibition of puppets and paper figures. But scholars are not agreed upon this point. The theory, however, recognizes the Sūtradhāra clearly, as the man who lays out the temporary play-house needed for the exhibition, which sense passes easily over into that of a director or manager.

'At the close of the Nāndī the Sūtradhāra enters'. Sanskrit dramas open with the benedictory verse followed by this stage direction. According to the view ascribed to Bharata, it is the Sūtradhāra, unless otherwise directed, who performs the recitation of the Nāndī. Another authority permits the Sūtradhāra or any other actor to recite it. The rule that at the end of the preliminaries the Sūtradhāra is supposed to leave the stage corroborates the view that it is the Sūtradhāra who recites the Nāndī. Yet in most of our dramas the entry of the Sūtradhāra is announced after the benediction. The explanation may lie in that it came to be thought desirable that the Nāndī which consists of a stanza or stanzas of benediction or invocation should form the first words of the play, and it could not, indeed, be the first words as desired, in case the word Sūtradhāra preceded it. Again, it was not in the character of Sūtradhāra as such that he recited the Nāndī, but he did so in the capacity of a Brāhmana. He did not assume the character of Sūtradhāra till he had finished the Nāndī.

May the mass of the matted hair of Śiva, tawny like the rays of the morning sun, protect you—(the mass of hair) which is like the upward moving flame of the perfected fire of inner austerities, which is as it were the splendid (lit. splendour) ant-hill, the abode of serpents in the form of the ripples over the waters of the Ganges, which is like the ever-lasting twilight to the Moon (on Śiva's fore-head), tender in form like a fresh lotus-stalk. (2)

Śl. 2. **अन्तस्तपस्तेजसः**—अन्तस्तप एव तेजः तस्य, of the fire of inner austerities as contrasted with that form of penance in which the body (the external self) is subjected to various degrees of torture and pain. Śiva's penance consisted in wrapt contemplation with all the physical activities ceased, the inner self only remaining active. **ऊर्ध्वविसर्पिणी**–ऊर्ध्वं विसर्तुं शीलमस्या इति सा—rising upwards. For the idea compare–प्रसिद्धमूर्ध्वज्वलनं हविर्भुज. Śiśu. 1. 2. **तरङ्ग**–तृ (तरत्यादिभ्यश्च) +अङ्गच्; wave. cf. लवङ्ग etc. **वल्मीक**–वलन्ते प्राणिनोऽत्रेति (अलीकादयश्च) इति निपातनात्सिद्धिः, an ant-hill. Here Śiva's matted hair is compared to an ant-hill, and the ripples in the Ganges on the God's head to serpents. Śiva bears the Ganges on his head with, which he is said to have intercepted the rush of the river in its descent from heaven that the earth might not be crushed by the weight of the falling stream.

इन्दोः etc. The moon, on the forhead of Śiva and the God's tawny matted hair being perpetually juxtaposed, the conjunction is said to bring about an everlasting twilight. **तरुणारुणांशुकपिला**—तरुणः य. अरुणः तस्य ये अंशवः तद्वत् कपिला—tawny like the rays of the morning sun. **अरुण**, the charioteer of the sun, is generally described as the son of **कश्यप.** It also means red, hence the red colour which pervades the sky before sunrise. Kālidāsa has used the word in this sense वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते Kum. 5. 44. It is also used simply for sun—

I have been commanded by the audience that I should stage Kundamala, the work of the revered poet Dinnāga, the resident of Arāralapura. So having called the noble lady (wife), rendering me co-operation in the performance of this dramatic composition, I betake myself to the stage.

(*Behind the Scenes*)

Let your ladyship descend here.

Stage-Manager—Ah ! Who is that rendering me help, as it were, by calling upon the noble lady ? (*Looking off.*) Alas ! alas ! it is a very painful (sight).

अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु—अमर.

Also in the sense of बालसूर्य—

अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ ।

निश्शब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु ॥ मेदिनी

It is derived from √ऋ (to go) (अर्तेश्च)+उनन्; similarly तरुण, √तॄ (त्रो रस्य लो वा)+उनन्; Here तरुण should be taken in the sense of 'fresh' i.e. newly risen and not in the sense of 'advanced youth' which sense does not agree with अरुण, which it qualifies. पायाद् वः,—वः= युष्मान्, अस्मान्, अन्यांश्च सर्वानित्यर्थः. It refers to people as a whole (त्यदादीनि सर्वैर्नित्यम् Pan. 1. 2. 72) Here as enjoined by the vartika 'त्यदादीना मिथः सहोक्तौ यत्परं तच्छिष्यते' the analysis of 'व' would have been 'अस्मान् अन्यान् सर्वान् युष्मांश्च' but according to the Bhāṣya 'पूर्वशेषोऽपि दृश्यते' it is better to expound the word as युष्मान् अस्मान् etc.; similarly for 'सश्च यश्च' we have both यौ and तौ. The compound so formed is called एकशेष ।

Metre—शार्दूलविक्रीडित.

P. 2. तत्रभवतः—The word अत्रभवत् and तत्रभवत् are used in the sense of 'respectable, noble.' तत्र and अत्र are used in sense other than that of the Locative and enter into a compound with भवत्. The compound so formed is सुप्सुपा. अरारालपुर—The native place of the poet Diññāga, the author of the play. It has not been possible to

identify the town with any known place. It is suggested that the word Arāiālapura might have been erroneously deciphered for Anurādhapura in Ceylon. According to the reading in certain manuscipts the word is अनूपराध. Such an error could easily arise in old Grantha Script. This view is further sought to be supported by a Ceylonese tradition according to which Nicula, supposed to be a contemporary of Dinnāga was a resident of Ceylon. It is, however, difficult to accept this suggestion as final.

वास्तव्य—वसतीति वास्तव्य √वस् (वसेस्तव्यत्कर्त्तरि णिच्च. वा० on 3. 1. 96)+तव्य, inhabitant. Cf.

पुरेऽस्य **वास्तव्य**कुटुम्बता ययुः. Śiśu. 1. 66.

P. 3. **दिङ्नाग**—According to certain manuscripts, the author's name is धीरनाग. For further information see Introduction. **साचिव्य**—सचिवस्य भावः—assistance. Cf.

न नर्म**साचिव्य**मकारि नेन्दुना. Śiśu. 1. 59.

आर्याम्—The honourable or respectable lady—an honorific title used by a man in addressing his wife. **रङ्गभूमिम्**—रङ्गभूमि=theatre. Its various meanings are given below—

रङ्गो ना रागे नृत्यरणक्षितौ
अस्त्री त्रपुणि———मेदिनी.

नेपथ्य—निनो नेत्रस्य, नेर्नेतुर्वा पथ्यम्— agreeable to the eye or to the hero. It means (1) a place for decoration where the actors attire themselves, (2) decoration, (3) costume of an actor. Here it is used in the first sense.

को नु खलु etc. The particle नु is often compounded with an interrogative pronoun and its derivatives in the sense of 'possibly, indeed'. खलु ind. is used as a particle of affirmation in the sense of 'indeed, verily, yes, etc'. as also as a continuative particle meaning 'now, now then, now further.' It frequently does little more than lay stress on the preceding word and is sometimes used merely as an expletive.

कष्टम्–ind. is an exclamation of grief or sorrow (Ah! alas!). The exclamation is repeated to indicate the intensity

Here is Laksmana carrying to the forest Sītā, in advanced pregnancy, exiled even from the state by Rāma, perturbed by his fear of the public scandal, due to her residence for a long time in the palace of the lord of Lankā (Rāvana). (3)

(Exit.)

End of the Prelude.

---

of emotion.

Sl. 3. The verse is quoted in the Sāhityadarpana as an instance of **प्रयोगातिशय**, which is defined as :—

यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते ।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥ S. D. 6. 36.

Viśvanātha's note on this verse runs as follows—

अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानमिच्छता सूत्रधारेण 'सीतां वनाय परिकर्षति लक्ष्मणोऽयम्' इति सीतालक्ष्मणयो· प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः ।

सुचिरम्–ind. for a long time, very long, a good while. **लोकपरिवादभयाकुलेन**–लोकस्य परिवाद लोकपरिवाद· तस्माद् यद् भयं तेन आकुलः तेन–uneasy for fear of public scandal. परिवाद–scandal. It is spelt परीवाद as well. Compare words of similar sense—**निर्वाद, अपवाद.** For the meaning read—

परिवादोऽपवादे स्यात्—मेदिनी.
निर्वादः स्याल्लोकवादपरिनिष्ठितवादयोः ।
अपवादस्तु निन्दायामाज्ञाविश्रम्भयोरपि ॥

For the use of **निर्वाद** in the sense of scandal, it is interesting to note the following—

खलनिर्वादकथायां वदिता यत् खलजनोपि स्यात् ।

Compare the speech of the actor in the Uttararāmacarita—

देव्यामपि हि वैदेह्यां सापवादो यतो जनः ।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ I. 6.

गर्भगुर्वीम्–गर्भेण गुर्वी ताम् । big with foetus. गुर्वी–गुरु (वोतो गुणवचनात् Pan 4.1.44) + ङीष्. Cf. आतङ्कस्फुरितकठोरगर्भगुर्वीम् Uttara. 1. 49.

(Then enter Sītā seated in a chariot, the charioteer and Lakṣmana)

The word गुर्वी suggests a twofold foetus · गुर्वीमित्यनेन यमलत्व सूच्यते। **वनाय परिकर्षति**–Here the expression 'वनाय परिकर्षति' may be construed as वन नेतुं परिकर्षति (vide क्रियार्थोपपदस्य च कर्मणि स्थानिन. Pān. 2. 3. 14.) Compare similar formations—**फलेभ्यो** याति i. e. फलान्याहृतुं याति, नमस्कुर्मो नृसिंहाय i. e. नृसिंहमनुकूलयितुं नमस्कुर्मः·। The object of the तुमुन्नन्त verb changes its case from the accusative to the dative when तुमुन्नन्त verb is not expressed अप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी.

Metre—वसन्ततिलका.

P. 4. **स्थापना**—is equivalent to प्रस्तावना (the prelude). Sanskrit drama generally uses the term Prastāvanā, the only exceptions being the Mattavilāsa, the Āścaryacūdāmani, the present play and the plays of Bhāsa which employ the term Sthāpanā. The term has not been defined in the Nāṭyaśāstra or the Daśarūpa but the definition given of Prastāvanā clearly indicates that the two are equivalent. The accepted essential feature of the Prastāvanā or the prologue is an address by the director to an attendant or an actress or the vidūsaka on some personal business which indirectly hints the *dramatic purport.*

नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिता· संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥ S. D. 6.31,32.

When the Actress or the Vidūṣaka (the jester or buffoon), or the Pāripārśvika (Associate), discourses with the Manager in interesting speeches arising out of their own business and hinting the subject in hand (i. e. the matter to be represented), it is designated Āmukha (Prelude) or Prastāvanā (Introduction).

ततः प्रविशति, etc. Then enter Sītā seated on a chariot, a charioteer and Lakṣmaṇa. The expression is a technical

Laksmana—Let your ladyship alight here. These forests on the banks of the Bhāgīrathī (Ganges) are not fit to be traversed on a chariot as they are completely blocked by the thick growth of trees and creepers. Let your ladyship, therefore, get down.

Sītā—Laksmana, my dear, my body is seized with a tremor owing to the fast dash of the horses. I am unable to (even) hold myself (in the chariot seat) much less get down.

---

one meaning that these characters are discovered described on the stage when the curtain is lifted up.

गहनतरुलताप्रतानसंरुद्धतया—गहनो यस्तरूणा लतानाश्च प्रतानस्तै संरुद्धानि (काननानि) तेषा भाव तत्ता तया–on account of being completely blocked by the expanse of trees and creepers. प्रतान –प्र+√तन् (to stretch out, to spread abroad)+घञ्, 'expanse' It also means a tendril. cf. लताप्रतानोद्ग्रथितैः स केशैः Rgh.2.8. **भागीरथी** is the name of the river Ganges, so called because it was brought down from heaven by Bhagīratha, an ancient king of the Solar dynasty, and the great grandson of Sagara. The Herculean task was undertaken by Bhagīratha in order that he might purify the ashes of his sixty thousand ancestors, the sons of Sagara who had been reduced to ashes by the wrath of the sage Kapila. By his austerities he succeeded in making the celestial stream descend from heaven to earth and from earth to the nether regions where lay the ashes of his ancestors.

वत्स is often used in the vocative as a term of endearment, meaning, 'my dear,' 'my darling', 'my dear child'.

अतिप्रवृत्ततुरङ्गमकम्पितदेहा—with (my) body seized with a tremor owing to the fast dash of the horses. तुरङ्गम— Cf. तुरग and तुरङ्ग. √तुर to move hastily, +√गम्, तुरेण त्वरया वा गच्छतीति, खच् is added to √गम् (गमश्च Pan. 3. 2. 47) and it is ordained डित् (खच्च डिद्वा वाच्यः) and as such the म् of √गम् vanishes optionally. By inserting मुम् (म्) by अरुर्द्विषद-जन्तस्य मुम् (Pan. 6. 3. 67) we have तुरङ्ग and the other form

Lakṣmana—Sumantra! Let an effort be made to restrain the horses.

Sumantra—Effort is being made, but the horses, fond of music (lit. Gāndharva art), defy it. For see—

These horses greatly attracted by the strains of the swans, pouring lightly into their ears, gallop all the more swiftly, unheedful of the pull of the reins. (4)

---

will be तुरङ्गम. For similar formations compare विहग, विहङ्ग, विहङ्गम: **संस्थातुम्**–(Inf.)सम् + √स्था + तुम्. The root √स्था with सम् means to die, to be complete, Cf. संस्थाच पाण्डुपुत्राणाम्, सन्तिष्ठते यज्ञः, but संस्था may also mean स्थिति etc.

संस्था तु मर्यादा धारणा स्थिति ——अमर.

संस्थश्चरेऽवस्थिते स्त्री स्थितौ सादृश्यनाशयोः——मेदिनी.

For the use of √स्था with सम् in the sense of स्थिति compare—रावणभवनसंस्थानात् Uttara. P. 6. and इक्ष्वाकूणां सन्ततिर्गर्भसंस्था Uttara. 1. 19.

अवतरितुम्–the other form would be अवतरीतुम्, the इ being elongated optionally (vide वृतो वा Pāṇ. 7. 2. 38).

P. 5. **ननु**–ind. is here used in the sense of 'अनुनय' pray', 'be pleased'.

गान्धर्वप्रिया वाजिनः–The horses fond of music. Gāndharva (n) means the art of the Gandharvas, a class of demi-gods regarded as the singers or musicians of the gods.

Compare the opening scene in the first act of Śakuntalā where Duṣyanta is represented in a sitting posture on the chariot in the company of the charioteer.

Śl. 4. **विकृष्यमाणाः कलहंसनादैः**—The strains of the swans are so ravishing that the horses would not pay any heed to the pull of the rains but would gallop all the more swiftly. **कलहंस**—a melodious swan. The bird as described by Sanskrit writers is the vehicle of the god Brahmā and is gifted with the peculiar power of separating milk from water. **प्रग्रहसंयमस्य**-प्रग्रहैः संयमस्तस्य–of the strain of the reins. प्रग्रह—Here it is used in the sense of 'reins'.

Lakṣmana—But, Sumantra, the steeds, not seeing the even or uneven parts of the ground on account of the terrific speed urged by their intense zeal, might throw the chariot down the steep bank of the Ganges. You should, therefore, endeavour (to hold them in), with all your strength.

Sumantra—(*Gesticulates pulling up of the reins*)

Lakṣmana—The chariot is stopped. Your ladyship can, therefore, get down.

(*Sītā having alighted walks about.*)

Lakṣmana—Sumantra ! These horses are tired on account of long journey. You would, therefore, give them rest.

Sumantra—As my Lord commands.

(*Exit, seated in the chariot.*)

For its various meanings compare—

प्रग्रहस्तु तुलासूत्रे बन्द्या नियमने भुजे ।
हयादिरश्मौ रश्मौ च सुवर्णहरिपादपे ॥

अनाश्रवाः—न आश्रवाः (नञ् तत्पु०). आश्रव—आ + श्रु (पचाद्यच् Pān. 3. 1. 134) + अच्, obedient. Cf.

विधेयो विनयग्राही वचने स्थित **आश्रवः**——अमरः
आश्रवो वचनस्थिते—हैमः

Metre—उपेन्द्रवज्रा.

अतिरभसप्रवृत्तवेगत्वात्-अतिशयितो यो रभसस्तेन प्रवृत्तो यो वेगस्तस्य भावस्तत्त्वं तस्मात्—on acconnt of their speed urged by intense delight. रभस—√रभ् (अत्यविचमितमि०)+असच्. The word is here employed in the rare sense of delight. It is in the sense of speed that it is commonly used. Bhaṭṭoji quotes Viśva—'रभसो वेगहर्षयोः'.

गङ्गाप्रपाते-गङ्गाया. प्रपातस्तस्मिन्,-in the steep of the Ganges. प्रपात-प्रपतन्त्यस्मादिति, प्र+√पत् (अकर्त्तरि च कारके संज्ञायाम् Pān 3. 3. 19)+घञ्, steep. Cf.

प्रपातस्त्वतटो भृगुः—अमरः
प्रपातो निर्झरे भृगौ
अवटे पतने कच्छे—हैमः

सर्वात्मना-सर्वेण आत्मना—With the entire self i.e. whole-

Lakṣmana—(*Walking about—aside*) I have been commanded by my noble brother, nay, by (my) master, thus—"Dear Lakṣmana! Some strange scandals have gained circulation among the citizens, grown suspicious of the chastity of Queen Sītā on occount of her stay in the palace of Rāvana. I am, therefore, not going to bring (lit. incapable of producing) a slur on the Ikṣvāku family, spotless like the autumnal moon, merely for the sake of Sītā. Moreover, from a longing so natural to a lady in the family way, Sītā (herself) has requested me for a

---

heartedly, thoroughly or completely, with all the strength.

P. 6. **अन्यादृशाः प्रलापाः प्रवर्त्तन्ते**—strange scandals have gained currency. For the clarity of the idea it is interesting to note the following from the Rāmāyana—

अस्माकमपि दारेषु सहनीयं भविष्यति ।
यथा हि कुरुते राजा प्रजास्तमनुवर्तते ॥
एवं बहुविधा वाचो वदन्ति पुरवासिनः ।
नगरेषु च सर्वेषु राजन् जनपदेषु च ॥

सीतामात्रस्य कृते—for the sake of mere Sītā. It shows how highly Rāma prized the good name of his family. He would not suffer his personal affection to stand in the way of his duty. Great as was the love of Rāma for Sītā, greater still was his resolve to preserve the fair name of the royal house. For the maintenance of the tradition of his house, no price was considered too much. He would sacrifice even the idol of his heart.

शरच्चन्द्रनिर्मलस्य इक्ष्वाकुकुलस्य—The family of Ikṣvāku, the celebrated founder of the solar dynasty of Ayodhyā is here compared to the autumnal moon, purity being the common factor, but unlike the moon, the race of Ikṣvāku is spotless, and he would not permit even the slightest scandal to be associated with its name.

दोहदेन-दोहद—(m. and n.) दोहमाकर्षं ददातीति । दोह+√दा (आतोऽनुपसर्गे कः. Pān 3. 2. 3)+क. But it is really a Prākrita

visit to the Bhāgīrathī. Taking her, therefore, under the pretext of this visit to the Ganges on a chariot driven (lit. guided) by Sumantra, you should abandon her in some forest tract and come back."

So I am leading her ladyship—apprehending no mishap by virtue of the faith in her kinsmen—to the forest as a domesticated female deer to the place of execution.

---

word coming from the Sanskrit दौहृद It means pregnancy as well as the longing of a pregnant woman–'अयमिच्छामात्रवाच्यपि विशेषेण गर्भिणीच्छाया प्रयुज्यते—भानुजिदीक्षित ' Cf. also

दोहृदो गर्भलक्षणे
अभिलाषे तथा गर्भे—हैम.

Here it is used in the sense of 'the longing natural to a pregnant woman'. Compare the following from the Uttararāmacarita'. 'य कश्चिद्गर्भदोहृदोऽस्या भवति सोऽचिरान्मानयितव्य '. The following note by Vīrarāghava on it may be interesting to read 'गर्भदौहृदलक्षणं' 'स कीचकैर्मारुतपूर्णरन्ध्रै.' इतिवत् विशेष्यमात्रपरम्, अन्यथा दौहृदशब्दस्यैव गर्भचिह्नवाचित्वात् । तच्च विशिष्टवस्तुविषयाभिलाषादिरूपम् ।

गङ्गागमनव्याजेन–under the pretext of a visit to the Ganges. Sītā had requested Rāma for a visit to the Ganges and this afforded Rāma an opportunity for sending her into exile through Lakṣmaṇa without being an eye-witness to the piteous scene of abandonment.

स्वजनविस्रम्भनिर्विशङ्काम्–स्वस्य जन. स्वजनः तस्मिन् यः विस्रम्भः तेन निर्विशङ्का ताम्—who is fearless by reason of confidence in her kinsmen. Compare Rāma's speech in the Uttararāmacarita —विस्रम्भादुरसि निपत्य लब्धनिद्राम्. 1. 49.

गृहहरिणीमिव वध्यभूमिम्–Like a domesticated female (being led) to a place of execution. Rāma and Lakṣmaṇa were fully alive to the magnitude of the perils that awaited Sītā in the forest. The fact that they had already regarded her as lost reveals the immensity of the sacrifice involved in Rāma's action.

Sītā—Lakṣmana, my dear, my feet, wearied with bearing the weight of the greatly advanced pregnancy, are failing me. Stepping ahead, therefore, you would let me know how far is the sacred Ganges.

Laksmana—Surely, the sacred Bhāgīrathī is near at hand.

Away with anxiety for we have almost arrived. See—

The Gangetic breeze wafting the aroma of the floral juice from the lotus-forest, carrying the exceedingly sweet notes of the swans, and scattering the cool spray of the ripples, blows hither, as it were, with the desire of greeting you. (5)

For the idea compare—

शैशवात्प्रभृति पोषितां प्रिया सौहृदादपृथगाश्रयामिमाम् ।
छद्मना परिददामि मृत्यवे सौनिको गृहशकुन्तिकामिव ॥ Uttara. 1. 45.

Elsewhere in the Uttararāmacarita Rama says —

'क्रव्याद्भयो बलिमिव निर्घृणः क्षिपामि' 1. 49.

Sl. 5. **गङ्गानिलः**—गङ्गाया अनिलः the breeze from the Ganges. **अनिल**—अनिति प्राणित्यनेनेति. √अन् (to breathe) (सलिकल्यनिमहि॰) +इलच्. Compare similar formations where the affix इलच् is used. सलिल (सलति गच्छति निम्नमिति), महिला, कोकिल etc. **पङ्कजवनात्** from the lotus-bed. Vana (n) has also the sense of a cluster, group or multitude. Therefore, the phrase also means 'from the multitude of lotuses (growing in the thick bed)'.

मकरन्दगन्धान्-मकरन्दस्य गन्ध. मकरन्दगन्धस्तान्-मकरन्दः=पुष्परसः-the juice of flowers. **आदाय** (Gerund)आ+ √दा (समासेऽनञ्पूर्वे क्त्वो ल्यप् Pan.7.1.37)+ल्यप्. **विकिरन्**(Pr. act. part)-वि+ √कॄ+शतृ, spreading. **सभाजनकाङ्क्षयेव**- √सभाज् (to greet) (ल्युट् Pan. 3. 3. 115)+ ल्युट् (॰यु). यु is replaced by अन (vide युवोरनाकौ Pan 7. 1. 1.).

For the idea compare—

मधुरमिव वदन्तः स्वागतं भृङ्गशब्दै-
नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टिं किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥ Nag. 1. 11.

Metre—वसन्ततिलका.

Sītā—(Indicates contact) The contact of the breeze from the ripples of the Bhāgīrathī, cool and pleasant like the touch of a mother's hand, has now wiped off my fatigue as also my sins. Nevertheless, the longing of maternity urges (lit. encourages) me to take a bath in the Ganges. You would, therefore, show me the way so that I, overpowered with fatigue, may descend this steep of the bank.

Lakṣmaṇa—(Pointing out) These places along the banks are difficult to descend on account of their being entirely unfrequented by men. Holding firmly, therefore, at every step—

जननीकरस्पर्शसुखशीतलस्य—There is really something tragic in the statement of Sītā. The touch of the balmy breeze from the Ganges is pleasant like that of a mother's hand. Sītā, to be sure, was not to experience any more the touch of her mother's hand. Ganges henceforward would be her mother and the breezes from the stream would be the mother's hand to her.

तरङ्गमारुतस्य—For तरङ्ग see p.(4.) मारुत is same as मरुत्. Words such as प्रज्ञ take अण् as a स्वार्थिक suffix (viz. in the sense of the base itself). Thus प्रज्ञ, मनस्, रक्षस्, देवता and मधु give us the forms प्राज्ञ, मानस, राक्षस, दैवत and माधव respectively without any change in sense.

परिश्रमस्येव पापस्य—The potency of the Gangetic waters to remove all sin has been believed implicitly by the Hindus since ages. The river has ever been regarded the most sacred one in India and a dip in it is believed to bless one here-after.

अत्यन्तविश्रान्तमनुष्यसञ्चारतया-अत्यन्तं विश्रान्तो विरतो मनुष्याणां सञ्चारो यत्र तेऽत्यन्तविश्रान्तमनुष्यसञ्चारा (तटप्रदेशाः), तेषां भावः, तत्ता तया, —because these banks have not been visited by men, or the cpd. may be dissolved thus.—अत्यन्तं विश्रान्तानां मनुष्याणां संचारो यत्र ते (तटप्रदेशाः), तेषां भावः, तत्ता तया, —because of the roaming of extremely wearied persons. But in that case it is not

Catching hold of the Nīvāra creeper with the left hand and supporting the knee with the right, your ladyship may come slowly, for a while, planting foot upon each of my foot-prints. (6)

Sītā—(Descending as directed) Darling, I am extremely wearied, I would rest for a while sitting under this shade of the tree.

Lakṣmana—As pleases the noble lady.

(Sitting down, Sītā motions resting)

Lakṣmana—Ah ! The meritorious have (always) an inseparable paraphernalia. For thus—

---

clear why only wearied persons move about on the banks of the Ganges. The sense seems to be that the steep banks are difficult to descend for want of a proper passage on account of the absence of all human traffic.

दुरवताराः–The correct form would be दुरवतरा , दुर्+अव+ — √तृ (ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् Pan. 3. 3. 126)+खल्. Similarly we have दुष्करः, ईषत्करः, सुकर. etc. But it is interesting to note the following sūtra of Vāmana in connection with the formation of the word अवतार—अवतारावचायशब्दयोर्दीर्घव्यत्यासो बालानाम् ।

प्रपदम्—पादस्याग्रम्, (पादाग्रं प्रपदम्–अमरः) प्रकृष्टं प्रारब्धं प्रगतं वा वा पदम्. The prepositions such as प्र are compounded in the sense of गत etc. with words in the nominative case (vide प्रादयो गताद्यर्थे प्रथमया). Similarly प्राचार्य (प्रगत· आचार्यः). **आस्थाय**–(gerund) आ+√स्था+ल्यप्.

Śl. 6. **समालम्ब्य**–(gerund) सम्+आ + √लम्ब्+ल्यप्. **आदधाना** —Present active participle from आ+ √धा to hold. Mark the alliteration in the stanza.

Metre—इन्द्रवज्रा

सुष्ठु—ind. means excellently, exceedingly.

P. 9. **यदभिरुचितं देव्यै**—the dative is used in connection with the root रुच् (रुच्यर्थाना प्रीयमाणः Pan. I. 4. 33).

असंहार्यपरिच्छदाः सुकृतिनः—The meritorious have an inseparable (Lit. irreducible) paraphernalia. असंहार्यपरिच्छदाः –असंहार्याः परिच्छदा· येषां ते (बहु०). The idea is that the command-

The ripples blow cool breezes laden with spray. And these swans of sweet strain sing in concert. This shade, embracing like a friend, gratifies the heart. Your ladyship has attendants, so it seems, even in this desolate forest. (7)

Sītā-As stated by the prince, here my mind feels ecstatic as if in the company of kinsmen.

---

ing personality of Sītā could not but be the recipient of devotinal service from nature and her objects. In her palace the queen was fanned by her maid-servants and was waited upon by her friends. A regular orchestra contributed exceedingly to the diversion of her mind. These details of service are assiduously maintained in the forest though those who administered them are no longer to be found. The Ganges fans the queen with its cool breezes, while the music of the bards has been appropriately replaced by the melodious clucking of the swans. The place of the bosom companions of the queen has been taken by the delightful shade. Surely the merits find a footing everywhere (पदं हि सर्वत्र गुणैर्निधीयते Rgh. 3. 62).

Śl. 7. **सजलकणिकान्**-जलस्य कणिका जलकणिकास्ताभिः सह वर्त्तन्त इति तान् (बहु०). The particle सह may be compouded with a noun in the instrumental case in a Bahuvrīhi compound when there is equal participation in some action. (तेन सहेति तुल्ययोगे Pāṇ 2. 2. 28).

वीजन्ते—fan. √वीज् (to fan) Pr. 1st. per. plu. **रमयति**—(caus.) √रम् + णि + अ + ति. The vowel of the first syllable is shortened by मिता ह्रस्वः (Pāṇ. 6. 4. 92). **परिजनवतीवात्रभवती**- It can be split up either परिजनवती इव or परिजनवती वा, without any change in the meaning. वा is sometimes used in the sense of इव. Cf.

आशीविषो वा सङ्क्रुद्धः सूर्यो वाभ्रविनिर्गतः ।
भीमोऽन्तको वा समरे गदापाणिरदृश्यत—Kṣīrasvāmī

Metre—शिखरिणी.

Laksmana—(*Aside*). The noble lady has had rest and is sitting comfortably. This, therefore, is the opportunity to act as resolved upon. (*Openly*) (*Suddenly falling at her feet*) This Lakṣmaṇa, of luck and virtue all bereft, the sharer in the trouble of ceaseless exile, begs you to make your heart firm.

Sītā-(*Confusedly*) Is it all well with my Lord?

Laksmana-(*Pointing to the forest*). How could it be well with the noble Sir in these circumstances ?

Sītā—Is it that another exile has been ordered by the lady Kaikeyī ?

Laksmana—An exile has been ordered but not by mother.

Sītā—By whom, then, has it been enjoined ?

Laksmana—By the noble Sir.

Sītā—Enjoined in what manner ?

सअणमज्झगदाए—The Phrase is rendered into Sanskrit in two ways· (1) शयनमध्यगताया (2) स्वजनमध्यगतायाः. The second rendering agrees with the context – परिजनवतीवात्रभवती ।

एषा विश्रान्ता etc. This simple sentence is pregnant with truth. The saddest events of our life are tragically preceded by the happiest moments. Lakṣmaṇa found his opportunity to break the sad news of abandonment at a time when Sita was sitting quite comfortably, musing delightfully upon the charming scenes around.

अनवरतप्रवासदुःखभागी – The sharer in trouble of ceaseless exile. The student should mark in this connection the grievous outburst of Rama in the third act—

पूर्वं वनप्रवासः पश्चाल्लङ्का ततः प्रवासोऽयम् ।
आसाद्य मामधन्यं दुःखाद्दुःखं गता सीता ॥ 3. 3.

निर्लक्षणः—Lit. without any auspicious marks or without significance and consequently bereft of all virtues or merits.

आर्यपुत्र—आर्यः पूज्यः श्वशुरः तस्य पुत्रः, lit. the son of the venerable father-in-law ; an address by a lady to her husband.

Lakṣmana—(*Gesticulating the suppression of tears.*) I am struggling to speak simply because it is my noble master's behest but even so the speech entering the heart forms (at it were) a knot. (8)

Sītā—Has the exile been enjoined upon me ?

Lakṣmana—Not only upon you but also upon himself.

Sītā—How so ?

Lakṣmana—When you are in exile, Rāma's residence even in the delightful palace which has been heartily enjoyed

---

